
परिग्रहण सं 10 368
ग्रन्थालय, के उ ति शि संस्थान
सारनाथ, वाराणसी


THE WORKS OF
SRI SANKARACHARYA
VOLUME
6
SRI VANI VILAS PRESS
SRIRANGAM



TO

HIS HOLINESS JAGAT GURU

SRI SACHCHIDANANDA SIVABHINAVA

NRISIMHA BHARATI SWAMI

WHO ADORNS THE THRONE OF THE SRINGERI MUTT

AS THE WORTHY REPRESENTATIVE OF THE

REVERENCED ACHARYA

AND

FROM WHOM IT IS IMPOSSIBLE

TO DRAW A LOSS WHOLLY FOR ONE'S OWN

A PERFECT MAHATMA A NOBLE SAINT

AND A MODEL OF DIVINE ASCETIC

THIS EDITION IS MOST RESPECTFULLY INSCRIBED

AS A TOKEN OF UNFEIGNED ADMIRATION

OF THE HUMBLEST OF ALL HIS DISCIPLES

T. R. RAMASUBRAHMANYAM



TO

HIS HOLINESS SRI SRI ABHINAVA

SRI SACHCHIDANANDA SIVABHINAVA

NRISIMHA BHARATI SWAMI

WHO ADORNS THE THRONE OF THE RENOWNED MUTT

OF THE WORTHY REPRESENTATIVE OF THE

PARAMAHAMSA ACHARYA

AT

THEVANUR WHOM IT IS IMPOSSIBLE

TO DESCRIBE ADEQUATELY PERSONAGE

WITH GREAT MAHATMA NOBLER SAINT

AND A MOST RECORD ASCETIC

THIS EDITION IS MOST RESPECTFULLY INSCRIBED

AS A TOKEN OF GREAT DEVOTION AND

OF THE HUMBLEST OF ALL HIS DISCIPLES

T. R. BALASUBRAHMANYAM



नानाजन्मसु मोचितं तपसा पापं चित्तात्मना
मानेन प्रतिबाधतेन कृतकं सत्यं हृतौ शाश्वतं ।
मद्भक्तं परमं जगद्गुरुवरं भद्रं मया स्थापितं
स्वामिन्नात्मजनं कृतं गुरुराड भव्यं तथस्तं नमम् ॥

प्रेमभक्तिरसार्द्रचित्तसरसा स्वित्वा मुदा
नानाल परिजा य मस्तकमय समुद्य साक्षं वृध ।
नाभ्यात्रपवगालमभ्यधि स्मच्छोणिते क्षेपु ला
कृत्वा पापहरं समर्पितनिजं कृतार्थोऽस्म्यहम् ॥

साम्यादमाधानुपक्षरात सुखा । नत्थाश्रितसामगार ।
श्राद्धकरायप्रतिमागतेष्टाकाङ्क्षयापहतिव्यधायि ॥

श्रीवाकरकृतिमा गुरुवरतुल्या समर्पिता मोदात ।
बालादिभक्तभाजा सुव्रतपण्यन भक्तिनम्रेण ॥ ६ ॥



	PAGE
TAITTIRIYOPANISHAD BHASHYA	1—156
SIKSHAVALLI	3
BRAHMANANDAVALLI	33
BHRIGUVALLI	123
CHHANDOGYOPANISHAD BHASHYA	1—200
CHAPTER I	5
CHAPTER II	81
CHAPTER III	137





	पृष्ठम्
तैत्तिरीयोपनिषद्भाष्यम्	१—१५६
शीक्षावल्ली	५
ब्रह्मानन्दवल्ली	५५
भृगुवल्ली	१०३
छान्दोग्योपनिषद्भाष्यम्	१—२००
प्रथमोऽध्याय	५
द्वितीयोऽध्याय	८१
तृतीयोऽध्याय	१३७



THE

UPANISHAD-BHASHYA

VOL 3

-TAITTIRIYA &-


CHHANDOGYA I—III

॥ श्री ॥

उपनिषद्भाष्यम्

श्रीमच्छङ्करभगवत्पूज्यपादै
विरचितम् ।

तृतीयो भाग



तैत्तिरीयं छान्दोग्ये

१—३. अध्यायाश्च



॥ ॐ ॥

तैत्तिरीयोपनिषद्भाष्यम्

श्रीमच्छङ्करभगवत्पूज्यपादैः

विरचितम् ।



॥ श्री ॥

॥ विषयानुक्रमणिका ॥

पृष्ठम्

शीक्षावल्ली ७—५४

ब्रह्मनमस्काररूपमङ्गलम् ७

गुरुनमस्कार चिकीर्षितग्र मनिर्देश ७

उपोद्घात ८

दुरितक्षयात्प्रथनित्यकाम्यकमणा पूवकाण्डेऽधिगतत्वम् ८

कम॰योऽसभा यमाननि श्रेयसफलब्रह्मावत्राया सनि-
दानक्मा मूलनाथाया प्रारम्भप्रस्ताव ८

मुमु नोरागामिनारीरोत्पादकहेत्वभावादयत्नत एव मोक्ष ,
अथवा नितिशयप्रीतिरूपस्वगस्य मोक्षाद यत्नास
भगात्स्वगसाधनस्यैव माक्षसाधनत्वम् , इति तदथ
उपानपदारम्भो यथ इति पूवपक्ष ८

विरुद्धफलानेकसचितकमसभवाच्छरारोत्पादहेत्वभावो
ऽसिद्ध इति प्रथमपक्षपरिहार ९

सचितकर्मसभवऽपि तेषा नित्यकम॰य क्षय इति श
ङ्काया नित्यकर्मणामकरणनिमित्तप्रत्यवायपरिहारा-

थत्वान्न सञ्चितक्षयहेतुत्वमिति तदक्तदर्शितमतनेव व्युदास ९
नित्यस्य सञ्चितक्षयहेतुत्वेऽपि न शुद्धकर्मक्षपयितृत्वम-
विरोधादित्याभमतहान ९
असति विवेकबले काम्यकर्मवजनमशक्यमिति मुमुक्षो
काम्यकर्माप्रसक्तिरिति पक्षस्यासिद्धि ९
अभावाद्भावोत्पत्तौ प्रमाणाभावान्न नित्यानामकरणान
मित्तप्रत्यवायपरिहारकत्वम्, अपि तु उपात्तदुरित
क्षयज्ञापक नित्यानामकरणम्, इति स्वमतप्रदर्शन
पूवकमयत्नतो माक्ष इति पक्षखण्डनोपसहार ९
स्वर्गसाधनस्यैव मोक्षसाधनत्वामिति पक्षमनूद्य मोक्षस्य
नित्यत्वाभ्युपगमेन परिहार १०
विद्यासहितकर्मणा नित्यारम्भसाम र्यमाशङ्क्य, तत्रो
क्तान्निरसनम् १०
प्रध्वसाभावदृष्टान्तन नित्यारम्भसभवमुद्भा य, प्र वसा-
भावस्य कार्यत्वमभ्युपगम्य तद्भिन्नत्वविशेषणन व्यु
दास १
प्रध्वसाभावस्य कार्यत्व न सभवतीति सप्रपञ्च समर्थनम् १०
विद्याकर्मकर्तृनित्यत्वात् साधनसातत्येन साध्यसातत्यश
ङ्का कर्तृत्वस्यानुपरमे उपरमे वा अभिमताथासि
द्धया समुन्मूल्य, परमात्मज्ञानादेव मोक्ष इति तद
थमुपनिषदारम्भ साधुरेवेति वर्णनम् १०
उपनिषच्छ दार्थ युत्पादनम् ११

विद्याश्रवणधारणादीनामप्रतिब धाय अध्यात्मप्राणान्त-
भिमानिमित्रादिदेवताना सुप्रसन्नत्वप्रार्थनम् ११
ब्रह्म विविदिषुणा वाग्वाङ्मयब्रह्मविषयाणा नमस्कारवद
नसरक्षणप्रार्थनक्रियाणा ब्रह्मविद्योपसर्गशा त्यर्थ करणम् १२
शा ति शा तिरिति त्रिवारपाठस्त्रिविधविद्याप्राप्त्युपस
र्गप्रशमनार्थ १२
अर्थज्ञानप्रधानोपनिषदि स्वरवर्णादिष्वप्रमादाय शीक्षा
ध्यायारम्भ १३
शीक्षाशा दयुत्पत्तिपुर सर तदर्थविवरणम् १३
शीक्षाध्यायस्थशिक्षित यविषया स्वरवर्णादय १३
शिष्येण स्वस्याचायस्य च वक्ष्यमाणसहितोपासनपरि
ज्ञाननिमित्तयशआदिप्रार्थनम् १४
'अथात सहिताया ' इत्यनाथात शब्दाथविवरणम् १४
लोकादिविषया पञ्च सहितोपासना १५
तासा महासहितात्वव्युत्पादनम् १५
'अथाधिलोकम्' 'अथाधिज्यौतिषम् इत्यादावथ
शब्दस्य क्रमार्थत्वम् १५
सहितापूर्ववर्णादिषु पृथि यादिदृष्टिरित लोकविषयस-
हितोपासनप्रकार १५
अस्य प्रकारस्य ज्योतिरादिविषयेषूपासनेषु समानत्वम् १६
अत्रत्यवेदेत्यस्योपासनार्थत्वप्रपञ्चनपुर सरमुपासनश दा-
र्थव्युत्पादनम् १७

प्रकृतोपासनफलनिष्ठ्यर्थोपपादनम् १७
मेधाकामस्य 'यश्छन्दसाम्' इत्यादिम त्रजपविधान
परपरया विद्योपयोगार्थम् १९
ओंकारम् 'यश्छन्दसामृषभ इत्यादिना स्तुत्वा 'स
मे इन्द्र' इत्यादिना मेधादीना प्रार्थनमिति म त्रार्थ २०
श्राकामस्य 'आवहन्ती वितन्वाना' इत्यादिम त्रैर्होम
विधानम् २१
ओकार प्रत्येव आवहन्ती वितन्वाना' इत्यादिना श्री
प्रभृतीना प्रार्थनमिति म त्रार्थ २१
विद्याप्रकरणे श्रीकामानुप यास परपरया विद्योपयोगार्थ २२
वृत्तानुवादपूवकमुत्तरानुवाकस्य सब धकथनम् २४
मह इति चतुर्थ याहृतौ माहात्म्यमन्यनिदित्वपूर्वक ब्र
ह्मदृष्टिविधानम् २४
लोकात्मकभूरादीतर याहृतीना महात्मकब्रह्मावयव
त्वमुपपाद्य तासु एतल्लोकादिदृष्टिविधानम २
एकैक याहृतीना चतुःप्रकारमुपासनम् ७१
वक्ष्यमाणानुवाकेनास्यैकवाक्यतामुपपाद्य हृदया तरुपत्र
ह्मत्वमोमयत्वादिविशिष्टब्रह्मण एतदुपासनमिति
सूचनार्थत्वम् 'स वेद ब्रह्म इति सदर्भस्य २६
वृत्तानुवादपूवकमुत्तरानुवाकसब धवर्णनम् २८
प्रकृतोपास्यब्रह्मणो यथावदुपल यमुपासनार्थ च स्था
नविशेषप्रदर्शनपूवकस्वरूपप्रदर्शनम् २८

प्रतिपादितस्वरूपप्रतिपत्तये मार्गविशेषप्रदर्शनम् २०
उक्तमार्गेण प्रतिपन्नब्रह्मण पुरुषस्य स्वाराज्यादिफल
विशेषप्रदर्शनम् २९
अस्मि नुपासने आदरार्थम् 'प्राचीनयोग्योपास्स्व' इत्या
चार्योक्तिप्रदर्शनम् ३०
प्रकृतस्य ब्रह्मणो हिरण्यगर्भस्य पृथि यादिपाङ्क्तरूपेणोपा
स ना तत्फलविशेषश्च ३१
वृत्तानुवादपुर सरमुत्तरानुवाकावतरणम् ३३
श दमात्रविषयस्यापि औंकारोपासनस्य प्रतिमादौ वि
ष्ण्वाद्युपासनस्येव फलप्रदानसामर्थ्यसभव ३४
औंकारे ब्रह्मसादृश्यवर्णनपुर सर ब्रह्मदृष्टिविधानम् ३४
'ओमित्येतदनुकृति ' इत्यादिना प्रकृतोकारस्तुति
यवहित याद्दत्यनुवाकेनोत्तरानुवाकसब धकथनम् ३७
केवल विज्ञानेनैव स्वाराज्यादिफलस्योक्तत्वाच्छ्रौतस्मार्त
कर्मणामानर्थक्यमाशङ्क्य तेषामपि पुरुषार्थ प्रति
साधनत्वसत्त्वात्तान्यवश्यानुष्ठेयानि ३७
पुन पुन 'स्वाध्यायप्रवचने च' इति ग्रहणस्य तयोर्य
ज्ञत अनुष्ठेयत्वसिद्धिदर्शनम् ३७
उक्तानामपि सत्यतप प्रभृतीनामादराथ राथीतराद्या
चायग्रहणेन प्रदर्शनम् ३७
'अह वृक्षस्य' इत्यादिम त्रस्य ब्रह्मविद्याप्राप्त्यर्थ जपा
र्थत्वेन विधानम् ३९

अस्य मन्त्रस्य ब्रह्मविदो ब्रह्मभूतस्य त्रिशङ्कमहर्षेर्वेदानुवचनत्वप्रदर्शनम् ४०
वेदग्रहणानन्तरमाचार्येण शिष्य प्रत्यनुशासनात्पूर्वोपचितदुरितक्षयद्वारेणावश्यानुष्ठेयानि नित्यनैमित्तिकानीत्युत्तरानुवाकतात्पर्यार्थ ४३
'सत्य वद' इत्याद्यनुष्ठेयधर्माणा प्रपञ्चनम् ४४
आचार्येषु विद्यमानसुचरितानामेव ग्रहण न तद्भिन्नानामित्याद्युप यास ४५
उक्तोपदेशस्य वेदरहस्यार्थत्वादिप्रतिपादनम् ४६
उक्तोपनिषत्सिद्धार्थतार्थ त्रिचारमुखेन दृढीकतु विचारारम्भ ४६
विदुष एव क्रमस्वधिकारदर्शनात्कर्मभ्य एव केवलेभ्यो मोक्ष इति पक्षमुद्भाव्य, नित्यत्वान्मोक्षस्य कर्माङ्गज्ञानस्य ब्रह्मविद्यायाश्चात्यन्तविलक्षणत्वादित्यादियुक्तिभिस्तद्ग्रथपाह ४७
विद्योपसर्जनेभ्य कर्मभ्य स्यान्मोक्ष इति पक्षमुत्थाप्य नित्यस्यारभ्यत्वानुपपत्तिरिति तन्निरसनम् ४८
विद्याकर्मणो समुच्चितयो स्या मोक्षसाधनत्वमिति शङ्कामुद्भाव्य विरुद्धधर्मवत्कर्तृकयोस्तयो समुच्चयासभव इत्यादियुक्तिभिस्तन्निरसनम् ४९
कर्मबोधकश्रुतीना गतिप्रदर्शनम् ५०
कर्मोपसर्जनविद्यात मोक्ष इत्याशङ्क्य विरोधादियुक्ति

भिस्तद्व्युदास ५१
कर्मणामुपयोगप्रदर्शनम् ५१
गृहस्थेतराश्रमाणामानर्थक्यमाशङ्क्य इतराश्रमप्रसिद्ध ब्रह्मचर्यादिश्रवणानुरोधेन तेषामपि विद्याया पर-परयोपयोग इत्यादियुक्तिभिस्तत्सार्थक्यम् ५१
श्रुतीना कर्मस्वधिकयत्नस्य प्रयोजनप्रदर्शनम् ५३
केवलविद्ययैव पर श्रेय इत्युपसहार ५३
अतीतविद्याप्राप्त्युपसर्गप्रशमनाथमुत्तरशान्तिपाठस्तदर्थस्य च व्याख्यातत्वम् ५४

ब्रह्मानन्दवल्ली ५५—१२२

शिष्यस्य वक्ष्यमाणपरविद्याविघ्नप्रशमनाय स्वस्याचार्यस्य च सामर्थ्यादिप्रार्थनम् ५७
वृत्तानुवादपूर्वक ब्रह्मानन्दवल्लीतात्पर्यार्थस्य सक्षेपेण कथनम् ५९
परविद्याश्रवणादिप्रवृत्तिसिद्ध्यर्थ परविद्याया अज्ञाननि वृत्ति प्रयोजनमिति सप्रपञ्च प्रदर्शनम् ५९
वक्ष्यमाणलक्षण ब्रह्म यो वेत्ति तस्य परब्रह्मप्राप्ति रिति सूत्ररूपप्रथमवाक्यार्थप्रदर्शनम् ५९
आप्नोतिशब्दस्य मुख्यार्थपरिग्रहे बाधकमुपन्यस्य दर्शनार्थत्वाङ्गीकारेण प्रकृतवाक्यार्थस्य सदृष्टान्तमुपन्यास ६०

प्रथमवाक्येन सूत्रितस्यानिर्धारितस्वरूपविशेषब्रह्मणो ल
क्षणादिप्रदर्शनार्थ उत्तरसदर्भ इत्यवतारणम् ८ १
'सत्य ज्ञानम्' इति सत्यादिपदानामेकविभक्त्यन्तत्वेन
विशेषणविशेष्यभावावगमाद्वेद्यब्रह्मविशेषणार्थत्वप्रद
र्शनम् ६ १
एकस्मिन्वस्तुनि विशेषणान्तरायोगात्कथमेषा विशेषण
विशेष्यभाव इत्याक्षिप्य लक्षणार्थत्वादेषा पदाना
लक्षणविशेषणयोश्च वैलक्षण्यादिति तत्समाधानम् ६ २
पुनर्विशेषणविशेष्यभावपक्षमवलम्ब्य सत्यादिपदार्थ या
ख्यानपूर्वक तेषा पदाना प्रत्येक व्यावच्छेद्यप्रदर्शनम् ६ २
'नान्यद्विजानाति' इति विशेषप्रतिषेधात्स्वात्मज्ञातृत्व
मुपक्षिप्य ब्रह्मणोऽपि ज्ञेयत्वे ज्ञातृत्वान्तराभावप्रसङ्गा
दिभिस्तन्निरस्य ज्ञानशब्दस्य भाव युत्पत्तिकत्वस
मर्थनम् ६ ३
सत्यादिपदाना यावृत्त्यर्थत्वे ब्रह्मणश्चाप्रसिद्धत्वाच्छ्रु
त्यार्थमेव सत्यादिवाक्यमित्याशङ्क्यैषा पदाना स्वा
र्थसमर्पणद्वारैव व्यावृत्त्यर्थत्वाद्ब्रह्मशब्दस्य च स्वार्थे
नैवार्थवत्त्वादिति तत्परिहार ६ ४
ब्रह्मात्मैक्ये शास्त्रतात्पर्यमुक्त्वा तदा आत्मनो ज्ञातृत्वप्र
सिद्ध्या ज्ञानपदस्य भावव्युत्पत्तिकत्वहानाशङ्कापूर्व
कमौपाधिकमेव ज्ञातृत्वमित्यादिना तत्समर्थनम् ६ ५
ज्ञानस्य नित्यत्वेऽपि सर्वज्ञत्वोपपत्तिसमर्थनम् ६ ६

सत्यज्ञानादिशब्दाना लक्षणावृत्त्या ब्रह्मलक्षकत्वोपन्यास ६६
न्यायप्राप्तस्य ब्रह्मण हृदाकाशस्थितगुहाया वेदनप्रकार
मुक्त्वा तस्य वेदितुर्ब्रह्मभूतस्य सर्वज्ञब्रह्मस्वरूपेण
युगपत्सवकामानुभव , इत्युपचारोक्त्या अद्वितीय
स्वात्मानन्दानुभवरूपफलप्रदर्शनम् ६७
'तस्माद्वा' इत्याद्युत्तरग्रन्थावतारणाय वृत्तानुवादपुर-
सरमनन्तपदार्थभूतत्रिविधपरिच्छेदराहित्यस्य वक्ष्य
माणसृष्टिवाक्यतात्पर्यविषयस्य सप्रपञ्च प्रदर्शनम्. ६९
'तस्माद्वा' इत्यादिसृष्टिवाक्यस्य पदश अर्थविवरणम् ७०
'स वा एष पुरुष' इति पुरुषग्रहणस्य तात्पर्यविवरणम् ७१
तस्य च पुरुषस्य विद्यया तरतमब्रह्मसक्रमणस्यह विव
क्षितत्वाद्ब्राह्मविशेषेषु प्रतिपन्नात्मभावस्य झटित्या
तरतमप्रवर्तनमशक्यमिति पतिपात्तसौकर्याय कोश
पञ्चकोप न्यास इति तात्पर्यवर्णनम् ७२
प्राप्तमिदमन्नमयकोशमुप गस्य तस्य सर्वभूतकारणत्वा
दिलिङ्गप्रदर्शनपूर्वकमन्न ब्रह्मेति विजानत सर्वान्न
प्राप्तिफलप्रदर्शनम् ७४
एवमन्नमयादन्य तरप्राणमयकोशोप न्यास ७५
एव क्रमेण मनोमयादिकोशोपन्यास ७९
ततोऽ यन्य तरस्यान दमयकोशस्याब्रह्मत्व सप्रपञ्चमु
क्त्वा तदीयपुच्छमिव प्रतिपाद्यमानस्य ब्रह्मण प्र
कृतस्येह प्राधान्येन प्रतिपादनम् ८६

ब्रह्मणोऽसत्त्वशङ्कामुद्भाव्यासद्रूपेण वेदननिरसनपूर्वक स
दिति प्रतिपत्तव्यत्वम् ९०
किं विद्वानेव ब्रह्म प्राप्नोति, उताविद्वानपीत्यादिप्रश्नप्र-
दर्शनपूर्वक तत्समाधानतया ब्रह्म सद्रूपमेवेत्यादिप्रद
र्शनम् ९१
ब्रह्मणोऽचेतनत्वशङ्का व्यावृत्त्यर्थं स्वत एवकामयितृत्वाप या
सपूर्वकजगत्सृष्ट्युप यास ९४
प्रवेशवाक्यस्य तात्पर्यं दर्शयितुं विस्तरेण विचारमुपक्र
म्य मतान्तरप्रदर्शनपुर सर प्रकृता त करणगुहानिहि
तत्वमेव प्रवेश इति समर्थनम् ९५
मूर्तामूर्तसर्वविकारजात सदात्मक ब्रह्मात्मकमिति प्रदर्श्य
सद्रूपमेव ब्रह्मेति प्रकृतप्रश्नप्रतिवचनत्वेन निगमनम् ९९
ब्रह्मण सुकृतत्वरसरूपत्वादिनास्तित्वप्रदर्शनम् १०२
वातादीना स्वस्वकार्येषु भयपूर्वकनियतप्रवृत्त्या तत्प्रव
र्तकत्वाद्ब्रह्मास्तित्वम् १०८
साधनसपत्तिनिमित्तस्य सार्वभौमान दप्रभृतिहिरण्यग
र्भान दपर्यन्तस्थान दस्योत्तरोत्तरोत्कर्षप्रतिपादनेन ब्र
ह्मान दस्य निरतिशयसर्वोत्कृष्टत्वप्रतिपादनम् १०९
उपक्रान्तब्रह्मात्मैक्यस्योपसहार ११२
विद्वदविदुषो प्राप्त्यप्राप्तिविषयप्रश्नव्याख्यारम्भ ११४
सप्रपञ्चमुपसक्रमणशब्दार्थविचारपूर्वक ब्रह्मस्वरूपविज्ञा
नमेवोपसक्रमणमिति समर्थनम् ११५


वाङ्मनसागोचरब्रह्मविज्ञानवत कुतश्चन भयाभाव इति प्रकरणार्थसक्षेप १२१
पुण्याकरणपापक्रिये अविदुष इव विद्वास न तपत इति प्रदर्शनम् १२२
ब्रह्मान दवल्ल्यर्थोपसहार १२२

भृगुवल्ली १२३—१५०

वृत्तानुवादपूर्वकमुत्तरवल्लासन धकथनम् १२५
ब्रह्मजिज्ञासुना भृगुणा पृष्टेन वरुणेन ब्रह्मोपलब्धिसाध नान्नादीना ब्रह्मलक्षणस्य ब्रह्मण प्रतिपत्तव्यत्वस्य च उपदेश १२६
एनमुपदिष्टस्य भृगोस्तपोऽनुष्ठानमहिम्नान्न ब्रह्मेति ज्ञान मुपदिश्य पुन पितरमागत्य प्रष्टु तपसैव ब्रह्म वि जिज्ञासस्वेति प्रतिवचनम् १२९
एव क्रमण भृगोस्तपसव ब्रह्मज्ञानसपत्त्या ब्रह्मजिज्ञासो स्तपसोऽवश्यानुष्ठयत्वम् १३४
एवमुपदिष्टब्रह्मविद्याया ब्रह्मभावापत्त्यादिफलम् १३५
साधकस्यानुष्ठानाथ ब्रह्मविदो नियममभिधायान्नान्नाद रूपेण प्राणोपासन तत्फल च १३६
पृथि याकाशोपासकस्य बह्वन्नसग्रहमुक्त्वान्नदानस्य मा हात्म्यकथनम् १४०
वागादिषु ब्रह्मोपासनानि तत्फलानि च १४२

एवमध्यारोपमुक्त्वा श्रुत्युपपत्त्यादिना ब्रह्मणोऽससारि-
त्वमेकत्व चेत्यपवादप्रदर्शनम् १४५
ब्रह्मैकत्वविज्ञानवतोऽन्नमयादिक्रमेणानन्दमयोपसक्रमण
पूर्वक ब्रह्मज्ञानफलीभूतकृतार्थतारव्यापनाय सर्वात्म
कब्रह्मरूपसामगानप्रदर्शनम् १४७
तल्लीद्वयतात्पर्यार्थनिगमनम् १५०





श नो मित्र श वरुण । श नो भवत्वर्यमा । श न इन्द्रो बृहस्पति । श नो विष्णुरुरुक्रम. । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्ष ब्रह्मासि । त्वामेव प्रत्यक्ष ब्रह्म वदिष्यामि । ऋत वदिष्यामि । सत्य वदिष्यामि । तन्मामवतु तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ॥

ॐ शान्ति शान्ति शान्ति ॥


तैत्तिरीयोपनिषद्भाष्यम्
शीक्षावल्ली



Gourishunker Ganeriwala

॥ तैत्तिरीयोपनिषत् ॥

श्रीमच्छंकरभगवत्पादविरचितेन

भाष्येण सहिता ।

॥ ॐ नमः परमात्मने ॥

यस्माज्जात जगत्सर्व यस्मिन्नेव प्रलीयते ।
येनेद धार्यते चैव तस्मै ज्ञानात्मने नमः ॥ १ ॥

यैरिमे गुरुभि पूर्व पदवाक्यप्रमाणत ।
व्याख्याता सर्ववदा तास्तान्नित्य प्रणतोऽस्म्यहम् ॥ २ ॥

तैत्तिरीयकसारस्य मयाचार्यप्रसादत ।
विस्पष्टार्थरुचीना हि व्याख्येय सम्प्रणीयते ॥ ३ ॥

शीक्षावल्ली ॥



त्यान्यधिगतानि कर्माणि उपात्तदुरितक्षयार्थानि, काम्यानि च फलार्थिना पूर्वस्मिन्ग्रन्थे । इदानीं कर्मोपादानहतुपरिहाराय ब्रह्मविद्या प्रस्तूयते । कर्महेतु काम स्यात्, प्रवर्तकत्वात् । आप्तकामाना हि कामाभावे स्वात्मन्यवस्थानात्प्रवृत्त्यनुपपत्ति । आत्मकामत्वे चाप्तकामता । आत्मा च ब्रह्म । तद्विदो हि परप्राप्ति वक्ष्यति । अत अविद्यानिवृत्तौ स्वात्मन्यवस्थान परप्राप्ति, 'अभय प्रतिष्ठा विन्दते' 'एतमानन्दमयमात्मानमुपसक्रामति' इत्यादिश्रुते । काम्यप्रतिषिद्धयोरनारम्भात आरब्धस्य च उपभोगन क्षयात् नित्यानुष्ठानेन च प्रत्यवायाभावात अयत्नत एव स्वात्मन्यवस्थान मोक्ष । अथवा, निरतिशयाया प्रीत स्वर्गशब्दवाच्याया कर्महतुत्वात्कर्मभ्य एव मोक्ष इति चेत्, न, कर्मानेकत्वात् । अनेकानि हि आरब्धफलानि अनारब्धफलानि च अनेकजन्मान्तरकृतानि विरुद्धफलानि कर्माणि सभवन्ति ।

अत तेष्वनारब्धफलानामेकस्मिञ्जन्मन्युपभोगेन क्षयास भवात् शेषकर्मनिमित्तशरीरारम्भोपपत्ति । कर्मशेषसद्भाव-सिद्धिश्च 'तद्य इह रमणीयचरणा' 'तत शेषेण' इत्यादि-श्रुतिस्मृतिशतेभ्य । इष्टानिष्टफलानामनारब्धाना क्षयार्थानि नित्यानि इति चेत्, न, अकरणे प्रत्यवायश्रवणात् । प्रत्यवा-यशब्दो हि अनिष्टविषय । नित्याकरणनिमित्तस्य प्रत्यवाय स्य दु खरूपस्य आगामिन परिहारार्थानि नित्यानीत्यभ्युपग-मात् न अनारब्धफलकर्मक्षयार्थानि । यदि नाम अनारब्ध-फलकर्मक्षयार्थानि नित्यानि कर्माणि, तथाप्यशुद्धमेव क्षप-ययु , न शुद्धम्, विरोधाभावात् । न हि इष्टफलस्य कर्मण शुद्धरूपत्वान्नित्यैर्विरोध उपपद्यते । शुद्धाशुद्धयोर्हि विरोधो यु-क्त । न च कर्महेतूना कामाना ज्ञानाभावे निवृत्त्यसभवाद-शेषकमक्षयोपपत्ति । अनात्मविदो हि काम , अनात्मफल-विषयत्वात् । स्वात्मनि च कामानुपपत्ति , नित्यप्राप्तत्वात् । स्वय चात्मा पर ब्रह्मत्युक्तम् । नित्याना च अकरणमभाव तत प्रत्यवायानुपपत्तिरिति । अत पूर्वोपचितदुरितेभ्य प्रा-प्यमाणाया प्रत्यवायक्रियाया नित्याकरण लक्षणमिति शतृ प्रत्ययस्य नानुपपत्ति —'अकुर्वन्विहित कर्म' इति । अन्य-था हि अभावाद्भावोत्पत्तिरिति सर्वप्रमाणव्याकोप इति ।

अत अयत्नत स्वात्मन्यवस्थानमित्यनुपपन्नम् । यच्चोक्त निरतिशयप्रीत स्वर्गशब्दवाच्याया कर्मनिमित्तत्वात्कर्मारभ्य एव मोक्ष इति, तन्न, नित्यत्वान्मोक्षस्य । न हि नित्य किंचिदारभ्यते, लोके यदारब्धम, तदनित्यमिति । अतो न कर्मारभ्यो मोक्ष । विद्यासहिताना कर्मणा नित्यारम्भसामर्थ्यमिति चेत्, न, विरोधात् । नित्य चारभ्यत इति विरुद्धम् । यद्धि नष्टम्, तदेव नोत्पद्यत इति प्रध्वसाभाववन्नित्योऽपि मोक्ष आरभ्य एवेति चेत, न, मोक्षस्य भावरूपत्वात् । प्रध्वसाभावोऽप्यारभ्यत इति न सभवति, अभावस्य विशेषाभावाद्विकल्पमात्रमेतत् । भावप्रतियोगी ह्यभाव । यथा ह्यभिन्नोऽपि भावो घटपटादिभिर्विशेष्यते भिन्न इव घटभाव पटभाव इति, एव निर्विशेषोऽप्यभाव क्रियागुणयोगाद्द्रव्यादिवद्विकल्प्यते । न ह्यभाव उत्पलादिवद्विशेषणसहभावी । विशेषणवत्त्वे भाव एव स्यात् । विद्याकर्मकर्तुर्नित्यत्वात् विद्याकर्मसतानजनितमोक्षनित्यत्वमिति चेत, न, गङ्गास्रोतोवत्कर्तृत्वस्य दुःखरूपत्वात्, कर्तृत्वोपरम च मोक्षविच्छेदात् । तस्मादविद्याकामकर्मोपादानहेतुनिवृत्तौ स्वात्मन्यवस्थान मोक्ष इति । स्वय चात्मा ब्रह्म । तद्विज्ञानादविद्यानिवृत्तिरिति । अत ब्रह्मविद्यार्थोपनिषदारभ्यते । उप

निषदिति विद्योच्यते, तत्सेविना गर्भजन्मजरादिनिशातनात्, तदवसादनाद्वा ब्रह्मण उपनिगमयितृत्वात्, उपनिषण्ण वा अस्या पर श्रेय इति । तदर्थत्वाद्ग्रन्थोऽप्युपनिषत् ॥

ॐ श नो मित्र. श वरुण' । श नो भवत्वर्यमा । श न इन्द्रो बृहस्पतिः । श नो विष्णुरुरुक्रम । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्ष ब्रह्मासि । त्वामेव प्रत्यक्ष ब्रह्म वदिष्यामि । ऋत वदिष्यामि । सत्य वदिष्यामि । तन्माम-वतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ॥ ॐ शान्ति' शान्ति' शान्ति' ॥ १ ॥

इति प्रथमोऽनुवाकः ॥

श सुख प्राणवृत्तेरह्नश्चाभिमानी देवतात्मा मित्र न अस्माक भवतु । तथैव अपानवृत्ते रात्रेश्चाभिमानी देव तात्मा वरुण , चक्षुषि आदित्ये चाभिमानी अर्यमा, बले इन्द्र , वाचि बुद्धौ च बृहस्पति , विष्णु उरुक्रम विस्तीर्ण क्रम पादयोरभिमानी, एवमाद्या अध्यात्मदेवता श न ,

भवतु इति सर्वत्रानुषङ्ग । तासु हि सुखकृत्सु विद्याश्रवण-धारणोपयोगा अप्रतिबन्धेन भविष्यन्तीति तत्सुखकृत्त्व प्राप्यते— श नो भवतु इति । ब्रह्मविद्याविविदिषुणा नमस्कारब्रह्मवदनक्रिये वायुविषये ब्रह्मविघ्नोपसर्गशान्त्यर्थे क्रियेत— सर्वत्र क्रियाफलाना तदधीनत्वात । ब्रह्म वायु , तस्मै ब्रह्मणे नम प्रह्वीभावम , करोमीति वाक्यशेष । नम ते तुभ्य ह वायो नमस्करोमि इति परोक्षप्रत्यक्षाभ्या वायुरेवाभिधीयते । किं च, त्वमेव चक्षुरान्यपेक्ष्य बाह्य सनिकृष्टम व्यवहित प्रत्यक्ष ब्रह्मासि यस्मात् , तस्मात त्वामव प्रत्यक्ष ब्रह्म वदिष्यामि , ऋत यथाशास्त्र यथाकर्तव्य बुद्धौ सुपरिनिश्चितमर्थं त्वदधीनत्वात त्वामेव वक्ष्यामि , सत्यमिति स एव वाक्कायाभ्या सपाद्यमान , सोऽपि त्वदधीन एव सपाद्यत इति त्वामेव सत्य वदिष्यमि । तत सर्वात्मक वाग्वाख्य ब्रह्म मयैव स्तुत सत् विद्यार्थिन माम अवतु विद्यासयोजनेन । तदेव ब्रह्म वक्तारम आचार्यं च वक्तृत्व-सामर्थ्यसयोजनेन अवतु । अवतु माम अवतु वक्तारम इति पुनर्वचनमादरार्थम् । शान्ति शान्ति शान्ति इति त्रिर्वचनम् आध्यात्मिकाधिभौतिकाधिदैविकाना विद्याप्राप्त्युपसर्गाणा प्रशमनार्थम् ॥

इति प्रथमानुवाकभाष्यम् ॥

द्वितीयोऽनुवाकः ॥

अर्थज्ञानप्रधानत्वादुपनिषद ग्रन्थपाठे यत्नोपरमो मा भूदिति शीक्षाध्याय आरभ्यते—

शीक्षा व्याख्यास्याम । वर्णः स्वरः । मात्रा बलम् । साम सतानः । इत्युक्तः शीक्षाध्याय ॥ १ ॥

इति द्वियीयोऽनुवाक ॥

शिक्षा शिक्ष्यते अनयेति वर्णाद्युच्चारणलक्षणम्, शिक्ष्यन्ते अस्मिन इति वा शिक्षा वर्णादय । शिक्षैव शीक्षा । दैर्घ्य छा दसम । ता शीक्षा व्याख्यास्याम विस्पष्टम् आ समन्तात्प्रकथयिष्याम । चक्षिङ ख्याञादिष्टस्य व्याङ्पूर्वस्य व्यक्तवाक्कर्मण एतद्रूपम । तत्र वर्ण अकारादि । स्वर उदात्तादि । मात्रा ह्रस्वाद्या । बल प्रयत्नविशेष । साम वर्णाना मध्यमवृत्त्योच्चारण समता । सतान सतति, सहितेत्यर्थ । एव शिक्षितव्योऽर्थ शिक्षा यस्मिन्नध्याये, सोऽय शीक्षाध्याय इति एवम उक्त उदित । उक्त इत्युपसहारार्थ ॥

इति द्वितीयानुवाकभाष्यम् ॥

तृतीयोऽनुवाक ॥

सह नौ यश । सह नौ ब्रह्मवर्च
सम् । अथात स᳚हिताया उपनिषद
व्याख्यास्याम । पञ्चस्वधिकरणेषु । अधि
लोकमधिज्यौतिषमधिविद्यमधिप्रजमध्या
त्मम् । ता महास᳚हिता इत्याचक्षते ।
अथाधिलोकम् । पृथिवी पूर्वरूपम् । द्यौरु
त्तररूपम् । आकाश. सधि. ॥ १ ॥

अधुना सहितोपनिषदुच्यते । तत्र सहिताद्युपनिषत्प-
रिज्ञाननिमित्त यत् यश प्राप्यते, तत् नौ आवयो शिष्या-
चार्ययो सहैव अस्तु । तन्निमित्त च यत् ब्रह्मवचस तेज ,
तच्च सहैवास्तु इति शिष्यवचनमाशी । शिष्यस्य हि अकृता-
र्थत्वात्प्राथनापपद्यते , नाचार्यस्य, कृतार्थत्वात् । कृतार्थो ह्या-
चार्यो नाम भवति । अथ अनन्तरम् अध्ययनलक्षणवि-
धानस्य पूर्ववृत्तस्य, अत यतोऽत्यर्थ ग्रन्थभाविता बुद्धिर्न
शक्यते सहसार्थज्ञानविषयेऽवतारयितुमित्यत , सहिताया
उपनिषद सहिताविषय दर्शनमित्येतत् ग्रन्थसनिकृष्टामव

व्याख्यास्याम, पञ्चसु अधिकरणेषु आश्रयेषु, ज्ञानविष येष्वित्यर्थ । कानि तानीत्याह— अधिलोक लोकस्वधि यद्दर्शनम्, तदधिलोकम्, तथा अधिज्यौतिषम् अधि-विद्यम् अधिप्रजम् अध्यात्ममिति । ता एता पञ्च विषया उपनिषद् लोकादिमहावस्तुविषयत्वात्संहिताविषय-त्वाच्च महत्यश्च ता संहिताश्च महासंहिता इति आचक्षते कथयन्ति वेदविद् । अथ तासा यथोप यस्ताना मध्ये अधि-लोक दर्शनमुच्यते । दर्शनक्रमविवक्षार्थ अथशब्द सर्वत्र । प्रथिवी पूर्वरूपम्, पूर्वो वर्ण पूर्वरूपम्, संहिताया पूर्वे वर्णे प्रथिवीदृष्टि कर्तव्येत्युक्त भवति । तथा द्यौ उत्तररू पम् । आकाश अन्तारक्षलोक संधि मध्य पूर्वोत्तररूपयो संधीयते अस्मिन्पूर्वोत्तररूपे इति ॥

वायु संधानम् । इत्यधिलोकम् । अ-थाधिज्यौतिषम् । अग्नि पूर्वरूपम् । आ-दित्य उत्तररूपम् । आप संधिः । वैद्युत. संधानम् । इत्यधिज्यौतिषम् । अथाधि-विद्यम् । आचार्यः पूर्वरूपम् ॥ २ ॥

अन्तेवास्युत्तररूपम् । विद्या संधि

प्रवचनꣳसधानम् । इत्यधिविद्यम् । अथाधिप्रजम् । माता पूर्वरूपम् । पितोत्तररूपम् । प्रजा सधि । प्रजननꣳसधानम् । इत्यधिप्रजम् ॥ ३ ॥

अथाध्यात्मम् । अधरा हनु' पूर्वरूपम् । उत्तरा हनुरुत्तररूपम् । वाक्सधि । जिह्वा सधानम् । इत्यध्यात्मम् । इतीमा महासꣳहिता । य एवमेता महासꣳहिता व्याख्याता वेद । सधीयते प्रजया पशुभि । ब्रह्मवर्चसेनान्नाद्येन सुवर्गेण लोकेन ॥ ४ ॥

इति तृतीयोऽनुवाकः ॥

वायु सधानम् । सधीयते अनेनेति सधानम् । इति अधिलोक दर्शनमुक्तम् । अथाधिज्यौतिषम् इत्यादि समानम् । इतीमा इति उक्ता उपप्रदर्श्यन्ते । य कश्चित् एवम् एता महासहिता व्याख्याता वेद उपास्ते, वेदेत्युपासन स्यात्, विज्ञानाधिकारात्, 'इति प्राचीनयोग्योपास्स्व' इति

च वचनात् । उपासन च यथाशास्त्र तुल्यप्रत्ययसततिरस कीर्णा च अतत्प्रत्ययै शास्त्राक्तालम्बनविषया च । प्रसिद्ध श्चोपासनश दार्थो लोक— 'गुरुमुपास्ते' 'राजानमुपास्ते' इति । या हि गुवादीन्सततमुपचरति, स उपास्त इत्यु-च्यते । स च फलमाप्नात्युपासनस्य । अत अत्रापि य एव वेद, सधीयत प्रजादिभ स्वर्गान्तै । प्रजादिफल प्राप्नो-तीत्यर्थ ॥

इति तृतीयानुवाकभाष्यम् ॥



चतुर्थोऽनुवाक ॥

यश्छन्दसामृषभो विश्वरूप । छन्दोभ्योऽध्यमृतात्सबभूव । स मेन्द्रो मेधया स्पृणोतु । अमृतस्य देव धारणो भूयासम् । शरीर मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्या भूरि विश्रुवम् । ब्रह्मण कोशोऽसि मेधया पिहित । श्रुत मे गोपाय । आवहन्ती वितन्वाना ॥ १ ॥

कुर्वाणाचीरमात्मन । वासाꣳसि मम गावश्च । अन्नपाने च सर्वदा । ततो मे श्रियमावह । लोमशा पशुभि सह स्वाहा । आमायन्तु ब्रह्मचारिण स्वाहा । विमायन्तु ब्रह्मचारिण स्वाहा । प्रमायन्तु ब्रह्मचारिण. स्वाहा । दमायन्तु ब्रह्मचारिण. स्वाहा । शमायन्तु ब्रह्मचारिणः स्वाहा ॥ २ ॥

यशो जनेऽसानि स्वाहा । श्रेयान् वस्य-
सोऽसानि स्वाहा । त त्वा भग प्रविशा-
नि स्वाहा । स मा भग प्रविश स्वाहा ।
तस्मिन्सहस्रशाखे । निभगाहं त्वयि मृजे
स्वाहा । यथाप' प्रवता यन्ति । यथा मासा
अहर्जरम् । एव मा ब्रह्मचारिण । धात-
रायन्तु सर्वतः स्वाहा । प्रतिवेशोऽसि प्र
मा पाहि प्र मा पद्यस्व ॥ ३ ॥

इति चतुर्थोऽनुवाक ॥

यश्छन्दसामिति मेधाकामस्य श्रीकामस्य च तत्प्राप्ति राधन जपहोमावुच्येते, 'स मेन्द्रो मेधया स्पृणोतु' 'ततो मे श्रियमावह' इति च लिङ्गदर्शनात । य छन्दसा वेदा नाम् ऋषभ इव ऋषभ , प्राधान्यात । विश्वरूप सर्वरूप , सर्ववाग्यात्मे 'तद्यथा शङ्कुना सर्वाणि पर्णानि सतृण्णान्ये वमोंकारेण सर्वा वाक्सतृण्णोंकार एवेद सवम्' इत्यादि श्रुत्यन्तरात् । अत एव ऋषभत्वमोंकारस्य । ओकारो ह्यत्रोपास्य इति ऋषभादिशब्दै स्तुतिर्न्याय्यैव ओकारस्य । छन्दोभ्य

मदभ्य यत्ना ह्यमृतम, तस्मात् अमृताद् अपि सब-
भूत लोकत्रयवत्त्याहृतिभ्य सारिष्ठ जिघृक्षा प्रजापत
रात्मस्थत आकार सारिष्ठत्वेन लक्ष्यभादित्यर्थ । न हि
नित्यस्य आकारस्य अन्यसैवात्पत्तिरुपकल्पते । स एवभूत
ओकार इन्द्र सवकामश परमेश्वर मा मा मवया प्रज्ञया
रयणोतु प्रीणयतु, वर्धयतु वा, प्रज्ञाबल हि गार्ग्यत । अमृ-
तस्य अमृतत्वहतुभूतस्य ब्रह्मज्ञानस्य, तदधिकारात्, ह दव
धारण धारयिता भूयास भवेयम । कि च, शरीर म मम
विचर्षण विचक्षण योग्यमित्यतत, भूयादिति प्रथमपुरुष-
त्रिपरिणाम । जिह्वा म मम मधुमत्तमा मधुमती, अति-
शयेन मधुरभाषिणीत्यथ । कर्णाभ्या श्रोत्राभ्या भूरि बहु
विश्रुव व्यश्नुवम, श्राता भूयासमित्यथ । आत्मज्ञानया य
कायकरणसघाताऽस्तीति वाक्यार्थ । मेधा च तदर्थमेव हि
प्रार्थ्यते—ब्रह्मण परमात्मन कोश असि अन्नमिव, उप
लब्ध्यधिष्ठानत्वात्, त्व ह ब्रह्मण प्रतीकम, त्वयि ब्रह्मा
पलभ्यत । मधया लौकिकप्रज्ञया पिहित आच्छादित स
त्व सामान्यप्रज्ञैरविदिततत्त्व इत्यथ । श्रुत श्रवणपूर्वकमा-
त्मज्ञानादिक विज्ञान मे गोपाय रक्ष, तत्प्राप्त्यविस्मरणा-
दिक कुर्वित्यथ । जपाथा एते मन्त्रा मधाकामस्य । श्रीका-

मस्य होमार्थास्त्वधुनोच्यन्ते मन्त्रा — आवहन्ती आनयन्ती, वितन्वाना विस्तारयन्ती, तनोतेस्तत्कर्मकत्वात्, कुर्वाणा निर्वर्तयन्ती अचीरम् अचिर क्षिप्रमेव, छान्दसो दीर्घ , चिर वा, कुर्वाणा, आत्मन मम, किमित्याह— वासासि वस्त्राणि, मम, गावश्च गाश्चेति यावत, अन्नपाने च सर्वदा, एवमादीनि कुर्वाणा श्रीर्या, ता तत मेधानिर्वर्तनात्परम् आवह आनय, अमेधसो हि श्रीरनर्थायैवेति । किंविशिष्टाम् ? लोमशाम् अजाव्यादियुक्ताम् अन्यैश्च पशुभि सह युक्ताम् आवहेति । अधिकारादोकार एवाभिसबध्यते । स्वाहा, स्वाहाकारो होमार्थमन्त्रान्तज्ञापनार्थ । आमायन्त्विति । आयन्तु, मामिति व्यवहितेन सबन्ध , ब्रह्मचारिण । विमायन्तु प्रमायन्तु दमायन्तु शमायन्तु इत्यादि । यशोजन यशस्विजनेषु असानि भवानि । श्रेयान प्रशस्यतर , वस्यस प्रसीयस वसुतराढ्यसुमत्तराढ्या धनवज्जातीयपुरुषाद्विशेषवानहमसानीत्यर्थ । किं च, त ब्रह्मण कोशभूत त्वा त्वा ह भग भगवन पूजार्ह, प्रविशानि । प्रविश्य चानन्यस्त्वदात्मैव भवानीत्यर्थ । स त्वमपि मा मा भग भगवन , प्रविश , आवयोरेकात्मत्वमेवास्तु । तस्मिन त्वयि सहस्रशाखे बहुशाखाभेदे हे भगवन , निमृजे शोधयामि

अह पापकृत्याम् । यथा लोक आप प्रवता प्रवणवता निम्न वता देशेन यन्ति गच्छन्ति, यथा च मासा अहर्जरम्, मवत्सराऽहर्जर अहाभि परिवतमानो लोकाञ्जरयतीति, अहानि वा अस्मिन जीयन्ति अन्तभवन्तीत्यहर्जर, त च यथा मासा यन्ति, एव मा ब्रह्मचारिण हे धात सर्वस्य विधात, माम् आयन्तु आगच्छन्तु सर्वत सर्वदि-ग्भ्य । प्रतिवेश श्रमापनयनस्थानम् आसन्न गृहमित्यर्थ । एव त्व प्रतिवेश इव प्रातेवश त्वच्छीलिना सर्वपापदु खापन यनस्थानमसि । अत मा मा प्रति प्रभाहि प्रकाशयात्मानम्, प्र मा पद्यस्व प्रपद्यस्व च माम् । रसविद्धमिव लोह त्वन्मय त्वदात्मान कुर्वित्यर्थ । श्रीकामोऽस्मिन्विद्याप्रकरण अभिधी यमाना धनाथ, धन च कर्मार्थम्, कर्म च उपात्तदुरित क्षयार्थम्, तत्क्षय हि विद्या प्रकाशते । तथा च स्मृति — 'ज्ञानमुत्पद्यते पुसा क्षयात्पापस्य कर्मण । यथादर्शतले प्रख्ये पश्यत्यात्मानमात्मनि' इति ॥

इति चतुर्थानुवाकभाष्यम् ॥



पञ्चमोऽनुवाक ॥

भूर्भुव सुवरिति वा एतास्तिस्रो व्याहृतय.। तासामु ह स्मैता चतुर्थीम्। माहाचमस्य प्रवेदयते। मह इति। तद्ब्रह्म। स आत्मा। अङ्गान्यन्या देवता। भूरिति वा अय लोक.। भुव इत्यन्तरिक्षम्। सुवरित्यसौ लोक ॥ १ ॥

मह इत्यादित्य। आदित्येन वाव सर्वे लोका महीयन्ते। भूरिति वा अग्नि। भुव इति वायु'। सुवरित्यादित्य। मह इति चन्द्रमा। चन्द्रमसा वाव सर्वाणि ज्योतीꣳषि महीयन्ते। भूरिति वा ऋच। भुव इति सामानि। सुवरिति यजूꣳषि ॥ २ ॥

मह इति ब्रह्म। ब्रह्मणा वाव सर्वे वेदा महीयन्ते। भूरिति वै प्राण। भुव

**इत्यपान' । सुवरिति व्यान' । मह इत्यन्न-
म् । अन्नेन वाव सर्वे प्राणा महीयन्ते । ता
वा एताश्चतस्रश्चतुर्धा । चतस्रश्चतस्रो व्या-
हृतय' । ता यो वेद । स वेद ब्रह्म । सर्वे-
ऽस्मै देवा बलिमावहन्ति ॥ ३ ॥**

इति पञ्चमोऽनुवाक' ॥

सहितविषयमुपासनमुक्तम् । तदनु मेधाकामस्य श्रीका मस्य चानुक्रान्ता मन्त्रा । ते च पारम्पर्येण विद्योपयोगाथा एव । अनन्तर व्याहृत्यात्मनो ब्रह्मण अन्तरुपासन स्वाराज्यफल प्रस्तूयते— भूर्भुव सुवरिति । इतीत्युक्तोपप्रदर्श नार्थ । एतास्तिस्र इति च प्रदर्शिताना परामर्शार्थ परामृष्टा स्मर्यन्ते वै इत्यनेन । तिस्र एता प्रसिद्धा व्याहृतय स्मर्यन्त इति यावत् । तासाम् इय चतुर्थी व्याहृतिमह इति, तामेता चतुर्थी महाचमसस्यापत्य माहाचमस्य प्रवेदयते, उ ह स्म इत्येतेषा वृत्तानुकथनार्थत्वात् विदितवान् ददर्शेत्यर्थ । माहाचमस्यग्रहणमार्षानुस्मरणार्थम् । ऋष्यनुस्मरणमप्युपासनाङ्गमिति गम्यते, इहोपदेशात् । येय माहाचमस्येन दृष्टा व्याहृति मह इति, तत् ब्रह्म । महद्धि ब्रह्म, महश्च

व्याहृति । किं पुनस्तत् ? स आत्मा, आप्नोतेर्व्याप्निकर्मण आत्मा, इतराश्च व्याहृतयो लोका देवा वेदा प्राणाश्च मह इत्यनन व्याहृत्यात्मना आदित्यचन्द्रब्रह्मान्नभूतेन व्याप्यन्ते यत, अत अङ्गान अवयवा अन्या देवता । देवताग्रहण मुपलक्षणार्थं लोकादीनाम् । मह इत्यस्य व्याहृत्यात्मनो देवा लोकादयश्च सर्वे अवयवभूता यत अत आह— आदित्यादिभिर्लोकादयो महीयन्त इति । आत्मना ह्यङ्गानि महीयते । महन वृद्धि उपचय । महीयन्ते वर्धन्त इत्यर्थ । अय लाक अग्नि ऋग्वेद प्राण इति प्रथमा व्याहृति भू, अन्तरिक्ष वायु सामानि अपान इति द्वितीया व्याहृति भुव, असौ लोक आदित्य यजूंषि व्यान इति तृतीया व्याहृति सुव, आदित्य च द्रमा ब्रह्म अन्नम् इति चतुर्थी व्याहृति मह इत्येवम् एकैकाश्चतुर्धा भवन्ति । मह इति ब्रह्म ब्रह्मेत्योकार, शन्दाधिकारे अन्यस्यासभवात् । उक्तार्थमन्यत् । ता वा एताश्चतस्रश्चतुर्धेति । ता वै एता भूभुव सुवर्मह इति चतस्र एकैकश चतुर्धा चतु प्रकारा । धा शब्द प्रकारवचन । चतस्रश्चतस्र सत्य चतुर्धा भवन्तीत्यर्थ । तासा यथाक्लप्राना पुनरुपदेशस्तथैवोपासननि यमाथ । ता यथोक्ता व्याहृती य वेद, स वेद विजा-

नाति । किं तत् ? ब्रह्म । ननु, 'तद्ब्रह्म स आत्मा' इति ज्ञात ब्रह्मणि, न वक्तव्यमविज्ञातवत् 'स वेद ब्रह्म' इति, न, तद्विशेषविवक्षुत्वाददोष । सत्य विज्ञात चतुर्थव्याहृत्या आत्मा ब्रह्मेति, न तु तद्विशेष — हृदयान्तरुपलभ्यत्व मनोमयत्वादिश्च । 'शान्तिसमृद्धम्' इत्येवमन्तो विशेषण-विशषरूपो धर्मपूगो न विज्ञायत इति, तद्विवक्षु हि शास्त्र-मविज्ञातमिव ब्रह्म मत्वा 'स वेद ब्रह्म' इत्याह । अतो न दाष । यो वा वक्ष्यमाणेन धर्मपूगेण विशिष्ट ब्रह्म वेद, स वन् ब्रह्म इत्यभिप्राय । अतो वक्ष्यमाणानुवाकेनैकवाक्यता अस्य, उभयोह्यनुवाकयोरेकमुपासनम । लिङ्गाच्च । भूरि त्यग्नौ प्रतितिष्ठति' इत्यादिक लिङ्गमुपासनैकत्वे । विधाय-काभावाच्च । न हि वेद उपासीत वेति विधायक कश्चिच्छ-ब्दोऽस्ति । व्याहृत्यनुवाके 'ता या वद' इति तु वक्ष्यमा णार्थत्वान्नोपसनाभेदक । वक्ष्यमाणार्थत्व च तद्विशेषविव-क्षुत्वादित्यादेनोक्तम । सर्वे देवा अस्मै एवविदुषे अञ्ज-भूता आवहन्ति आनयन्ति बालेम, स्वाराज्यप्राप्तौ सत्या-मित्यर्थ ॥

इति पञ्चमानुवाकभाष्यम् ॥

षष्ठोऽनुवाक ॥

स य एषोऽन्तर्हृदय आकाश । तस्मिन्नय पुरुषो मनोमय. । अमृतो हिरण्मय. । अन्तरेण तालुके । य एष स्तन इवावलम्बते । सेन्द्रयोनि । यत्रासौ केशान्तो विवर्तते । व्यपोह्य शीर्षकपाले । भूरित्यग्नौ प्रतितिष्ठति । भुव इति वायौ ॥ १ ॥

सुवरित्यादित्ये । मह इति ब्रह्मणि । आप्नोति स्वाराज्यम् । आप्नोति मनसस्पतिम् । वाक्पतिश्चक्षुष्पति । श्रोत्रपतिर्विज्ञानपति' । एतत्ततो भवति । आकाशशरीर ब्रह्म । सत्यात्म प्राणाराम मन आनन्दम् । शान्तिसमृद्धममृतम् । इति प्राचीनयोग्योपास्स्व ॥ २ ॥

इति षष्ठोऽनुवाक ॥

भूर्भुव सुव स्वरूपा मह इत्येतस्य हिरण्यगर्भस्य व्याहृत्यात्मना ब्रह्मणोऽङ्गान्यन्या देवता इत्युक्तम् । यस्य ता अङ्गभूता, तस्यैतस्य ब्रह्मण साक्षादुपलब्ध्यर्थमुपासनार्थं च हृदयाकाश स्थानमुच्यते, सालग्राम इव विष्णो । तस्मिन्हि तद्ब्रह्म उपास्यमान मनोमयत्वादिधर्मविशिष्ट साक्षादुपलभ्यत, पाणाविवामलकम् । मार्गश्च सवात्मभाव प्रतिपत्तये वक्तव्य इत्यनुवाक आरभ्यते—स इति व्युत्क्रम्य अय पुरुष इत्यनन सबध्यत । य एष अन्तर्हृदये हृदय स्यान्त । हृन्यमिति पुण्डरीकाकारो मासपिण्ड प्राणायतनोऽनकनाडीसुषिर ऊर्ध्वनालोऽधोमुखो विशस्यमान पशौ प्रसिद्ध उपलभ्यत । तस्यान्त य एष आकाश प्रसिद्ध एव करकाकाशवा, तस्मिन सोऽय पुरुष, पुरि शयनात्, पूर्णो वा भूरान्यो लाका यनेति पुरुष मनोमय मन विज्ञान मनुतेर्ज्ञानकमण, तन्मय तत्प्राय, तदुपलभ्यत्वात् । मनुते अनेनेति वा मन अन्त करणम्, तदभिमानी तन्मय, तल्लिङ्गो वा । अमृत अमरणधर्मा । हिरण्मय ज्योतिर्मय । तस्यैवलक्षणस्य हृदयाकाश साक्षात्कृतस्य विदुष आत्मभूतस्य इश्वररूपस्य प्रतिपत्तय मार्गोऽभिधीयते—हृदयादूर्ध्वं प्रवृत्ता सुषुम्ना नाम नाडी योगशास्त्रेषु

प्रसिद्धा । सा च अन्तरेण तालुके मध्ये तालुकयोगता । यश्च एष तालुकयोर्मध्ये स्तन इव अवलम्बत मासखण्ड, तस्य च अन्तरेण इत्येतत् । यत्र च असौ केशान्त केशानामन्तो मूल केशान्त विवर्तत विभागेन वर्तत, मूर्धप्रदेश इत्यर्थ, त देश प्राप्य तेनान्तरेण व्यपोह्य विभज्य विदार्य शीषकपाले शिर कपाले, विनिर्गता या, सा इन्द्रयोनि इन्द्रस्य ब्रह्मण योनि मार्ग, स्वरूपप्रतिपत्तिद्वारमित्यर्थ । तथा एव विद्वान्मनोमयात्मदर्शी मूर्ध्नो विनिष्क्रम्य अस्य लोकस्याधिष्ठाता भूरिति व्याहृतिरूपो योऽग्नि महतो ब्रह्मणोऽङ्गभूत, तस्मिन अग्नौ प्रतितिष्ठति, अग्न्यात्मना इम लोक व्याप्नोतीत्यर्थ । तथा भुव इति द्वितीयव्याहृत्यात्मनि वायौ, प्रतितिष्ठतीत्यनुवतते । सुवरिति तृतीयव्याहृत्यात्मनि आदित्ये । मह इत्याङ्गनि चतुर्थव्याहृत्यात्मनि ब्रह्मणि प्रतितिष्ठतीति । तष्वात्मभावन स्थित्वा आप्नोति ब्रह्मभूत स्वाराज्य स्वराडभाव स्वयमेव राजा अधिपतिर्भवति अङ्गभूताना देवताना यथा ब्रह्म, दवाश्च सर्वे अस्मै अङ्गिने बलिमावहन्ति अङ्गभूता यथा ब्रह्मणे । आप्नोति मनसस्पतिम्, सर्वेषा हि मनसा पति, सवात्मकत्वाद्ब्रह्मण सर्वैर्हि मनोभिस्तन्मनुते । तदाप्नोत्येव विद्वान । किं च, वाक्पति सर्वासा

वाचा पतिर्भवति । तथैव चक्षुष्पति चक्षुषा पति । श्रोत्र पति श्रोत्राणा च पति । विज्ञानपति विज्ञानाना च पति । सवात्मकत्वात्सर्वप्राणिना करणैस्तद्वान्भवतीत्यर्थ । किं च, ततोऽपि अधिकतरम् एतत् भवति । किं तत् ? उच्यते— आकाशशरीरम् आकाश शरीरमस्य, आकाशवद्वा सूक्ष्म शरीरमस्येत्याकाशशरीरम् । किं तत् ? प्रकृत ब्रह्म । सत्यात्म, सत्य मूर्तामूर्तम् अवितथ स्वरूप वा आत्मा स्वभावोऽस्य, तदिद सत्यात्म । प्राणारामम्, प्राणेष्वारमणमाक्रीडा यस्य तत्प्राणारामम्, प्राणाना वा आरामो यस्मिन, तत्प्राणारामम् । मन आनन्दम्, आनन्दभूत सुखकृदेव यस्य मन, तन्मन आन दम । शान्तिसमृद्धम शान्तिरूपशम, शान्तिश्च तत्समृद्ध च शान्तिसमृद्धम्, शान्त्या वा समृद्धवत्तदुपलभ्यत इति शान्तिसमृद्धम । अमृतम् अमरणधर्मि, एतच्चाधिकरणविशेषण तत्रैव मनोमय इत्यादौ द्रष्टव्यमिति । एव मनोमयत्वादिधर्मैर्विशिष्ट यथोक्त ब्रह्म हे प्राचीनयोग्य, उपास्स्व इत्याचार्यवचनोक्तिरादरार्था । उक्तस्तूपासनाशब्दार्थ ॥

इति षष्ठानुवाकभाष्यम् ॥

सप्तमोऽनुवाक ॥

पृथिव्यन्तरिक्ष द्यौर्दिशोऽवान्तरदिश । अग्निर्वायुरादित्यश्चन्द्रमा नक्षत्राणि । आप ओषधयो वनस्पतय आकाश आत्मा। इत्यधिभूतम् । अथाध्यात्मम् । प्राणो व्यानोऽपान उदान समान । चक्षु श्रोत्र मनो वाक् त्वक् । चर्म मा᳕स᳕ स्नावास्थि मज्जा । एतदधिविधाय ऋषिरवोचत् । पाङ्क्त वा इद᳕ सर्वम् । पाङ्क्तेनैव पाङ्क्त᳖ स्पृणोतीति ॥ १ ॥

इति सप्तमोऽनुवाक ॥

यदेतद्व्याहृत्यात्मक ब्रह्मोपास्यमुक्तम, तस्यैवेदानीं पृथिव्यादिपाङ्क्तस्वरूपेणोपासनमुच्यते— पञ्चसरत्वायोगात्पङ्क्ति च्छन्द मपक्ति , तत पाङ्क्तत्व सर्वस्य । पाङ्क्तश्च यज्ञ, 'पञ्चपदा पङ्क्ति पाङ्क्तो यज्ञ ' इति श्रुते । तेन यत्सर्व लोकाद्यात्मान्त च पाङ्क्त परिकल्पयति, यज्ञमेव तत्परिकल्प

यति । तन यज्ञन परिकल्पितन पाङ्क्तात्मक प्रजापतिमभि
ग्यपन्यत । तत्कथ पाङ्क्त वा इद सवमियत आह— प्रथिवी
अन्तरिक्ष द्यौ दिश अवान्तरदिश इति लोकपाङ्क्तम ।
अग्नि वायु आदित्य चन्द्रमा नक्षत्राणि इति दवतापा
ङ्क्तम । आप ओषधय वनस्पतय आकाश आत्मा इति
भूतपाङ्क्तम । आत्मति विराट, भूताधिकारात । इत्यधिभू-
तमिति अधिलोकाधिदैवतपाङ्क्तद्वयापलक्षणार्थम, लोकदव
तापाङ्क्तयोर्द्वयोश्चाभिहतत्वात । अथ अनन्तरम अध्यात्म
पाङ्क्तत्रयमुच्यत—प्राणादि वायुपाङ्क्तम । चक्षुरादि इन्द्रि-
यपाङ्क्तम । चर्मादि धातुपाङ्क्तम । एतावद्वीद सर्वमध्यात्म
बाह्य च पाङ्क्तमत्र इति एतत् एवम् अधिविधाय परिकल्प्य
ऋषि वेद एतद्दर्शनसपन्ना वा कश्चिदृषि, अवाचत उक्त-
वान । किमित्याह—पाङ्क्त वा इद सर्वं पाङ्क्तनैव आभ्या
त्मिकन, सख्यासामान्यात, पाङ्क्त बाह्य ग्रसणाति ग्रलयति
पूरयति एकात्मतयोपलभ्यत इत्येतत । एव पाङ्क्तमिद सर्व
मिति यो वद, स प्रजापत्यात्मैव भवतीत्यथ ॥

इति सप्तमानुवाकभाष्यम् ॥



अष्टमोऽनुवाक ॥

ओमिति ब्रह्म । ओमितीद्ꣳ सर्वम् । ओमित्येतदनुकृतिर्ह स्म वा अप्यो श्रावयेत्याश्रावयन्ति । ओमिति सामानि गायन्ति । ओꣳशोमिति शस्त्राणि शꣳसन्ति । ओमित्यध्वर्यु. प्रतिगर प्रतिगृणाति । ओमिति ब्रह्मा प्रसौति । ओमित्यग्निहोत्रमनुजानाति । ओमिति ब्राह्मण प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति । ब्रह्मैवोपाप्नोति ॥ १ ॥

इति अष्टमोऽनुवाक ॥

व्याहृत्यात्मनो ब्रह्मण उपासनमुक्तम् । अनन्तर च पाङ्क्तस्वरूपेण तस्यैवोपासनमुक्तम् । इदानीं सर्वोपासनाङ्गभूतस्य ओंकारस्योपासन विधित्सयते । परापरब्रह्मदृष्ट्या हि उपास्यमान ओंकार शब्दमात्रोऽपि परापरब्रह्म प्राप्तिसाधन भवति, स ह्यालम्बन ब्रह्मण परस्यापरस्य च,

प्रतिमेव विष्णा , ' एतेनैवायतनेनैकतरमन्वेति इति श्रुते । ओमिति, इतिशब्द स्वरूपपरिच्छेदार्थ , ॐ इत्येतच्छन्द-रूप ब्रह्म इति मनसा धारयेत उपासीत, यत ॐ इति इद सर्व हि शब्दस्वरूपमोकारेण व्याप्तम , ' तत्प्रथा शङ्कुना ' इति श्रुत्य तरात । ' अभिधानतन्त्र ह्यभिधेयम ' इत्यत इद सर्वमोकार इत्युच्यते । ओकारस्तुत्यर्थ उत्तरो ग्रन्थ , उपा-स्यत्वात्तस्य । ॐ इत्येतत् अनुकृति अनुकरणम । करोमि यास्यामि चेति कृतमुक्त ओमित्यनुकरोत्यन्य , अत ओका रोऽनुकृति । ह स्म वै इति प्रसिद्धार्थद्योतका । प्रसिद्ध ह्योकारस्यानुकृतित्वम । अपि च ओश्रावय इति प्रैषपूर्वमा-श्रावयन्ति प्रतिश्रावयन्ति । तथा ॐ इति सामानि गायन्ति सामगा । ॐ शोमिति शस्त्राणि शसन्ति शस्त्रशसितारोऽपि। तथा ॐ इति अध्वर्यु प्रतिगर प्रतिगृणाति । ॐ इति ब्रह्मा प्रसौति अनुजानाति । ॐ इति अग्निहोत्रम अनुजानाति जुहो-मीत्युक्त ॐ इत्यव अनुज्ञा प्रयच्छति । ॐ इत्येव ब्राह्मण प्रवक्ष्यन प्रवचन करिष्यन अध्येष्यमाण ओमित्याह ओ-मित्येव प्रतिपद्यते अध्येतुमित्यर्थ , ब्रह्म वेदम उपाप्नवानि इति प्राप्नुया ग्रहीष्यामीति उपाप्नोत्यव ब्रह्म । अथवा, ब्रह्म परमात्मानम् उपाप्नवानीत्यात्मान प्रवक्ष्यन प्रापयिष्यन ओ

मित्येवाह । स च तेनोकारेण ब्रह्म प्राप्नोत्येव । ओकार-पूर्वं प्रवृत्ताना क्रियाणा फलवत्त्व यस्मात्, तस्मादोकार ब्रह्मेत्युपासीतेति वाक्यार्थ ॥

इत्यष्टमानुवाकभाष्यम् ॥



नवमोऽनुवाक ॥


ऋत च स्वाध्यायप्रवचने च । सत्य च स्वाध्यायप्रवचने च । तपश्च स्वाध्यायप्रवचने च । दमश्च स्वाध्यायप्रवचने च । शमश्च स्वाध्यायप्रवचने च । अग्नयश्च स्वाध्यायप्रवचने च । अग्निहोत्र च स्वाध्यायप्रवचन च । अतिथयश्च स्वाध्यायप्रवचने च । मानुष च स्वाध्यायप्रवचने च । प्रजा च स्वाध्यायप्रवचने च । प्रजनश्च स्वाध्यायप्रवचने च । प्रजातिश्च स्वाध्यायप्रवचने च । सत्यमिति सत्यवचा राथीतर । तप इति तपोनित्यः पौरुशिष्टिः । स्वाध्यायप्रवचने एवेति नाको मौद्गल्य' । तद्धि तप स्तद्धि तप' ॥ २ ॥

इति नवमोऽनुवाक' ॥

विज्ञानादेवाप्नोति स्वाराज्यमित्युक्तत्वात् श्रौतस्मार्तानां कर्मणामानर्थक्य प्राप्तमित्येतन्मा प्रापदिति कर्मणा पुरुषार्थं प्रति साधनत्वप्रदर्शनार्थं इहोपन्यास —ऋतमिति व्याख्यातम् । स्वाध्याय अध्ययनम् । प्रवचनमध्यापन ब्रह्मयज्ञो वा । एतानि ऋतादीनि, अनुष्ठेयानि इति वाक्यशेष । सत्य सत्यवचन यथाव्याख्यातार्थं वा । तप कृच्छ्रादि । दम बाह्यकरणोपशम । शम अन्त करणोपशम । अग्नयश्च आधातव्या । अग्निहोत्र च होतव्यम् । अतिथयश्च पूज्या । मानुषमिति लौकिक सव्यवहारं । तच्च यथाप्राप्तमनुष्ठेयम् । प्रजा च उत्पाद्या । प्रजननश्च प्रजननम्, ऋतौ भार्यागमनमित्यर्थ । प्रजाति पौत्रोत्पत्ति , पुत्रो निवेशयितव्य इत्येतत् । सर्वैरेतै कर्मभिर्युक्तस्यापि स्वाध्यायप्रवचने यत्नतोऽनुष्ठेये इत्येवमर्थं सर्वेण सह स्वाध्यायप्रवचनग्रहणम् । स्वाध्यायाधीन ह्यर्थज्ञानम् । अर्थज्ञानाधीन च पर श्रेय । प्रवचन च तदविस्मरणार्थं धर्मवृद्धयर्थं च । तत स्वाध्यायप्रवचनयोरादर कार्य । सत्यमिति सत्यमेवानुष्ठेयमिति सत्यवचा सत्यमेव वचो यस्य सोऽय सत्यवचा , नाम वा तस्य , राथीतर रथीतरसगात्र राथीतर आचार्यो मन्यते । तप इति तप

एव कर्तव्यमिति तपोनित्य तपसि नित्य तप पर, तपोनित्य इति वा नाम, पौरुशिष्टि पुरुशिष्टस्यापत्य पौरुशिष्टिराचार्यो मन्यते । स्वाध्यायप्रवचने एव अनुष्ठेये इति नाको नामत मुद्गलस्यापत्य मौद्गल्य आचार्यो मन्यते । तद्धि तपस्तद्धि तप । यस्मात्स्वाध्यायप्रवचने एव तप, तस्मात्त एवानुष्ठेये इति । उक्तानामपि सत्यतप स्वाध्यायप्रवचनाना पुनग्रहणमादराथम ॥

इति नवमानुवाकभाष्यम् ॥



दशमोऽनुवाक ॥

अह वृक्षस्य रेरिवा । कीर्तिः पृष्ठ गिरेरिव । ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि । द्रविणꣳ सवर्चसम् । सुमेधा अमृतोक्षित । इति त्रिशङ्कोर्वेदानुवचनम् ॥ १ ॥

इति दशमोऽनुवाक ॥

अह वृक्षस्य रेरिवेति स्वाध्यायार्थो मन्त्राम्नाय । स्वाध्यायश्च विद्योत्पत्तये, प्रकरणात् । विद्यार्थ हीद प्रकरणम्, न च अन्यार्थत्वमवगम्यते । स्वाध्यायेन च विशुद्धसत्त्वस्य विद्योत्पत्तिरवकल्पते । अह वृक्षस्य उच्छेद्यात्मकस्य ससारवृक्षस्य रेरिवा प्रेरयिता अन्तर्याम्यात्मना । कीर्ति ख्याति गिरे पृष्ठमिव उच्छ्रिता मम । ऊर्ध्वपवित्र ऊर्ध्वं कारण पवित्र पावन ज्ञानप्रकाश्य पर ब्रह्म यस्य सर्वात्मनो मम, सोऽहमूर्ध्वपवित्र , वाजिनि इव वाजवतीव, वाजमन्नम्, तद्वति सवितरीवेत्यथ , यथा सवितरि अमृतमात्मतत्त्व विशुद्ध प्रसिद्ध श्रुतिस्मृतिशतेभ्य , एव सु अमृत

शोभन विशुद्धमात्मतत्त्वम् अस्मि भवामि। द्रविण धन सवचस दीप्तिमत् तदेव आत्मतत्त्वम्, अस्मीत्यनुवर्तते। ब्रह्मज्ञान वा आत्मतत्त्वप्रकाशकत्वात्सवर्चसम्, द्रविणमिव द्रविणम्, मोक्षसुखहेतुत्वात्। अस्मिन्पक्षे प्राप्त मयेत्यध्याहार कर्तव्य। सुमेधा शोभना मेधा सर्वज्ञत्वलक्षणा यस्य मम, सोऽह सुमेधा, ससारस्थित्युत्पत्तिसहारकौशलयोगात्सुमधस्त्वम्, अत एव अमृत अमरणधर्मा, अक्षित अक्षीण अव्यय अक्षतो वा अमृतेन वा उक्षित सिक्त 'अमृतोक्षिताऽहम्' इत्यादि ब्राह्मणम्। इति ग्व त्रिशङ्को ऋषे ब्रह्मभूतस्य ब्रह्मविद वेदानुवचनम्, वेद वेदनम् आत्मैकत्वविज्ञानम्, तस्य प्राप्तिमनु वचन वेदानुवचनम्, आत्मन कृतकृत्यताप्रख्यापनार्थ वामदेववत्त्रिशङ्कुना आर्षेण दर्शनेन दृष्टो मन्त्राम्नाय आत्मविद्याप्रकाशक इत्यर्थ। अस्य च जपो विद्योत्पत्त्यर्थोऽधिगम्यते। 'ऋत च' इति धर्मोपन्यासादनन्तर च वेदानुवचनपाठादेतदवगम्यते। एव श्रौतस्मार्तेषु नित्येषु कर्मसु युक्तस्य निष्कामस्य पर ब्रह्म विविदिषोरार्षाणि दर्शनानि प्रादुर्भवन्त्यात्मादिविषयाणीति॥

इति दशमानुवाकभाष्यम्॥

एकादशोऽनुवाक ॥

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति । सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् ॥ १ ॥

देवपितृकार्याभ्यां न प्रमदितव्यम् । मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव । यान्यनवद्यानि कर्माणि । तानि सेवितव्यानि । नो इतराणि । यान्यस्माकꣳ सुचरितानि । तानि त्वयोपास्यानि ॥ २ ॥

नो इतराणि । ये के चास्मच्छ्रेयाꣳसो

ब्राह्मणा । तेषा त्वयासनेन प्रश्वसितव्यम् । श्रद्धया देयम् । अश्रद्धयादेयम् । श्रिया देयम् । ह्रिया देयम् । भिया देयम् । संविदा देयम् । अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ॥ ३ ॥

ये तत्र ब्राह्मणा' समर्शिन । युक्ता अयुक्ता । अलूक्षा धर्मकामा स्यु. । यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथाः । अथाभ्याख्यातेषु । ये तत्र ब्राह्मणा समर्शिन. । युक्ता अयुक्ताः । अलूक्षा धर्मकामा स्यु' । यथा ते तेषु वर्तेरन् । तथा तेषु वर्तेथाः । एष आदेश' । एष उपदेश' । एषा वेदोपनिषत् । एतदनुशासनम् । एवमुपासितव्यम् । एवमु चैतदुपास्यम् ॥ ४ ॥

इति एकादशोऽनुवाक' ॥

वेदमनूच्येत्येवमादिकर्तव्यतोपदेशारम्भ प्राग्ब्रह्मात्मवि ज्ञानान्नियमेन कर्तव्यानि श्रौतस्मार्तानि कर्माणीत्येवमथ, अनुशासनश्रुते पुरुषसस्कारार्थत्वात् । सस्कृतस्य हि विशु द्धसत्त्वस्य आत्मज्ञानमञ्जसैवोपजायते । 'तपसा कल्मष हन्ति विद्ययामृतमश्नुते' इति हि स्मृति । वक्ष्यति च— 'तपसा ब्रह्म विजिज्ञासस्व' इति । अतो विद्योत्पत्त्यर्थमनुष्ठे- यानि कर्माणि । अनुशास्तीत्यनुशासनशब्दादनुशासनातिक्रमे हि दोषोत्पत्ति । प्रागुपन्यासाच्च कर्मणाम्, केवलब्रह्मविद्या- रम्भाच्च पूर्व कर्माण्युपन्यस्तानि । उदिताया च ब्रह्मविद्या याम् 'अभय प्रतिष्ठा विन्दते' 'न बिभेति कुतश्चन' 'किमह साधु नाकरवम्' इत्यादिना कर्मनैष्किंच्य दर्श यिष्यति । अत अवगम्यते— पूर्वोपचितदुरितक्षयद्वारेण विद्योत्पत्त्यर्थानि कर्माणीति । मन्त्रवर्णाच्च— 'अविद्यया मृत्यु तीर्त्वा विद्ययामृतमश्नुते' इति ऋतादीना पूर्वत्रोपदेश आनर्थक्यपरिहारार्थ, इह तु ज्ञानोत्पत्त्यर्थत्वात्कर्तव्य तानियमार्थ । वेदम् अनूच्य अध्याप्य आचार्य अन्ते- वासिन शिष्यम् अनुशास्ति ग्रन्थग्रहणात् अनु पश्चात् शास्ति तदर्थ ग्राहयतीत्यथ । अतोऽवगम्यते अधीतवेदस्य धर्माजि ज्ञासामकृत्वा गुरुकुलान्न समावर्तितव्यमिति । 'बुद्ध्वा क

र्माणि कुर्वीत' इति स्मृतेश्च । कथमनुशास्तीत्यत आह—सत्य वद यथाप्रमाणावगत वक्तव्य च वद । तद्वत् धर्म चर, धर्म इत्यनुष्ठेयाना सामान्यवचनम्, सत्यादिविशेष निर्देशात् । स्वाध्यायात् अध्ययनात् मा प्रमद प्रमाद मा कार्षी । आचार्याय आचार्यार्थं प्रियम् इष्ट धनम आहृत्य आनीय दत्त्वा विद्यानिष्क्रयाथम् आचार्येण च अनुज्ञात अनुरूपान्दारानाहृत्य प्रजातन्तु प्रजासतान मा व्यवच्छेत्सी, प्रजासततेर्विच्छित्तिर्न कर्तव्या, अनुत्पद्यमानेऽपि पुत्रे पुत्रकाम्यादिकर्मणा तदुत्पत्तौ यत्न कर्तव्य इत्यभिप्राय, प्रजाप्रजनप्रजातित्रयनिर्देशसामर्थ्यात्, अन्यथा प्रजनश्चेत्येतदेकमेवावक्ष्यत । सत्यात् न प्रमदितव्य प्रमादो न कर्तव्यु , सत्याच्च प्रमदनमनृतप्रसङ्ग , प्रमादशब्दसामर्थ्याद्विस्मृत्याप्यनृत न वक्तव्यमित्यर्थ , अन्यथा असत्यवदनप्रतिषेध एव स्यात् । धर्मात् न प्रमदितव्यम्, धर्मशब्द स्यानुष्ठेयविशेषविषयत्वादननुष्ठान प्रमाद , स न कर्तव्य , अनुष्ठातव्य एव धर्म इति यावत् । एव कुशलात् आत्मरक्षार्थात्कर्मण न प्रमदितव्यम् । भूति विभूति , तस्यै भूत्यै भूत्यर्थान्मङ्गलयुक्तात्कर्मण न प्रमदितव्यम । स्वाध्यायप्रवचनाभ्या न प्रमदितव्यम्, ते हि नियमेन कर्तव्ये इत्यर्थ ।

तथा देवपितृकार्याभ्या न प्रमदितव्यम् , दैवपित्र्ये कर्मणी कर्तव्ये । मातृदेव माता देवो यस्य स , त्व मातृदव भव स्या । एव पितृदेवो भव, आचार्यदेवो भव, अतिथिदवो भव, देवतावदुपास्या एते इत्यथ । यान्यपि च अन्यानि अनवद्यानि अनिन्दितानि शिष्टाचारलक्षणानि कर्माणि, तानि सेवितव्यानि कर्तव्यानि त्वया । नो न कर्तव्यानि इतराणि सावद्यानि शिष्टकृतान्यपि । यानि अस्माकम् आचार्याणा सुचरितानि शोभनचरितानि आम्नायाद्यविरुद्धानि, तान्येव त्वया उपास्यानि अदृष्टार्थान्यनुष्ठेयानि नियमेन कर्तव्यानीत्येतत् । नो इतराणि विपरीतान्याचार्यकृतान्यपि । ये के च विशेषिता आचार्यत्वादिधर्मै अस्मत् अस्मत्त श्रेयाम प्रशस्ततरा , त च ब्राह्मणा , न क्षत्रियादय , तेषाम् आसनेन आसनदानादिना त्वया प्रश्वसितव्यम , प्रश्वसन प्रश्वास श्रमापनय , तेषा श्रमस्त्वया अपनेतव्य इत्यथ । तेपा वा आसन गोष्ठीनिमित्ते समुदिते, तेषु न प्रश्वसितव्य प्रश्वासोऽपि न कतव्य , केवल तदुक्तसारग्राहिणा भवितव्यम् । किं च यत्किंचिद्देयम , तत् श्रद्धयैव दातव्यम । अश्रद्धया अदेय न दातव्यम् । श्रिया विभूत्या दय दातव्यम । ह्रिया लज्जया च देयम् । भिया भीत्या च

देयम् । सविदा च मैत्र्यादिकार्येण देयम् । अथ एव वर्तमानस्य यदि कदाचित् तत्र तव श्रौते स्मार्ते वा कर्मणि वृत्ते वा आचारलक्षणे विचिकित्सा संशय स्यात् भवेत्, ये तत्र तस्मिन्देशे काले वा ब्राह्मणा तत्र कर्मादौ युक्ता इति व्यवहितेन सबन्ध कर्तव्य, समर्शिन विचारक्षमा, युक्ता अभियुक्ता, कर्मणि वृत्ते वा आयुक्ता अपरप्रयुक्ता, अलूक्षा अरूक्षा अक्रूरमतय, धर्मकाम्या अदृष्टार्थिन अकामहता इत्येतत्, स्यु भवेयु, ते ब्राह्मणा यथा येन प्रकारेण तत्र तस्मिन्कर्मणि वृत्ते वा वर्तेरन्, तथा त्वमपि वर्तेथा । अथ अभ्याख्यातेषु, अभ्याख्याता अभ्युक्ता दोषेण संदिह्यमानेन संयोजिता केनचित्, तेषु च, यथोक्त सर्वमुपनयेत्— ये तत्रेत्यादि । एष आदेश विधि । एष उपदेश पुत्रादिभ्य पित्रादीनामपि । एषा वेदोपनिषत् वेदरहस्यम्, वेदार्थ इत्यतत् । एतदेव अनुशासनम् ईश्वरवचनम्, आदेशवाक्यस्य विधरुक्तत्वात् । सर्वेषा वा प्रमाणभूतानामनुशासनमेतत् । यस्मादेवम्, तस्मात् एव यथोक्त सर्वम् उपासितव्य कर्तव्यम् । एवमु च एतत् उपास्यम् उपास्यमेव चैतत् नानुपास्यम् इत्यादरार्थ पुनर्वचनम् ॥

अत्रैतच्चिन्त्यते विद्याकर्मणोर्विवेकार्थम्— कि कर्मभ्य

एव केवलेभ्य पर श्रेय , उत विद्यासव्यपेक्षेभ्य , आहोस्वि-द्विद्याकर्मभ्या सहताभ्याम , विद्याया वा कर्मापेक्षाया , उत केवलाया एव विद्याया इति । तत्र केवलेभ्य एव कर्मभ्य स्यात् , समस्तवेदार्थज्ञानवत कर्माधिकारात् ' वेद कृत्स्नो-ऽधिगन्तव्य सरहस्यो द्विजन्मना ' इति स्मरणात् । अधि-गमश्च सहोपनिषदर्थेनात्मज्ञानादिना । ' विद्वान्यजते ' ' वि द्वान्याजयति ' इति च विदुष एव कर्मण्यधिकार प्रद-र्शयते सर्वत्र ज्ञात्वानुष्ठानमिति च । कृत्स्नश्च वेद कर्मार्थ इति हि मन्यन्ते केचित् । कर्मभ्यश्चेत्पर श्रेयो नावाप्यते, वेदोऽनथक स्यात् । न, नित्यत्वा मोक्षस्य । नित्यो हि मोक्ष इष्यत । कर्मकार्यस्य चानित्यत्व प्रसिद्ध लोके । कर्मभ्यश्चेन्छ्रय , अनित्य स्यात् , तच्चानिष्टम । ननु काम्यप्रतिषिद्धयोरनारम्भात आरब्धस्य च कर्मण उपभो गेनैव क्षयात नित्यानुष्ठानाच्च प्रत्यवायानुपपत्ते ज्ञाननिरपेक्ष एव मोक्ष इति चेत् , तच्च न , कर्मशेषसभवात्तन्निमित्ता शरीरान्तरोत्पत्ति प्राप्नोतीति प्रत्युक्तम् , कर्मशेषस्य च नित्यानुष्ठानेनाविरोधात्क्षयानुपपत्तिरिति च । यदुक्त स मस्तवेदाथज्ञानवत कर्माधिकारादित्यादि , तच्च न , श्रुत ज्ञानव्यतिरेकादुपासनस्य । श्रुतज्ञानमात्रेण हि कर्मण्यधि-

क्रियते, नोपासनज्ञानमपेक्षते। उपासन च श्रुतज्ञानादर्थान्तर विधीयते मोक्षफलम्, अर्थान्तरप्रसिद्धेश्च स्यात्, 'श्रोतव्य' इत्युक्त्वा तद्व्यतिरेकेण 'मन्तव्यो निदिध्यासितव्य' इति यत्नान्तरावधानात् मनननिदिध्यासनयोश्च प्रसिद्ध श्रवणज्ञानादर्थान्तरत्वम्। एव तर्हि विद्यामव्यपेक्षेभ्य कर्मभ्य स्यान्मोक्ष, विद्यासहितानाा च कर्मणा भवेत्कार्यान्तरारम्भसामर्थ्यम्, यथा स्वतो मरणज्वरादिकार्यारम्भसमर्थानामपि विषदध्यादीना मन्त्रशकरादिसयुक्तानाा कार्यान्तरारम्भसामर्थ्यम्, एव विद्यासहितै कर्मभि मोक्ष आरभ्यत इति चत्, न, आरभ्यस्यानित्यत्वादित्युक्ता दोष। वचनात्आरभ्याऽपि नित्य एवति चेत्, न, ज्ञापकत्वाद्वचनस्य। वचन नाम यथाभूतस्यार्थस्य ज्ञापकम्, नाविद्यमानस्य कर्तृ। न हि वचनशतेनापि नित्यमारभ्यते, आरब्ध वा अविनाशि भवेत्। एतन विद्याकर्मणा समुच्चयोर्मोक्षारम्भकत्व प्रत्युक्तम्॥

विद्याकर्मणी मोक्षप्रतिबन्धहेतुनिवर्तके इति चेत्, न, कर्मण फलान्तरदर्शनात्। उत्पत्तिविकारसस्कारात्प्तयो हि फल कर्मणो दृश्यन्ते। उत्पत्त्यादिफलविपरीतश्च मोक्ष। गतिश्रुतेराप्य इति चत्— 'सूर्यद्वारेण' 'तयोर्ध्वमायन' इत्येवमादिगतिश्रुतिभ्य प्राप्यो मोक्ष इति चेत्, न, सर्वग-

तत्वात् गन्तृभ्यश्चानन्यत्वात् । आकाशादिकारणत्वात्सर्वगत ब्रह्म, ब्रह्माव्यतिरिक्ताश्च सर्वे विज्ञानात्मान , अतो नाप्यो मोक्ष । गन्तुरन्यद्विभिन्नदेश च भवति गन्तव्यम् । न हि, येनैवाव्यतिरिक्त यत् , तत्तेनैव गम्यते । तदनन्यत्वसिद्धिश्च 'तत्सृष्ट्वा तदेवानुप्राविशत्' 'क्षेत्रज्ञ चापि मा विद्धि सर्व क्षेत्रेषु' इत्येवमादिश्रुतिस्मृतिशतेभ्य । गत्यैश्वर्यादिश्रुतिवि रोध इति चेत्—अथापि स्यात् यद्यप्राप्यो मोक्ष , तदा गतिश्रुतीनाम् 'स एकधा' 'स यदि पितृलोककाम' 'स्त्रीभिर्वा यानैर्वा' इत्यादिश्रुतीना च कोप स्यात् इति चत , न , कार्यब्रह्मविषयत्वात्तासाम् । कार्ये हि ब्रह्मणि स्यादय स्यु , न कारणे , 'एकमेवाद्वितीयम्' 'यत्र ना न्यत्पश्यति' 'तत्कन क पश्येत' इत्यादिश्रुतिभ्य । विरा-धाच्च विद्याकर्मणो समुच्चयानुपपत्ति । प्रलीनकर्त्रादिका रकविशषतत्त्वविषया हि विद्या तद्विपरीतकारकमाध्येन क मणा विरुध्यत । न ह्येक वस्तु परमार्थत कत्रादिविशेषवत् तच्छून्य चेति उभयथा द्रष्टु शक्यत । अवश्य ह्यन्यतर-न्मिथ्या स्यात् । अन्यतरस्य च मिथ्यात्वप्रसङ्गे युक्त यत्स्वा-भावकाज्ञानविषयस्य द्वैतस्य मिथ्यात्वम्, 'यत्र हि द्वैत मिव भवति' 'मृत्यो स मृत्युमाप्नोति' 'अथ यत्रान्यत्प-

श्यति तदल्पम्' 'अन्योऽसावन्योऽहमस्मि' 'उदरमन्तर कुरुते' 'अथ तस्य भय भवति' इत्यादिश्रुतिशतेभ्य । सत्यत्व च एकत्वस्य 'एकधैवानुद्रष्टव्यम्' 'एकमेवाद्वितीयम्' 'ब्रह्मैवेदꣳ सर्वम्' 'आत्मैवदꣳ सर्वम्' इत्यादिश्रुतिभ्य । न च सप्रदानादिकारकभेदादर्शन कर्मोपपद्यत । अन्यत्वदर्शनापवादाश्च विद्याविषये सहस्रश श्रूयन्ते । अतो विरोधो विद्याकर्मणो । अतश्च समुच्चयानुपपत्ति ॥

तत्र यदुक्त सहताभ्या विद्याकर्मभ्या मोक्ष इत्येतदनुपपन्नमिति, तदयुक्तम्, तद्विहितत्वात्कर्मणा श्रुतिविरोध इति चत्—यद्युपमृद्य कर्त्रादिकारकविशेषमात्मैकत्वविज्ञान विधीयते सर्पादिभ्रान्तिज्ञानोपमर्दकरज्ज्वादिविषयविज्ञानवत्, प्राप्त कर्मविधिश्रुतीना निर्विषयत्वाद्विरोध । विहितानि च कर्माणि । स च विरोधो न युक्त, प्रमाणत्वाच्छ्रुतीनामिति चत्, न, पुरुषार्थोपदशपरत्वाच्छ्रुतीनाम् । विद्योपदेशपरा तावच्छ्रुति ससारात्पुरुषा मोक्षयितव्य इति ससारहतोरविद्याया विद्यया निवृत्ति कर्तव्येति विद्याप्रकाशकत्वेन प्रवृत्तति न विरोध । एवमपि कर्त्रादिकारकसद्भावप्रतिपादनपर शास्त्र विरुध्यत एवेति चेत्, न, यथाप्राप्तमव कारकास्तित्वमुपादाय उपात्तदुरितक्षयार्थ कर्माणि

विदधच्छास्त्र मुमुक्षूणा फलार्थिना च फलसाधन न कारकास्तित्वे व्याप्रियते । उपचितदुरितप्रतिबन्धस्य हि विद्योत्पत्तिर्नावकल्पते । तत्क्षये च विद्योत्पत्ति स्यात्, ततश्चाविद्यानिवृत्ति , तत आत्यन्तिक ससारोपरम । अपि च, अनात्मदर्शिनो ह्यनात्मविषय काम , कामयमानश्च करोति कर्माणि , ततस्तत्फलोपभोगाय शरीराद्युपादानलक्षण ससार । तद्व्यतिरेकेणात्मैकत्वदर्शिनो विषयाभावात्कामानुपपत्ति , आत्मनि चानन्यत्वात्कामानुपपत्तौ स्वात्मन्यवस्थान मोक्ष इत्यतोऽपि विद्याकर्मणोर्विरोध । विरोधादेव च विद्या मोक्ष प्रति न कर्माण्यपेक्षते । स्वात्मलाभे तु पूर्वोपचितदुरितप्रतिबन्धापनयनद्वारेण विद्याहेतुत्व प्रतिपद्यन्ते कर्माणि नित्यानीति । अत एवास्मिन्प्रकरणे उपन्यस्तानि कर्माणीत्यवोचाम । एव च अविरोध कर्मविधिश्रुतीनाम् । अत केवलाया एव विद्याया पर श्रेय इति सिद्धम् ॥

एव तर्हि आश्रमान्तरानुपपत्ति , कर्मनिमित्तत्वाद्विद्योत्पत्ते । गृहस्थस्यैव विहितानि कर्माणीत्यैकाश्रम्यमेव । अतश्च यावज्जीवादिश्रुतय अनुकूलतरा स्यु । न, कर्मानेकत्वात् । न ह्यग्निहोत्रादीन्येव कर्माणि, ब्रह्मचर्य तप सत्यवचन शम दम अहिंसा इत्येवमादीन्यपि कर्माणि इतराश्रमप्रसि

द्धानि विद्योत्पत्तौ साधकतमान्यसकीर्णा विद्यन्ते ध्यानधारणादिलक्षणानि च । वक्ष्यति च—'तपसा ब्रह्म विजिज्ञासस्व' इति । जन्मान्तरकृतकर्मभ्यश्च प्रागपि गार्हस्थ्याद्विद्योत्पत्तिसभवात्, कर्मार्थत्वाच्च गार्हस्थ्यप्रतिपत्ते, कर्मसाध्याया च विद्याया सत्या गार्हस्थ्यप्रतिपत्तिरनर्थिकैव । लोकार्थत्वाच्च पुत्रादीनाम् । पुत्रादिसाध्येभ्यश्च अय लोक पितृलोको देवलोक इत्येतेभ्यो व्यावृत्तकामस्य, नित्यसिद्धात्मदर्शिन, कर्मणि प्रयोजनमपश्यत, कथ प्रवृत्तिरुपपद्यते ? प्रतिपन्नगार्हस्थ्यस्यापि विद्योत्पत्तौ विद्यापरिपाकाद्विरक्तस्य कर्मसु प्रयोजनमपश्यत कमभ्यो निवृत्तिरेव स्यात्, 'प्रव्रजिष्यन्वा अरेऽहमस्मात्स्थानात्स्मि' इत्यवमादिश्रुतिलिङ्गदर्शनात् । कर्म प्रति श्रुतेयत्नाधिक्यदर्शनाद्युक्तमिति चा,—अग्निहोत्रादिकम प्रति श्रुतेरधिको यत्न महाश्च कर्मण्यायास, अनकसाधनसाध्यत्वादग्निहात्रादीनाम्, तपोब्रह्मचर्यादीना च इतराश्रमकर्मणा गार्हस्थ्यऽपि समानत्वात्तत्प साधनापक्षत्वाच्चेतरषा न युक्तस्तुल्यवद्विकल्प आश्रमिभिस्तस्य इति चत्, न, जन्मान्तरकृतानुग्रहात् । यदुक्त कमणि श्रुतेरधिको यत्न इत्यादि, नासौ दोष, यतो जन्मान्तरकृतमप्यग्निहात्रादिलक्षण कम ब्रह्मचर्यादिलक्षण चानु-

प्राहक भवति विद्योत्पत्तिं प्रति, येन च जन्मनैव विरक्ता दृश्यन्ते केचित्, केचित्तु कर्मसु प्रवृत्ता अविरक्ता विद्याविद्वेषिण । तस्माज्जन्मान्तरकृतसंस्कारेभ्यो विरक्तानामाश्रमान्तरप्रतिपत्तिरेवेष्यते । कर्मफलबाहुल्याच्च । पुत्रस्वर्गब्रह्मवर्चसादिलक्षणस्य कर्मफलस्यासंरयेयत्वात् तत्प्रति च पुरुषाणा कामबाहुल्यात्तदर्थं श्रुतेरधिको यत्न कर्मसूपपद्यते, आशिषा बाहुल्यदर्शनात्—इद मे स्यादिद मे स्यादिति । उपायत्वाच्च । उपायभूतानि हि कर्माणि विद्या प्रति इत्यवोचाम । उपाये च अधिको यत्न कर्तव्य, न उपेये । कर्मनिमित्तत्वाद्विद्याया यत्नान्तरानर्थक्यमिति चेत्—कर्मभ्य एव पूर्वोपचितदुरितप्रतिबन्धक्षयाद्विद्योत्पद्यते चेत् कर्मभ्य पृथगुपनिषच्छ्रवणादियत्नोऽनर्थक इति चेत्, न, नियमाभावात । न हि, 'प्रतिबन्धक्षयादेव विद्योत्पद्यते, न त्वीश्वरप्रसादतपोध्यानाद्यनुष्ठानात्' इति नियमोऽस्ति, अहिंसाब्रह्मचर्यादीना च विद्या प्रत्युपकारकत्वात्, साक्षादेव च कारणत्वाच्छ्रवणमननानिदिध्यासनादीनाम् । अत सिद्धान्याश्रमान्तराणि । सर्वेषा चाधिकारो विद्यायाम्, पर च श्रेय केवलाया विद्याया एवेति सिद्धम् ॥

इत्येकादशानुवाकभाष्यम् ॥

द्वादशोऽनुवाक ॥

श नो मित्र. श वरुण. । श नो भव
त्वर्यमा । श न इन्द्रो बृहस्पति । श नो
विष्णुरुरुक्रम । नमो ब्रह्मणे । नमस्ते
वायो । त्वमेव प्रत्यक्ष ब्रह्मासि । त्वामेव
प्रत्यक्ष ब्रह्मावादिषम् । ऋतमवादिषम् ।
सत्यमवादिषम् । तन्मामावीत् । तद्वक्ता-
रमावीत् । आवीन्माम् । आवीद्वक्तारम् ॥
ॐ शान्ति । शान्ति । शान्ति. ॥

इति द्वादशोऽनुवाक ॥

अतीतविद्याप्राप्त्युपसर्गशमनार्थी शान्ति पठति—श नो मित्र इत्यादि । व्याख्यातमेतत्पूर्वम ॥

इति द्वादशानुवाकभाष्यम् ॥

इति श्रीमत्परमहसपरिव्राजकाचार्यस्य श्रीगोविन्द भगवत्पूज्यपादशिष्यस्य श्रीमच्छकरभगवत कृतौ तैत्तिरीयोपनिषद्भाष्ये शीक्षावल्लीभाष्यम् सपूर्णम् ॥


तैत्तिरीयोपनिषद्भाष्यम्
ब्रह्मानन्दवल्ली

ॐ

ब्रह्मानन्दवल्ली ॥



तीतविद्याप्राप्त्युपसर्गप्रशमनार्था शान्ति पठिता। इदानीं तु वक्ष्यमाण-ब्रह्मविद्याप्राप्त्युपसर्गोपशमनार्था शान्ति पठ्यते—

ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्वि नावधीतमस्तु मा विद्विषावहै॥ ॐ शान्ति शान्ति शान्तिः॥

सह नाववत्विति। सह नाववतु, नौ शिष्याचार्यौ सहैव अवतु रक्षतु। सह नौ भुनक्तु ब्रह्म भोजयतु। सह वीर्यं विद्यानिमित्त सामर्थ्यं करवावहै निर्वर्तयावहै। तेजस्वि नौ तेजस्विनोरावयो अधीत स्वधीतम् अस्तु अर्थज्ञानयोग्यमस्त्वित्यर्थ। मा विद्विषावहै, विद्याग्रहणनिमित्त शिष्यस्य आचार्यस्य वा प्रमादकृतादन्यायाद्विद्वेष प्राप्त, तच्छम

नायेयमाशी —मा विद्विषावहै इति। मैव नावितरेतर विद्वेषमापद्यावहै। शान्ति शान्ति शान्तिरिति त्रिर्वचनमुक्तार्थम्। वक्ष्यमाणविद्याविघ्नप्रशमनार्था चेय शान्ति। अविघ्ननाऽऽत्मविद्याप्राप्तिराशास्यते, तन्मूल हि पर श्रेय इति॥

ब्रह्मविदाप्नोति परम्। तदेषाभ्युक्ता। सत्य ज्ञानमनन्त ब्रह्म। यो वेद निहित गुहाया परमे व्योमन्। सोऽश्नुते सर्वान् कामान् सह। ब्रह्मणा विपश्चितेति। तस्माद्वा एतस्मादात्मन आकाश' सभूत। आकाशाद्वायु। वायोराग्नि'। अग्नेराप.। अद्भ्य पृथिवी। पृथिव्या ओषधय'। ओषधीभ्योऽन्नम्। अन्नात्पुरुष। स वा एष पुरुषोऽन्नरसमय। तस्येदमेव शिर। अय दक्षिण. पक्ष। अयमुत्तर' पक्ष। अयमात्मा। इद पुच्छ प्रतिष्ठा। तदप्येष श्लोको भवति॥ १॥

इति प्रथमोऽनुवाक॥

सहितादिविषयाणि कर्मभिरविरुद्धान्युपासनान्युक्तानि । अनन्तर च अन्त सोपाधिकमात्मदर्शनमुक्त व्याहृतिद्वारेण स्वाराज्यफलम् । न चैतावता अशेषत ससारबीजस्य उपमर्दनमस्ति । अत अशेषोपद्रवबीजस्य अज्ञानस्य निवृत्त्यर्थ विधूतसर्वोपाधिविशेषात्मदर्शनार्थमिदमारभ्यते— ब्रह्मविदाप्नोति परमित्यादि । प्रयोजन चास्या ब्रह्मविद्याया अविद्या निवृत्ति, ततश्च आत्यन्तिक ससाराभाव । वक्ष्यति च— 'विद्वान्न बिभेति कुतश्चन' इति । ससारनिमित्ते च सति अभय प्रतिष्ठा विन्दत इत्यनुपपन्नम्, कृताकृते पुण्यपापे न तपत इति च । अतोऽवगम्यते—अस्माद्विज्ञानात्सर्वात्मब्रह्म विषयादात्यन्तिक ससाराभाव इति । स्वयमेवाह प्रयोजनम् 'ब्रह्मविदाप्नोति परम्' इत्यादावेव सबन्धप्रयोजनज्ञापनार्थम् । निर्ज्ञातयोर्हि सबन्धप्रयोजनयो विद्याश्रवणग्रहणधारणाभ्यासार्थ प्रवर्तत । श्रवणादिपूर्वक हि विद्याफलम्, 'श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इत्यादिश्रुत्यन्तरभ्य । ब्रह्मवित्, ब्रह्मेति वक्ष्यमाणलक्षणम्, बृहत्तमत्वात् ब्रह्म, तद्वेत्ति विजानातीति ब्रह्मवित्, आप्नोति प्राप्नोति पर निरतिशयम्, तदेव ब्रह्म परम्, न ह्यन्यस्य विज्ञानादन्यस्य प्राप्ति । स्पष्ट च श्रुत्यन्तर ब्रह्मप्राप्तिमेव ब्रह्मविदो दर्श-

यति— 'स यो ह वै तत्परम ब्रह्म वेद ब्रह्मैव भवति' इत्यादि ॥

ननु, सर्वगत सर्वस्य चात्मभूत ब्रह्म वक्ष्यति । अतो नाप्यम् । आप्तिश्च अन्यस्यान्येन परिच्छिन्नस्य च परिच्छिन्नेन दृष्टा । अपरिच्छिन्न सर्वात्मक च ब्रह्मेत्यत परिच्छिन्नवत् अनात्मवच्च तस्याप्तिरनुपपन्ना । नाय दोष । कथम्? दर्शनादर्शनापेक्षत्वाद्ब्रह्मण आप्तयनाप्तयो, परमार्थतो ब्रह्मस्वरूपस्यापि सत अस्य जीवस्य भूतमात्राकृतबाह्यपरिच्छिन्नान्नमयाद्यात्मदर्शिन तदासक्तचेतस । प्रकृतसख्यापूरणस्यात्मन अव्यवहितस्यापि बाह्यसख्येयविषयासक्तचित्ततया स्वरूपाभावदर्शनवत् परमार्थब्रह्मस्वरूपाभावदर्शनलक्षणया अविद्यया अन्नमयादीन्बाह्याननात्मन आत्मत्वेन प्रतिपन्नत्वात् अन्नमयाद्यनात्मभ्यो नान्योऽहमस्मीत्यभिमन्यते । एवमविद्यया आत्मभूतमपि ब्रह्म अनाप्त स्यात् । तस्यैवमविद्यया अनाप्तब्रह्मस्वरूपस्य प्रकृतसख्यापूरणस्यात्मन अविद्यानाप्तस्य सत केनचित्स्मारितस्य पुनस्तस्यैव विद्यया आप्तिर्यथा, तथा श्रुत्युपदिष्टस्य सर्वात्मब्रह्मण आत्मत्वदर्शनेन विद्यया तदाप्तिरुपपद्यत एव । ब्रह्मविदाप्नोति परमिति वाक्य सूत्रभूत सर्वस्य वल्ल्यर्थस्य । ब्रह्मविदाप्नोति पर-

मित्यनेन वाक्येन वेद्यतया सूत्रितस्य ब्रह्मणोऽनिर्धारित स्वरूपविशेषस्य सर्वतो व्यावृत्तस्वरूपविशेषसमर्पणसमर्थस्य लक्षणस्याभिधानेन स्वरूपनिर्धारणाय अविशेषेण च उक्त वेदनस्य ब्रह्मणो वक्ष्यमाणलक्षणस्य विशेषेण प्रत्यगात्मतया अनन्यरूपेण विज्ञेयत्वाय, ब्रह्मविद्याफल च ब्रह्मविदो यत्प रप्राप्तिलक्षणमुक्तम्, स सर्वात्मभाव सर्वससारधर्मातीत-ब्रह्मस्वरूपत्वमेव, नान्यदित्येतत्प्रदर्शनाय च एषा ऋगुदाह्रियते—तदेषाभ्युक्तति । तत् तस्मिन्नेव ब्राह्मणवाक्योक्तार्थे एषा ऋक् अभ्युक्ता आम्नाता । सत्य ज्ञानमनन्त ब्रह्म इति ब्राह्मणो लक्षणार्थ वाक्यम् । सत्यादीनि हि त्रीणि विशेषणार्थानि पदानि विशेष्यस्य ब्रह्मण । विशेष्य ब्रह्म, विवक्षितत्वाद्वेद्यतया । नेत्यत्वेन यतो ब्रह्म प्राधान्येन विवक्षितम्, तस्माद्विशेष्य विज्ञेयम् । अत अस्माद्विशेषणविशेष्यत्वादेव सत्यादीनि एकविभक्त्यन्तानि पदानि समानाधिकरणानि । सत्यादिभिस्त्रिभिर्विशेषणैर्विशेष्यमाण ब्रह्म विशेष्यान्तरेभ्या निर्धार्यते । एव हि तज्ज्ञात भवति, यदन्येभ्यो निवारितम्, यथा लोके नील महत्सुगन्ध्युत्पलमिति । ननु, विशेष्य विशेषणान्तर व्यभिचरद्विशेष्यते, यथा नील रक्त चोत्पलमिति, यदा ह्यनेकानि द्रव्याणि एकजातीयान्येक-

विशेषणयोगीनि च, तदा विशेषणस्यार्थवत्त्वम्, न ह्येकस्मिन्नेव वस्तुनि, विशेषणान्तरायोगात्, यथा असावेक आदित्य इति, तथा एकमेव ब्रह्म, न ब्रह्मान्तराणि, येभ्या विशेष्येत नीलोत्पलवत्। न, लक्षणार्थत्वाद्विशेषणानाम्। नाय दोष। कस्मात्? लक्षणार्थप्रधानानि विशेषणानि, न विशेषणप्रधानान्येव। क पुनर्लक्षणलक्ष्ययोर्विशेषणविशेष्ययोर्वा विशेष? उच्यते। सजातीयेभ्य एव निवर्तकानि विशेषणानि विशेष्यस्य, लक्षण तु सर्वत एव, यथा अवकाशप्रदात्राकाशमिति। लक्षणार्थ च वाक्यमित्यवोचाम॥

सत्यादिशब्दा न परस्पर सबध्यन्ते, परार्थत्वात्, विशेष्यार्था हि त। अत एव एकैको विशेषणशब्द परस्पर निरपेक्षो ब्रह्मशब्देन सबध्यते— सत्य ब्रह्म ज्ञान ब्रह्म अनन्त ब्रह्मेति। सत्यमिति यद्रूपेण यन्निश्चित तद्रूप न व्यभिचरति, तत्सत्यम्। यद्रूपेण यन्निश्चित तद्रूप व्यभिचरति, तदनृतमित्युच्यते। अतो विकारोऽनृतम्, 'वाचारम्भण विकारो नामधेय मृत्तिकेत्येव सत्यम्', एव सदेव सत्यमित्यवधारणात्। अत 'सत्य ब्रह्म' इति ब्रह्म विकारान्निवर्तयति। अत कारणत्व प्राप्त ब्रह्मण। कारणस्य च कारकत्वम्, वस्तुत्वात् मृद्वत् अचिद्रूपता च प्राप्ता, अत इदमुच्यते—

ज्ञान ब्रह्मेति । ज्ञान ज्ञप्ति अवबोध ,— भावसाधनो ज्ञान-शब्द — न तु ज्ञानकर्तृ, ब्रह्मविशषणत्वात्सत्यानन्ताभ्या सह । न हि सत्यता अनन्तता च ज्ञानकर्तृत्वे सत्युपपद्येते । ज्ञानकर्तृत्वेन हि विक्रियमाण कथ सत्य भवेत्, अनन्त च ? यद्धि न कुतश्चित्प्रविभज्यते, तदनन्तम् । ज्ञानकर्तृत्वे च ज्ञेयज्ञानाभ्या प्रविभक्तमित्यनन्तता न स्यात्, 'यत्र नान्य-द्विजानाति स भूमा, अथ यत्रान्यद्विजानाति तदल्पम्' इति श्रुत्यन्तरात् । 'नान्यद्विजानाति' इति विशेषप्रतिषधात् आ-त्मान विजानातीति चेत्, न, भूमलक्षणविधिपरत्वाद्वाक्य स्य । 'यत्र नान्यत्पश्यति' इत्यादि भूम्नो लक्षणविधिपर वाक्यम् । यथाप्रसिद्धमेव अन्योऽन्यत्पश्यतीत्येतदुपादाय यत्र तन्नास्ति, स भूमा इति भूमस्वरूप तत्र ज्ञाप्यत । अन्यग्रहणस्य प्राप्तप्रतिषेधार्थत्वात् न स्वात्मनि क्रियास्तित्व-पर वाक्यम् । स्वात्मनि च भेदाभावाद्विज्ञानानुपपत्ति । आत्मनश्च विज्ञेयत्वे ज्ञातृभावप्रसङ्ग , ज्ञेयत्वेनैव विनियुक्त-त्वात् ॥

एक एवात्मा ज्ञेयत्वेन ज्ञातृत्वेन च उभयथा भवतीति चेत्, न, युगपदनशत्वात् । न हि निरवयवस्य युगपज्ज्ञेय-ज्ञातृत्वोपपत्ति । आत्मनश्च घटादिवद्विज्ञेयत्वे ज्ञानोपदेशा-

नर्थक्यम् । न हि घटादिवत्प्रसिद्धस्य ज्ञानोपदेश अर्थवान। तस्मात् ज्ञातृत्वे सति आनन्त्यानुपपत्ति । सन्मात्रत्व चानुपपन्न ज्ञानकर्तृत्वादिविशेषवत्त्वे सति, सन्मात्रत्व च सत्यम्, 'तत्सत्यम्' इति श्रुत्यन्तरात् । तस्मात्सत्यानन्तशब्दाभ्या सह विशेषणत्वेन ज्ञानशब्दस्य प्रयोगाद्भावसाधनो ज्ञानशब्द । 'ज्ञान ब्रह्म' इति कर्तृत्वादिकारकनिवृत्त्यर्थ मृदादिवदचिद्रूपतानिवृत्त्यर्थ च प्रयुज्यते । 'ज्ञान ब्रह्म' इति वचनात्प्राप्तमन्तवत्त्वम्, लौकिकस्य ज्ञानस्य अन्तवत्त्वदर्शनात् । अत तन्निवृत्त्यर्थमाह—अनन्तमिति । सत्यादीनामनृतादिधर्मनिवृत्तिपरत्वाद्विशेष्यस्य च ब्रह्मण उत्पलादिवत्प्रसिद्धत्वात 'मृगतृष्णाम्भसि स्नात खपुष्पकृतशेखर । एष वन्ध्यासुतो याति शशशृङ्गधनुधर इतिवत् शून्यार्थतैव प्राप्ता सत्यादिवाक्यस्येति चेत्, न, लक्षणार्थत्वात् । विशेषणत्वेऽपि सत्यादीना लक्षणार्थप्राधान्यमित्यत्रा चाम । शून्य हि लक्ष्य अनर्थक लक्षणवचनम् । अत लक्षणार्थत्वान्नन्यामहे न शून्यार्थतेति । विशेषणार्थत्वेऽपि च सत्यादीना स्वार्थापरित्याग एव । शून्यार्थत्वे हि सत्यादिशब्दाना विशेष्यनियन्तृत्वानुपपत्ति । सत्यार्थैरर्थवत्त्वे तु तद्विपरीतधर्मवद्भ्यो विशेषेभ्यो ब्रह्मणो विशेष्यस्य

नियन्तृत्वमुपपद्यते । ब्रह्मशब्दोऽपि स्वार्थेनार्थवानेव । तत्र अनन्तशब्द अन्तवत्त्वप्रतिषेधद्वारेण विशेषणम् । सत्य ज्ञानशब्दौ तु स्वार्थसमर्पणेनैव विशेषणे भवत ॥

'तस्माद्वा एतस्मादात्मन' इति ब्रह्मण्येव आत्मशब्द-प्रयोगात् वेदितुरात्मैव ब्रह्म । 'एतमानन्दमयमात्मानमुप-सक्रामति' इति च आत्मता दर्शयति । तत्प्रवेशाच्च, 'तत्सृष्ट्वा तदेवानुप्राविशत्' इति च तस्यैव जीवरूपेण शरीरप्रवेश दशयति । अतो वेदितु स्वरूप ब्रह्म । एव तर्हि, आत्मत्वाज्ज्ञानकर्तृत्वम्, 'आत्मा ज्ञाता' इति हि प्रसिद्धम्, 'सोऽकामयत' इति च कामिनो ज्ञानकर्तृत्वप्रसिद्धि , अतो ज्ञानकर्तृत्वात् ज्ञप्तिर्ब्रह्मेत्ययुक्तम्, अनित्यत्वप्रसङ्गाच्च, यदि नाम ज्ञप्तिर्ज्ञानमिति भावरूपता ब्रह्मण , तदाप्यनित्यत्व प्रसज्येत , पारतन्त्र्य च, धात्वर्थाना कारकापेक्षत्वात्, ज्ञान च धात्वर्थ , अतोऽस्य अनित्यत्व परतन्त्रता च । न, स्व-रूपाव्यतिरेकेण कार्यत्वोपचारात् । आत्मन स्वरूप ज्ञप्ति न ततो व्यतिरिच्यते । अतो नित्यैव । तथापि बुद्धेरुपाधि-लक्षणायाश्चक्षुरादिद्वारैर्विषयाकारपरिणामिन्या ये शब्दा-द्याकारावभासा , ते आत्मविज्ञानस्य विषयभूता उत्पद्यमाना एव आत्मविज्ञानेन व्याप्ता उत्पद्यन्ते । तस्मादात्मविज्ञाना-

वभास्याश्च त विज्ञानशब्दवाच्याश्च धात्वर्थभूता आत्मन एव धर्मा विक्रियारूपा इत्यविवेकिभि परिकल्प्यन्ते। यत्तु ब्रह्मणो विज्ञानम्, तत् सवितृप्रकाशवत् अनुष्णत्ववच्च ब्रह्मस्वरूपाव्यतिरिक्त स्वरूपमेव तत्। न तत्कारणान्तरसव्यपेक्षम्, नित्यस्वरूपत्वात्, सर्वभावाना च तेनाविभक्तदेशकालत्वात् कालाकाशादिकारणत्वात् निरतिशयसूक्ष्मत्वाच्च। न तस्यान्यदविज्ञेय सूक्ष्म व्यवहित विप्रकृष्ट भूत भवद्भविष्यद्वा अस्ति। तस्मात्सवज्ञ तद्ब्रह्म। मन्त्रवर्णाच्च 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षु स शृणोत्यकर्ण। स वेत्ति वेद्य न च तस्यास्ति वेत्ता तमाहुरग्र्य पुरुष महान्तम्' इति। 'न हि विज्ञातुर्विज्ञातर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति' इत्यादिश्रुतेश्च। विज्ञातृस्वरूपाव्यतिरेकात्करणादिनिमित्तानपेक्षत्वाच्च ब्रह्मणो ज्ञानस्वरूपत्वऽपि नित्यत्वप्रसिद्धि। अतो नैव धात्वर्थस्तत्, अक्रियारूपत्वात्। अत एव च न ज्ञानकर्तृ, तस्मादेव च न ज्ञानशब्दवाच्यमपि तद्ब्रह्म। तथापि तदाभासवाचकेन बुद्धिधर्मविशेषण ज्ञानशब्देन तल्लक्ष्यते, न तु उच्यते, शब्दप्रवृत्तिहेतुजात्यादिधर्मरहितत्वात्। तथा सत्यशब्देनापि। सर्वविशेषप्रत्यस्तमितस्वरूपत्वाद्ब्रह्मण बाह्यसत्तासामान्यविष

येण सत्यशब्देन लक्ष्यते 'सत्य ब्रह्म' इति, न तु सत्यशब्दवाच्य ब्रह्म। एव सत्यादिशब्दा इतरेतरसनिधानादन्योन्यनियम्यनियामका सन्त सत्यादिशब्दवाच्यात् निवर्तका ब्रह्मण, लक्षणार्थाश्च भवन्तीति। अत सिद्धम् 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' 'अनिरुक्तेऽनिलयने' इति च अवाक्यत्वम्, नीलोत्पलवदवाक्यार्थत्व च ब्रह्मण॥

तद्यथाव्याख्यात ब्रह्म य वेद विजानाति निहित स्थित गुहायाम्, गूहते सवरणार्थस्य निगूढा अस्या ज्ञानज्ञेयज्ञातृपदार्था इति गुहा बुद्धि, गूढावस्था भोगापवर्गौ पुरुषार्थाविति वा, तस्या परमे प्रकृष्टे व्योमन् व्योम्नि आकाशे अव्याकृताख्ये, तद्धि परम व्योम, 'एतस्मिन्खल्वक्षरे गार्ग्याकाश' इत्यक्षरसनिकर्षात्, 'गुहाया व्योमन्' इति वा सामानाधिकरण्यादव्याकृताकाशमेव गुहा, तत्रापि निगूढा सर्वे पदार्थास्त्रिषु कालेषु, कारणत्वात्सूक्ष्मतरत्वाच्च, तस्मिन्नन्तर्निहित ब्रह्म। हार्दमेव तु परम व्योमेति न्याय्यम्, विज्ञानाङ्गत्वेन व्योम्नो विवक्षितत्वात्। 'यो वै स बहिर्धा पुरुषादाकाशो यो वै सोऽन्त पुरुष आकाशो योऽयमन्तर्हृदय आकाश' इति श्रुत्यन्तरात्प्रसिद्ध हार्दस्य व्योम्न पर

मत्वम्। तस्मिन्हार्दे व्योम्नि या बुद्धिर्गुहा, तस्या निहित ब्रह्म तद्व्यावृत्त्या विविक्ततयोपलभ्यत इति। न ह्यन्यथा विशिष्ट-देशकालसबन्धोऽस्ति ब्रह्मण, सवगतत्वान्निर्विशेषत्वाच्च। स एव ब्रह्म विजानन्, किमित्याह—अश्नुते भुङ्क्ते सर्वान् निर-वशेषान् कामान् काम्यभोगानित्यर्थ। किमस्मदादिवत्पुत्रस्व-र्गादीन्पर्यायेण? नेत्याह— सह युगपत् एकक्षणोपारूढानेव एकयोपलब्ध्या सवितृप्रकाशवन्नित्यया ब्रह्मस्वरूपाव्यतिरिक्त-या, यामवोचाम 'सत्य ज्ञानम्' इति। एतत्तदुच्यते—ब्रह्मणा सहेति। ब्रह्मभूतो विद्वान् ब्रह्मस्वरूपेणैव सर्वान्कामान् सह अश्नुते। न तथा यथोपाधिकृतेन स्वरूपेणात्मनो जलसूर्य कादिवत्प्रतिबिम्बभूतेन सासारिकेण धर्मादिनिमित्तापेक्षाश्च-क्षुरादिकरणापेक्षाश्च सर्वान्कामान्पर्यायेणाश्नुते लोक। कथ तर्हि? यथोक्तेन प्रकारेण सर्वज्ञेन सर्वगतेन सर्वात्मना नित्य ब्रह्मात्मस्वरूपेण धर्मादिनिमित्तानपेक्षान् चक्षुरादिकरणानपे-क्षाश्च सर्वान्कामान्सहाश्नुत इत्यर्थ। विपश्चिता मेधावि-ना सर्वज्ञेन। तद्धि वैपश्चित्यम्, यत्सर्वज्ञत्वम्। तेन सर्व-ज्ञस्वरूपेण ब्रह्मणा अश्नुत इति। इतिशब्दो मन्त्रपरिसमा-प्त्यर्थ॥

सर्व एव वल्ल्यर्थ 'ब्रह्मविदाप्नोति परम्' इति ब्राह्मण

वाक्येन सूत्रित । स च सूत्रितोऽर्थ सक्षेपतो मन्त्रेण व्याख्यात । पुनस्तस्यैव विस्तरेणार्थनिर्णय कर्तव्य इत्युत्तरस्तद्वृत्तिस्थानीयो ग्रन्थ आरभ्यते—तस्माद्वा एतस्मादित्यादि । तत्र च 'सत्य ज्ञानमनन्त ब्रह्म' इत्युक्त मन्त्रादौ, तत्कथ सत्यमनन्त चेत्यत आह । त्रिविध ह्यानन्त्यम्—देशत कालतो वस्तुतश्चेति । तद्यथा—देशतोऽनन्त आकाश , न हि देशतस्तस्य परिच्छेदोऽस्ति । न तु कालतश्चानन्त्य वस्तुतश्च आकाशस्य । कस्मात् ? कार्यत्वात् । नैव ब्रह्मण आकाशवत्कालतोऽप्यन्तवत्त्वम्, अकार्यत्वात् । कार्य हि वस्तु कालेन परिच्छिद्यत । अकार्य च ब्रह्म । तस्मात्कालतोऽप्यानन्त्यम् । तथा वस्तुत । कथ पुनर्वस्तुत आनन्त्यम् ? सर्वानन्यत्वात् । भिन्न हि वस्तु वस्त्वन्तरस्य अन्तो भवति, वस्त्वन्तरबुद्धिर्हि प्रसक्ताद्वस्त्वन्तरान्निवर्तते । यतो यस्य बुद्धेर्निवृत्ति , स तस्यान्त । तद्यथा गोत्वबुद्धिरश्वत्वान्निवर्तत इत्यश्वत्वान्त गोत्वमित्यन्तवदेव भवति । स चान्तो भिन्नेषु वस्तुषु दृष्ट । नैव ब्रह्मणो भेद । अतो वस्तुतोऽप्यानन्त्यम् । कथ पुन सर्वानन्यत्व ब्रह्मण इति, उच्यते—सर्ववस्तुकारणत्वात् । सर्वेषा हि वस्तूना कालाकाशादीना कारण ब्रह्म । कार्यापेक्षया वस्तुतोऽन्तवत्त्वमिति चेत्, न, अनृ

तत्वात्कार्यस्य वस्तुन । न हि कारणव्यतिरेकेण कार्यं नाम वस्तुतोऽस्ति, यत कारणबुद्धिर्विनिवर्तेत, 'वाचारम्भण विकारो नामधेय मृत्तिकेत्येव सत्यम्' एव सदेव सत्यमिति श्रुत्यन्तरात्। तस्मादाकाशादिकारणत्वाद्देशतस्तावदनन्त ब्रह्म । आकाशो ह्यनन्त इति प्रसिद्ध देशत, तस्येद कारणम्, तस्मात्सिद्ध देशत आत्मन आनन्त्यम । न ह्यसर्वगतात्सर्वगतमुत्पद्यमान लोके किंचिद्दृश्यते । अतो निरतिशयमात्मन आनन्त्य देशत । तथा अकार्यत्वात्कालत, तद्भिन्नवस्त्वन्तराभावाच्च वस्तुत । अत एव निरतिशयसत्यत्वम ॥

तस्मात् इति मूलवाक्यसूत्रित ब्रह्म परामृश्यते, एतस्मात् इति मन्त्रवाक्येन अनन्तर यथालक्षितम । यद्ब्रह्म आदौ ब्राह्मणवाक्येन सूत्रितम, यच्च 'सत्य ज्ञानमनन्त ब्रह्म' इत्यनन्तरमेव लक्षितम, तस्मादेतस्माद्ब्रह्मण आत्मन आत्मशब्दवाच्यात्, आत्मा हि तत् सर्वस्य, 'तत्सत्य स आत्मा' इति श्रुत्यन्तरात्, अतो ब्रह्म आत्मा, तस्मादेतस्माद्ब्रह्मण आत्मस्वरूपात् आकाश सभूत समुत्पन्न । आकाशो नाम शब्दगुण अवकाशकरो मूर्तद्रव्याणाम । तस्मात् आकाशात् स्वेन स्पर्शगुणेन पूर्वेण च आकाशगुणेन शब्देन द्विगुण वायु, सभूत इत्यनुवर्तते । वायोश्च स्वेन रूपगुणेन पूर्वाभ्या च त्रि-

गुण अग्नि सभूत । अग्नेश्च स्वेन रसगुणेन पूर्वैश्च त्रिभि चतुर्गुणा आप सभूता । अद्भ्य स्वेन गन्धगुणेन पूर्वैश्च चतुर्भि पञ्चगुणा पृथिवी सभूता । पृथिव्या ओषधय । ओषधीभ्य अन्नम् । अन्नात् रेतोरूपेण परिणतात् पुरुष शिर पाण्याद्याकृतिमान् । स वै एष पुरुष अन्नरसमय अन्नरसविकार पुरुषाकृतिभावित हि सर्वेभ्योऽङ्गेभ्यस्तेज सभूत रेतो बीजम् । तस्माद्यो जायते, सोऽपि तथा पुरुषाकृतिरेव स्यात्, सर्वजातिषु जायमानाना जनकाकृतिनियमदर्शनात् । सर्वेषामप्यन्नरसविकारत्व ब्रह्मवश्यत्वे च अविशिष्टे, कस्मात्पुरुष एव गृह्यते ? प्राधान्यात् । किं पुन प्राधान्यम् ? कर्मज्ञानाधिकार । पुरुष एव हि शक्तत्वादर्थित्वादपर्युदस्तत्वाच्च कर्मज्ञानयोरधिक्रियते, 'पुरुषे त्वेवाविस्तरामात्मा स हि प्रज्ञानेन सपन्नतमो विज्ञात वदति विज्ञात पश्यति वेद श्वस्तन वेद लोकालोकौ मर्त्येनामृतमीक्षतीत्येव सपन्न , अथेतरेषा पशूनामशनायापिपासे एवाभिविज्ञानम्' इत्यादि श्रुत्यन्तरदर्शनात् ॥

स हि पुरुष इह विद्यया आन्तरतम ब्रह्म सक्रामयितुमिष्ट । तस्य च बाह्याकारविशेषेष्वनात्मसु आत्मभावितबुद्धि विना आलम्बनविशेष कचित् सहसा आन्तरतमप्रत्य-

गात्मविषया निरालम्बना च कर्तुमशक्येति दृष्टशरीरात्मसा मान्यकल्पनया शाखाचन्द्रनिदर्शनवद्न्त प्रवेशयन्नाह—तस्येदमेव शिर । तस्य अम्य पुरुषस्यान्नरसमयस्य इदमेव शिर प्रसिद्धम् । प्राणमयादिष्वशिरसा शिरस्त्वदर्शनादिहा पि तत्प्रसङ्गो मा भूदिति इदमेव शिर इत्युच्यते । एव प क्षादिषु योजना । अय दक्षिणो बाहु पूर्वाभिमुखस्य दक्षि ण पक्ष । अय सव्यो बाहु उत्तर पक्ष । अय मध्यमो देहभाग आत्मा अङ्गानाम्, 'मध्य ह्येषामङ्गानामात्मा' इति श्रुते । इदमिति नाभेरधस्ताद्यदङ्गम्, तत् पुच्छ प्रतिष्ठा । प्रतितिष्ठत्यनयेति प्रतिष्ठा । पुच्छमिव पुच्छम्, अधोलम्बन सामान्यात्, यथा गो पुच्छम् । एतत्प्रकृत्य उत्तरेषा प्राण मयादीना रूपकत्वसिद्धि, मूषानिषिक्तद्रुतताम्रप्रतिमावत् । तदप्येष श्लोको भवति । तत् तस्मिन्नेवार्थे ब्राह्मणोक्ते अन्न मयात्मप्रकाशके एष श्लोक मन्त्र भवति ॥

इति प्रथमानुवाकभाष्यम् ॥



द्वितीयोऽनुवाक. ॥

अन्नाद्वै प्रजाः प्रजायन्ते । याः काश्च पृथिवीꣳ श्रिताः । अथो अन्नेनैव जीवन्ति । अथैनदपि यन्त्यन्तत । अन्नꣳ हि भूतानाज्येष्ठम् । तस्मात्सर्वौषधमुच्यते । सर्वं वै तेऽन्नमाप्नुवन्ति । येऽन्न ब्रह्मोपासते । अन्नꣳ हि भूतानाज्येष्ठम् । तस्मात्सर्वौषधमुच्यते । अन्नाद्भूतानि जायन्ते । जातान्यन्नेन वर्धन्ते । अद्यतेऽत्ति च भूतानि । तस्मादन्न तदुच्यत इति । तस्माद्वा एतस्मादन्नरसमयात् । अन्योऽन्तर आत्मा प्राणमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वय पुरुषविधः । तस्य प्राण एव शिरः । व्यानो दक्षिणः पक्षः । अपान उत्तर पक्षः ।

आकाश आत्मा। पृथिवी पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति ॥ १ ॥

इति द्वितीयोऽनुवाक ॥

अन्नात् रसादिभावपरिणतात्, वै इति स्मरणार्थ, प्रजा स्थावरजङ्गमात्मका, प्रजायन्ते। या काश्च अविशिष्टा प्रथिवी श्रिता पृथिवीमाश्रिता, ता सर्वा अन्नादेव प्रजायन्ते। अथो अपि, जाता अन्नेनैव जीवन्ति प्राणान्धारयन्ति, वर्धन्त इत्यर्थ। अथ अपि, एनत् अन्नम्, अपियन्ति अपिगच्छन्ति, अपि शब्द प्रतिशब्दार्थे, अन्न प्रति लीयन्त इत्यर्थ, अन्तत अन्ते जीवनलक्षणाया वृत्ते परिसमाप्तौ। कस्मात्? अन्न हि यस्मात् भूताना प्राणिना ज्येष्ठ प्रथमजम्। अन्नमयादीना हि इतरेषा भूताना कारणमन्नम्, अत अन्नप्रभवा अन्नजीवना अन्नप्रलयाश्च सर्वा प्रजा। यस्माच्चैवम्, तस्मात् सर्वौषध सर्वप्राणिना देहदाहप्रशमनमन्नमुच्यते ॥

अन्नब्रह्मविद फलमुच्यते— सर्व वै ते समस्तमन्नजातम् आप्नुवन्ति। के? ये अन्न ब्रह्म यथोक्तम् उपासते। कथम्? अन्नजोऽन्नात्मान्नप्रलयोऽहम्, तस्मादन्न ब्रह्म इति। कुत पुन सर्वान्नप्राप्तिफलमन्नात्मोपासनमिति, उच्यते—

अन्न हि भूताना ज्येष्ठ भूतेभ्य पूर्वमुत्पन्नत्वाज्ज्येष्ठ हि यस्मात्, तस्मात्सर्वौषधमुच्यते, तस्मादुपपन्ना सर्वान्नात्मोपासकस्य सर्वान्नप्राप्ति । अन्नाद्भूतानि जायन्ते, जातान्यन्नेन वर्धन्ते इति उपसहारार्थं पुनर्वचनम् । इदानीमन्नशब्दनिर्वचनमुच्यते—अद्यते भुज्यते चैव यद्भूतै अत्ति च भूतानि स्वयम्, तस्मात् भूतैर्भुज्यमानत्वाद्भूतभोक्तृत्वाच्च अन्न तत् उच्यते । इतिशब्द प्रथमकोशपरिसमाप्त्यर्थ । अन्नमयादिभ्य आनन्दमयान्तेभ्य आत्मभ्य अभ्यन्तरतम ब्रह्म विद्यया प्रत्यगात्मत्वेन दिदर्शयिषु शास्त्रम् अविद्याकृतपञ्चकोशापनयनेन अनेकतुषकोद्रवविलुषीकरणेनेव तण्डुलान् प्रस्तौति—तस्माद्वा एतस्मादन्नरसमयादित्यादि । तस्माद्वै एतस्मात् यथोक्तात् अन्नरसमयात्पिण्डात् अन्य व्यतिरिक्त अन्तर अभ्यन्तर आत्मा पिण्डवदेव मिथ्यापरिकल्पित आत्मत्वेन प्राणमय, प्राण वायु, तन्मय तत्प्राय । तेन प्राणमयेन एष अन्नरसमय आत्मा पूर्ण वायुनेव इति । स वै एष प्राणमय आत्मा पुरुषविध एव पुरुषाकार एव शिर पक्षादिभि । किं स्वत एव ? नेत्याह— प्रसिद्ध तावदन्नरसमयस्यात्मन पुरुषविधत्वम्, तस्य अन्नरसमयस्य पुरुषविधता पुरुषाकारताम् अनु अय

प्राणमय पुरुषविध मूषानिषिक्तप्रतिमावत्, न स्वत एव। एव पूर्वस्य पूर्वस्य पुरुषविधता, तामनु उत्तरोत्तर पुरुष विधो भवति, पूर्व पूर्वश्चोत्तरोत्तरेण पूर्ण। कथ पुन पुरु षविधता अस्येति, उच्यते— तस्य प्राणमयस्य प्राण एव शिर प्राणमयस्य वायुविकारस्य प्राण मुखनासिकानि - सरणो वृत्तिविशेष शिर इति कल्प्यते, वचनात्। सर्वत्र वचनादेव पक्षादिकल्पना। व्यान व्यानवृत्ति दक्षिण पक्ष। अपान उत्तर पक्ष। आकाश आत्मा, य आका- शस्थो वृत्तिविशेष समानाख्य, स आत्मेव आत्मा प्राणवृ- त्त्यधिकारात्। मध्यस्थत्वादितरा पर्यन्ता वृत्तीरपेक्ष्य आ- त्मा, 'मध्य ह्येषामङ्गानामात्मा' इति प्रसिद्ध मध्यस्थ- स्यात्मत्वम्। पृथिवी पुच्छ प्रतिष्ठा। पृथिवीति पृथिवीदे- वता आध्यात्मिकस्य प्राणस्य धारयित्री स्थितिहेतुत्वात्। 'सैषा पुरुषस्यापानमवष्टभ्य' इति हि श्रुत्यन्तरम्। अन्यथा उदानवृत्त्या ऊर्ध्वगमन गुरुत्वात्पतन वा स्याच्छरीरस्य। तस्मात्पृथिवी देवता पुच्छ प्रतिष्ठा प्राणमयस्य आत्मन। तत् तस्मिन्नेवार्थे प्राणमयात्मविषये एष श्लोको भवति॥

इति द्वितीयानुवाकभाष्यम्॥

तृतीयोऽनुवाकः ॥

प्राण देवा अनु प्राणन्ति । मनुष्याः पशवश्च ये । प्राणो हि भूतानामायुः । तस्मात्सर्वायुषमुच्यते । सर्वमेव त आयुर्यन्ति । ये प्राण ब्रह्मोपासते । प्राणो हि भूतानामायु. । तस्मात्सर्वायुषमुच्यत इति । तस्यैष एव शारीर आत्मा । यः पूर्वस्य । तस्माद्वा एतस्मात्प्राणमयात् । अन्योऽन्तर आत्मा मनोमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविध । तस्य यजुरेव शिरः । ऋग्दक्षिण पक्षः । सामोत्तर. पक्ष. । आदेश आत्मा । अथर्वाङ्गिरसः पुच्छ प्रतिष्ठा । तदप्येष श्लोको भवति ॥ १ ॥

इति तृतीयोऽनुवाक. ॥

प्राण देवा अनु प्राणन्ति । अग्न्यादय दवा प्राण वाय्वात्मान प्राणनशक्तिमन्तम् अनु तदात्मभूता सन्त प्राणन्ति प्राणनकर्म कुर्वन्ति, प्राणनक्रियया क्रियावन्तो भवन्ति । अध्यात्माधिकारात् देवा इन्द्रियाणि प्राणमनु प्राणन्ति मुख्यप्राणमनु चेष्टन्त इति वा । तथा मनुष्या पशवश्च ये, ते प्राणनकर्मणैव चेष्टावन्तो भवन्ति । अतश्च नान्नमयेनैव परिच्छिन्नात्मना आत्मवन्त प्राणिन । कि तर्हि ? तदन्तर्गतप्राणमयेनापि साधारणेनैव सर्वपिण्डव्यापिना आत्मवन्तो मनुष्यादय । एव मनोमयादिभि पूर्वपूर्वव्यापिभि उत्तरोत्तरै सूक्ष्मै आनन्दमयान्तैराकाशादिभूतारब्धैरविद्याकृतै आत्मवन्त सर्वे प्राणिन , तथा, स्वाभाविकेनाप्याकाशादिकारणेन नित्येनाविकृतन सर्वगतेन सत्यज्ञानानन्तलक्षणेन पञ्चकोशातिगन सर्वात्मना आत्मवन्त , स हि परमार्थत आत्मा सर्वेषामित्येतदप्यर्थादुक्त भवति । प्राण दवा अनु प्राणन्तीत्याद्युक्तम्, तत्कस्मादित्याह—प्राण हि यस्मात् भूताना प्राणिनाम् आयु जीवनम्, 'यावद्धयस्मिञ्शरीरे प्राणो वसति तावदेवायु ' इति श्रुत्यन्तरात् । तस्मात् सर्वायुषम्, सर्वेषामायु सर्वायु, सर्वायुरेव सर्वायुषम् इत्युच्यते, प्राणापगमे मरणप्रसिद्धे । प्रसिद्ध हि लोके


सर्वायुष्ट्व प्राणस्य । अत अस्माद्बाह्यादसाधारणादन्नमयादात्मनोऽपक्रम्य अन्त साधारण प्राणमयमात्मान ब्रह्म उपासते ये 'अहमस्मि प्राण सर्वभूतानामात्मा आयु, जीव नहेतुत्वात्' इति, ते सर्वमेव आयु अस्मिँल्लोके यन्ति, नापमृत्युना म्रियन्ते प्राक्प्राप्तादायुष इत्यर्थ । शत वर्षाणीति तु युक्तम्, 'सर्वमायुरेति' इति श्रुतिप्रसिद्धे । किं कारणम्?—प्राणो हि भूतानामायु तस्मात्सर्वायुषमुच्यत इति । यो यद्गुणक ब्रह्मोपास्ते, स तद्गुणभाग्भवतीति विद्याफलप्राप्तेर्हेत्वर्थं पुनर्वचनम्— प्राणो हीत्यादि । तस्य पूर्वस्य अन्नमयस्य एष एव शरीरे अन्नमये भव शारीर आत्मा । कः य एष प्राणमय । तस्माद्वा एतस्मादित्याद्युक्तार्थमन्यत् । अन्योऽन्तर आत्मा मनोमय । मन इति सकल्पविकल्पात्मकमन्त करणम्, तन्मयो मनोमय, सोऽय प्राणमयस्याभ्यन्तर आत्मा । तस्य यजुरेव शिर । यजुरिति अनियताक्षरपादावसानो मन्त्रविशेष, तज्जातीय वचनो यजु शब्द, तस्य शिरस्त्वम्, प्राधान्यात् । प्राधान्य च यागादौ सानिपत्योपकारकत्वात् यजुषा हि हविर्दीयते स्वाहाकारादिना ॥

वाचनिकी वा शिरआदिकल्पना सर्वत्र । मनसो हि

स्थानप्रयत्ननादस्वरवर्णपदवाक्यविषया तत्सकल्पात्मिका तद्भाविता वृत्ति श्रोत्रकरणद्वारा यजु सकेतेन विशिष्टा यजुरित्युच्यते । एवम् ऋक्, एव साम च । एव च मनोवृत्तित्वे मन्त्राणाम्, वृत्तिरेव आवर्त्यत इति मानसो जप उपपद्यते । अन्यथा अविषयत्वान्मन्त्रो नावर्तयितु शक्य घटादिवत् इति मानसो जपो नोपपद्यते । मन्त्रावृत्तिश्चोद्यते बहुश कर्मसु । अक्षरविषयस्मृत्यावृत्त्या मन्त्रावृत्ति स्यात् इति चेत्, न, मुख्यार्थासभवात् । 'त्रि प्रथमाम वाह त्रिरुत्तमाम्' इति ऋगावृत्ति श्रूयते । तत्र ऋच अविषयत्वे तद्विषयस्मृत्यावृत्त्या मन्त्रावृत्तौ च क्रियमाणायाम् 'त्रि प्रथमामन्वाह' इति ऋगावृत्तिर्मुख्योऽर्थश्चोदित परित्यक्त स्यात् । तस्मान्मनोवृत्त्युपाधिपरिच्छिन्न मनोवृत्तिनिष्ठमात्मचैतन्यमनादिनिधन यजु शब्दवाच्यम् आत्मविज्ञान मन्त्रा इति । एव च नित्यत्वोपपत्तिर्वेदानाम् । अन्यथाविषयत्वे रूपादिवदनित्यत्व च स्यात्, नैतद्युक्तम् । 'सर्वे वेदा यत्रैक भवन्ति स मानसीन आत्मा' इति च श्रुति नित्यात्मनैकत्व ब्रुवन्ती ऋगादीना नित्यत्वे समञ्जसा स्यात् । 'ऋचोऽक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदु' इति च मन्त्रवर्ण । आदेश अत्र ब्राह्मणम्, आदेष्टव्यवि-

शेषानादिशतीति। अथर्वणाङ्गिरसा च दृष्टा मन्त्रा ब्राह्मण च शान्तिकपौष्टिकादिप्रतिष्ठाहेतुकर्मप्रधानत्वात् पुच्छ प्रतिष्ठा । तदर्थेष श्लोको भवति मनोमयात्मप्रकाशक पूर्ववत् ॥

इति तृतीयानुवाकभाष्यम् ॥



चतुर्थोऽनुवाक ॥

यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्द ब्रह्मणो विद्वान्। न बिभेति कदाचनेति। तस्यैष एव शारीर आत्मा। यः पूर्वस्य। तस्माद्वा एतस्मान्मनोमयात्। अन्योऽन्तर आत्मा विज्ञानमय। तेनैष पूर्ण। स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वय पुरुषविध। तस्य श्रद्धैव शिर'। ऋत दक्षिण पक्षः। सत्यमुत्तर पक्ष'। योग आत्मा। मह' पुच्छ प्रतिष्ठा। तदप्येष श्लोको भवति ॥ १ ॥

इति चतुर्थोऽनुवाक ॥

यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेत्यादि। तस्य पूर्वस्य प्राणमयस्य एष एव आत्मा शारीर शरीरे प्राणमये भव शारीर। क[१] य एष मनोमय। तस्माद्वा एतस्मा

दिति पूर्ववत् । अन्योऽन्तर आत्मा विज्ञानमय मनोमय-स्याभ्यन्तरो विज्ञानमय । मनोमयो वेदात्मा उक्त । वेदार्थविषया बुद्धिर्निश्चयात्मिका विज्ञानम्, तच्चाध्यवसायलक्षणमन्त करणस्य धर्म, तन्मय निश्चयविज्ञानै प्रमाणस्वरूपैर्निर्वर्तित आत्मा विज्ञानमय प्रमाणविज्ञानपूर्वको हि यज्ञादि तायते । यज्ञादिहेतुत्व च वक्ष्यति श्लोकेन । निश्चयविज्ञानवतो हि कर्तव्येष्वर्थेषु पूर्व श्रद्धा उपपद्यते । सा सवकर्तव्याना प्राथम्यात् शिर इव शिर । ऋतसत्ये यथाव्याख्याते एव । योग युक्ति समाधानम् आत्मैव आत्मा । आत्मवतो हि युक्तस्य समाधानवत अङ्गानीव श्रद्धादीनि यथार्थप्रतिपत्तिक्षमाणि भवन्ति । तस्मात्समाधान योग आत्मा विज्ञानमयस्य ।* मह पुच्छ प्रतिष्ठा । मह इति महत्तत्त्व प्रथमजम्, 'महद्यक्ष प्रथमज वेद' इति श्रुत्यन्तरात्, पुच्छ प्रतिष्ठा कारणत्वात् । कारण हि कार्याणा प्रतिष्ठा, यथा वृक्षवीरुधा प्रथिवी । सर्वविज्ञानाना च महत्तत्त्व कारणम् । तेन तद्विज्ञानमयस्यात्मन प्रतिष्ठा । तदप्येष श्लोको भवति पूर्ववत् । यथा अन्नमयादीना ब्राह्मणोक्ताना प्रकाशका श्लोका, एव विज्ञानमयस्यापि ॥

इति चतुर्थानुवाकभाष्यम् ॥

पञ्चमोऽनुवाक ॥

विज्ञान यज्ञ तनुते । कर्माणि तनुते-ऽपि च । विज्ञान देवा सर्वे । ब्रह्म ज्येष्ठ-मुपासते । विज्ञान ब्रह्म चेद्वेद । तस्माच्चेन्न प्रमाद्यति । शरीरे पाप्मनो हित्वा । सर्वा न्कामान्समश्नुत इति । तस्यैष एव शा रीर आत्मा । य पूर्वस्य । तस्माद्वा एत-स्माद्विज्ञानमयात् । अन्योऽन्तर आत्मा-नन्दमय । तनैष पूर्ण । स वा एष पुरुष विध एव । तस्य पुरुष विधताम् । अन्वय पुरुषविध । तस्य प्रियमेव शिर । मोदो दक्षिण' पक्ष' । प्रमोद उत्तर' पक्ष । आ-नन्द आत्मा । ब्रह्म पुच्छ प्रतिष्ठा । तद-प्येष श्लोको भवति ॥ १ ॥

इति पञ्चमोऽनुवाक ॥

विज्ञान यज्ञ तनुते, विज्ञानवान्हि यज्ञ तनोति श्रद्धापूर्वकम्, अतो विज्ञानस्य कर्तृत्व तनुत इति । कर्माणि च तनुते । यस्माद्विज्ञानकर्तृक सर्वम्, तस्माद्युक्त विज्ञानमय आत्मा ब्रह्मेति । किंच, विज्ञान ब्रह्म सर्वे देवा इन्द्रादय ज्येष्ठम्, प्रथमजत्वात्, सववृत्तीना वा तत्पूर्वकत्वात्प्रथमज विज्ञान ब्रह्म उपासते ध्यायन्ति, तस्मिन्विज्ञानमये ब्रह्मण्य भिमान कृत्वा उपासत इत्यर्थ । तस्मात्ते महता ब्रह्मण उपासनात् ज्ञानैश्वर्यवन्तो भवन्ति । तच्च विज्ञान ब्रह्म चेत् यदि वेद विजानाति, न केवल वेदैव, तस्मात् ब्रह्मण चेत् न प्रमाद्यति, बाह्येष्वनात्मस्वात्मा भावित, तस्मात्प्राप्त विज्ञानमये ब्रह्मण्यात्मभावनाया प्रमदनम्, तन्निवृत्त्यर्थमुच्यते— तस्माच्चेन्न प्रमाद्यतीति । अन्नमयादिष्वात्मभाव हित्वा केवले विज्ञानमये ब्रह्मण्यात्मत्व भावयन्नास्ते चेदित्यर्थ । तत किं स्यादिति, उच्यते— शरीरे पाप्मनो हित्वा, शरीराभिमाननिमित्ता हि सर्वे पाप्मान, तेषा च विज्ञानमये ब्रह्मण्यात्माभिमानात् निमित्तापाये हानमुपपद्यते, छत्रापाय इव च्छायाया । तस्मात् शरीराभिमाननिमित्तान्सर्वान पाप्मन शरीरप्रभवान् शरीरे एव हित्वा विज्ञानमय ब्रह्मस्वरूपापन्न तत्स्थान् सर्वान कामान् विज्ञानमयेनैवा-

त्मना समश्नुते सम्यग्भुङ्क्ते इत्यर्थः । तस्य पूर्वस्य मनोमयस्य आत्मा एष एव शरीरे मनोमये भव शारीरः । कः य एष विज्ञानमय । तस्माद्वा एतस्मादित्युक्तार्थम् । आनन्दमय इति कार्यात्मप्रतीतिः, अधिकारात् मयट्शब्दाच्च । अन्नादिमया हि कार्यात्मानो भौतिका इहाधिकृताः । तदधिकारपतितश्चायमानन्दमयः । मयट् चात्र विकारार्थे दृष्टः यथा अन्नमय इत्यत्र । तस्मात्कार्यात्मा आनन्दमय प्रत्येतव्यः । सक्रमणाच्च । 'आनन्दमयमात्मानमुपसक्रामति' इति वक्ष्यति । कार्यात्मना च सक्रमणमन्नात्मना दृष्टम् । सक्रमणकर्मत्वेन च आनन्दमय आत्मा श्रूयते, यथा 'अन्नमयमात्मानमुपसक्रामति' इति । न च आत्मन एवोपसक्रमणम्, अधिकारविरोधात् । असंभवाच्च । न ह्यात्मनैव आत्मन उपसक्रमणं संभवति, स्वात्मनि भेदाभावात्, आत्मभूतं च ब्रह्म सक्रमितुम् । शिरआदिकल्पनानुपपत्तेश्च । न हि यथोक्तलक्षणे आकाशादिकारणे अकार्यपतिते शिरआद्यवयवरूपकल्पना उपपद्यते । 'अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने' 'अस्थूलमनणु' 'नेति नेत्यात्मा' इत्यादिविशेषापोहश्रुतिभ्यश्च । मन्त्रोदाहरणानुपपत्तेश्च । न हि, प्रियशिरआद्यवयवविशिष्टे प्रत्यक्षतोऽनुभूय-

माने आनन्दमये आत्मनि ब्रह्मणि नास्ति ब्रह्मेत्याशङ्काभावात् 'असन्नेव स भवति असद्ब्रह्मेति वेद चेत्' इति मन्त्रोदाहरणमुपपद्यते । 'ब्रह्म पुच्छ प्रतिष्ठा' इत्यपि चानुपपन्न पृथग्ब्रह्मण प्रतिष्टात्वेन ग्रहणम् । तस्मात्कार्यपतित एवानन्दमय , न पर एवात्मा । आनन्द इति विद्याकर्मणो फलम् , तद्विकार आनन्दमय । स च विज्ञानमयादान्तर , यज्ञादिहेतोर्विज्ञानमयादस्यान्तरत्वश्रुते । ज्ञानकर्मणोर्हि फल भोक्त्रर्थत्वादान्तरतम स्यात् , आन्तरतमश्च आनन्दमय आत्मा पूर्वेभ्य । विद्याकर्मणो प्रियाद्यर्थत्वाच्च । प्रियादिप्रयुक्ते हि विद्याकर्मणी , तस्मात्प्रियादीना फलरूपाणामात्मसनिकर्षात् विज्ञानमयादस्याभ्यन्तरत्वमुपपद्यते , प्रियादिवासनानिर्वर्तितो ह्यात्मा आनन्दमयो विज्ञानमयाश्रित स्वप्ने उपलभ्यते । तस्य आनन्दमयस्यात्मन इष्टपुत्रादिदर्शनज प्रिय शिर इव शिर , प्राधान्यात् । मोद इति प्रियलाभनिमित्तो हर्ष । स एव च प्रकृष्टो हर्ष प्रमोद । आनन्द इति सुखसामान्यम् आत्मा प्रियादीना सुखावयवानाम् , तेष्वनुस्यूतत्वात् । आनन्द इति पर ब्रह्म , तद्धि शुभकर्मणा प्रत्युपस्थाप्यमाने पुत्रमित्रादिविषयविशेषोपाधौ अन्त करणवृत्तिविशेषे तमसा अप्रच्छाद्यमाने प्रसन्ने

अभिव्यज्यते । तद्विषयसुखमिति प्रसिद्ध लोके । तद्वृत्तिविशेषप्रत्युपस्थापकस्य कर्मणोऽनवस्थितत्वात् सुखस्य क्षणिकत्वम् । तद्यदन्तःकरण तपसा तमोघ्नेन विद्यया ब्रह्मचर्येण श्रद्धया च निर्मलत्वमापद्यते यावत्, तावत् विविक्ते प्रसन्ने अन्तःकरणे आनन्दविशेष उत्कृष्यते विपुलो भवति । वक्ष्यति च—'रसो वै सः, रसꣳ ह्येवाय लब्ध्वानन्दी भवति, एष ह्येवानन्दयाति, एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुत्यन्तरात् । एव च कामोपशमोत्कर्षापेक्षया शतगुणोत्तरोत्तरोत्कर्ष आनन्दस्य वक्ष्यते । एव च उत्कृष्यमाणस्य आनन्दमयस्यात्मन परमार्थब्रह्मविज्ञानापेक्षया ब्रह्म परमेव यत्प्रकृत सत्यज्ञानानन्तलक्षणम्, यस्य च प्रतिपत्त्यर्थं पञ्च अन्नादिमया कोशा उपन्यस्ता, यच्च तस्य आभ्यन्तरम्, येन च ते सर्वे आत्मवन्त, तत् ब्रह्म पुच्छ प्रतिष्ठा । तदेव च सर्वस्याविद्यापरिकल्पितस्य द्वैतस्य अवसानभूतम् अद्वैत ब्रह्म प्रतिष्ठा, आनन्दमयस्य एकत्वावसानत्वात् । अस्ति तदेकमविद्याकल्पितस्य द्वैतस्यावसानभूतमद्वैत ब्रह्म प्रतिष्ठा पुच्छम् । तदेतस्मिन्नप्यर्थे एष श्लोको भवति ॥

इति पञ्चमानुवाकभाष्यम् ॥

षष्ठोऽनुवाकः ॥

असन्नेव स भवति । असद्ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद्वेद । सन्तमेन ततो विदुरिति । तस्यैष एव शारीर आत्मा । य पूर्वस्य । अथातोऽनुप्रश्नाः । उताविद्वानमुं लोक प्रेत्य । कश्चन गच्छति ३ । आहो विद्वानमुं लोक प्रेत्य । काश्चित्समश्नुता ३ उ । सोऽकामयत । बहु स्या प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा । इदꣳ सर्वमसृजत । यदिद किंच । तत्सृष्ट्वा । तदेवानुप्राविशत् । तदनुप्रविश्य । सच त्यचाभवत् । निरुक्त चानिरुक्त च । निलयन चानिलयन च विज्ञान चाविज्ञान च । सत्य चानृत च सत्यमभवत् । यदिद किंच । तत्सत्यमि-

त्याचक्षते । तदप्येष श्लोको भवति ॥ १ ॥

इति षष्ठोऽनुवाक ॥

असन्नेव असत्सम एव, यथा असन् अपुरुषार्थसबन्धी, एव स भवति अपुरुषार्थसबन्धी । कोऽसौ ? य असन् अविद्यमान ब्रह्म इति वेद विजानाति चेत् यदि । तद्विपर्ययेण यत्सर्वविकल्पास्पद सर्वप्रवृत्तिबीज सर्वविशेषप्रत्यस्तमितमपि, अस्ति तत् ब्रह्म इति वेद चेत्, कुत पुनराशङ्का तन्नास्तित्व ? व्यवहारातीतत्व ब्रह्मण इति ब्रूम । व्यवहारविषये हि वाचारम्भणमात्रे अस्तित्वभावितबुद्धि तद्विपरीते व्यवहारातीते नास्तित्वमपि प्रतिपद्यते । यथा 'घटादिर्व्यवहारविषयतयोपपन्न सन, तद्विपरीत असन' इति प्रसिद्धम, एव तत्सामान्यादिहापि स्याद्ब्रह्मणो नास्तित्व प्रत्याशङ्का । तस्मादुच्यते— आस्ते ब्रह्मति चेद्वेदेति । कि पुन स्यात्तदस्तीति विजानत ? तदाह—सन्त विद्यमान ब्रह्मस्वरूपेण परमार्थसदात्मापन्नम् एनम एवविद विदु ब्रह्मविद । तत तस्मात् अस्तित्ववदनात् स अन्येषा ब्रह्मवद्विज्ञेया भवतीत्यथ । अथवा यो नास्ति ब्रह्मेति मन्यते, स सर्वस्यैव सन्मार्गस्य वर्णाश्रमादिव्यवस्थालक्षणस्य नास्तित्व प्रतिपद्यते, ब्रह्मप्रतिपत्त्यथत्वात्तस्य । अत नास्तिक स असन्

असाधुरुन्यते लोके । तद्विपरीत सन् य अस्ति ब्रह्मेति चेद्वेद, स तद्ब्रह्मप्रतिपत्तिहेतु सन्मार्गं वर्णाश्रमादिव्यवस्था-लक्षण श्रद्दधानतया यथावत्प्रतिपद्यते यस्मात्, तत तस्मात् सन्त साधुमार्गस्थम् एन विदु साधव । तस्मा दस्तीत्येव ब्रह्म प्रतिपत्तव्यमिति वाक्यार्थ । तस्य पूर्वस्य विज्ञानमयस्य एष एव शरीरे विज्ञानमये भव शारीर आत्मा । कोऽसौ ? य एष आनन्दमय । त प्रति नास्त्या शङ्का नास्तित्वे । अपोढसर्वविशेषत्वात्तु ब्रह्मणो नास्तित्व प्रत्याशङ्का युक्ता, सर्वसाम्याच्च ब्रह्मण । यस्मादेवम्, अत तस्मात् अथ अनन्तर श्रोतु शिष्यस्य अनुप्रश्ना आचार्योक्ति मनु एते प्रश्ना । सामान्य हि ब्रह्म आकाशादिकारणत्वात् विदुष अविदुषश्च, अत अविदुषोऽपि ब्रह्मप्राप्तिराशङ्क्यते — उत अपि अविद्वान् अमु लोक परमात्मानम् इत प्रेत्य कञ्चन, चनशब्द अप्यर्थे, अविद्वानपि गच्छति प्राप्नोति ? 'किं वा न गच्छति ?' इति द्वितीयोऽपि प्रश्नो द्रष्टव्य, अनुप्रश्ना इति बहुवचनात् । विद्वास प्रत्यन्यौ प्रश्नौ—यद्यविद्वान्सामान्य कारणमपि ब्रह्म न गच्छति, अतो विदुषोऽपि ब्रह्मागमनमा-शङ्क्यते, अतस्त प्रति प्रश्न — आहो विद्वानिति । उकार च वक्ष्यमाणमधस्तादपकृष्य तकार च पूर्वस्मादुतशब्दाद्या

सज्य आहो इत्येतस्मात्पूर्वमुतशब्द सयोज्य पृच्छति—उताहो विद्वानिति। विद्वान् ब्रह्मविदपि कश्चित् इत प्रेत्य अमु लोक समश्नुते प्राप्नोति। समश्नुते उ इत्येव स्थिते, अयादेशे य लोपे च कृते, अकारस्य प्रुति — समश्नुता ३ उ इति। विद्वान्समश्नुते अमु लोकम्, किं वा, यथा अविद्वान्, एव विद्वानपि न समश्नुते इत्यपर प्रश्न। द्वावेव वा प्रश्नौ विद्वदविद्वद्विषयौ, बहुवचन तु सामर्थ्यप्राप्तप्रश्नान्तरापेक्षया घटते। 'असद्ब्रह्मेति वेद चेत्' 'अस्ति ब्रह्मेति चेद्वेद' इति श्रवणादस्ति नास्तीति सशय। तत अर्थप्राप्त किमस्ति नास्तीति प्रथमोऽनुप्रश्न। ब्रह्मण अपक्षपातित्वात् अविद्वान्गच्छति न गच्छतीति द्वितीय। ब्रह्मण समत्वेऽपि अविदुष इव विदुषोऽप्यगमनमाशङ्क्य किं विद्वान्समश्नुते न समश्नुते इति तृतीयोऽनुप्रश्न॥

एतेषा प्रतिवचनार्थ उत्तरो ग्रन्थ आरभ्यते। तत्र अस्तित्वमव तावदुच्यते। यच्चोक्तम् 'सत्य ज्ञानमनन्त ब्रह्म' इति, तत्र च कथ सत्यत्वमित्येतदुक्तव्यमिति इदमुच्यत। सत्त्वोक्त्यैव सत्यत्वमुच्यते। उक्त हि सदेव सत्यमिति, तस्मात्सत्त्वोक्त्यैव सत्यत्वमुच्यते। कथमेवमर्थता अवगम्यते अस्य ग्रन्थस्य? शब्दानुगमात्। अनेनैव ह्यर्थेनान्वितानि उ-

त्तरवाक्यानि—'तत्सत्यमित्याचक्षते' 'यदेष आकाश आ नन्दो न स्यात्' इत्यादीनि । तत्र असदेव ब्रह्मेत्याशङ्क्यते । कस्मात्? यदस्ति, तद्विशेषतो गृह्यते, यथा घटादि । यन्नास्ति, तन्नोपलभ्यते, यथा शशविषाणादि । तथा नोपलभ्यते ब्रह्म, तस्माद्विशेषत अग्रहणान्नास्तीति । तन्न, आकाशादिकारणत्वाद्ब्रह्मण । न नास्ति ब्रह्म । कस्मात्? आकाशादि हि सर्वं कार्यं ब्रह्मणो जात गृह्यते, यस्माच्च जायते किंचित्, तदस्तीति दृष्ट लोके, यथा घटाङ्कुरादिकारण मृद्बीजादि, तस्मादाकाशादिकारणत्वादस्ति ब्रह्म । न चासतो जात किंचिद्दृश्यते लोके कार्यम् । असतश्चेन्नामरूपादि कार्यम्, निरात्मकत्वान्नोपलभ्येत, उपलभ्यते तु, तस्मादस्ति ब्रह्म । असतश्चेत्कार्यं गृह्यमाणमपि असदन्वितमेव स्यात्, न चैवम्, तस्मादस्ति ब्रह्म । तत्र 'कथमसत सज्जायेत' इति श्रुत्यन्तरमसत सज्जन्मासभवमन्वाचष्टे न्यायत । तस्मात्सदेव ब्रह्मेति युक्तम् । तद्यदि मृद्बीजादिवत् कारण स्यात्, अचेतन तर्हि । न कामयितृत्वात् । न हि कामयित्रचेतनमस्ति लोके । सवज्ञ हि ब्रह्मेत्यवोचाम, अत कामयितृत्वोपपत्ति । कामयितृत्वाद स्मदादिवदनाप्तकाममिति चेत्, न, स्वातन्त्र्यात् । यथा

अन्यान्परवशीकृत्य कामादिदोषा प्रवर्तयन्ति, न तथा ब्रह्मण प्रवर्तका कामा । कथ तर्हि ? सत्यज्ञानलक्षणा स्वात्मभूतत्वाद्विशुद्धा । न तैर्ब्रह्म प्रवर्त्यते, तेषा तु तत्प्रवर्तक ब्रह्म प्राणिकर्मापेक्षया । तस्मात्स्वातन्त्र्य कामेषु ब्रह्मण , अता न अनाप्तकाम ब्रह्म । साधनान्तरानपेक्षत्वाच्च । यथा अन्येषामनात्मभूता धर्मादिनिमित्तापेक्षा कामा स्वात्मव्यतिरिक्तकारकरणसाधनान्तरापेक्षाश्च, न तथा ब्रह्मण । किं तर्हि ? स्वात्मनोऽनन्या । तदेतदाह—सोऽकामयत । स आत्मा यस्मादाकाश सभूत , अकामयत कामितवान । कथम् ? बहु प्रभूत स्या भवेयम । कथमेकस्यार्थान्तराननुप्रवेशे बहुत्व स्यादिति, उच्यते—प्रजायेय उत्पद्येय । न हि पुत्रोत्पत्तेरिवार्थान्तरविषय बहुभवनम । कथ तर्हि ? आत्मस्थानभिव्यक्तनामरूपाभिव्यक्त्या । यदा आत्मस्थे अनभिव्यक्ते नामरूपे व्याक्रियेते, तदा आत्मस्वरूपापरित्यागेनैव ब्रह्मण अप्रविभक्तदेशकाले सर्वावस्थासु व्याक्रियेते । तदेतन्नामरूपव्याकरण ब्रह्मणो बहुभवनम् । नान्यथा निरवयवस्य ब्रह्मणो बहुत्वापत्तिरुपपद्यते अल्पत्व वा, यथा आकाशस्याल्पत्व बहुत्व च वस्त्वन्तरकृतमेव । अत तद्व्यारेणैवात्मा बहु भवति । न ह्यात्मनोऽन्यदनात्मभूत तत्प्रविभक्त-

देशकाल सूक्ष्म व्यवहित विप्रकृष्ट भूत भवद्भविष्यद्वा वस्तु विद्यते । अत नामरूपे सर्वावस्थे ब्रह्मणैवाव्याकृतवती । न ब्रह्म तदात्मकम् । ते तत्प्रत्याख्याने न स्त एवेति तदात्मके उच्येते । ताभ्या च उपाधिभ्या ज्ञातृज्ञेयज्ञानशब्दार्थादिसर्वव्यवहारभाग्ब्रह्म । स आत्मा एवकाम सन् तप अतप्यत । तप इति ज्ञानमुच्यते, 'यस्य ज्ञानमय तप' इति श्रुत्यन्तरात् । आप्तकामत्वाच्च इतरच्च असभव एव तपस । तत्तप अतप्यत तप्तवान्, सृज्यमानजगद्रचनादिविषयामालोचनामकरोदात्मेत्यर्थ । स एवमालोच्य तप तप्त्वा प्राणिकर्मादिनिमित्तानुरूपम् इद सर्व जगत् देशत कालत नाम्ना रूपेण च यथानुभव सर्वैं प्राणिभि सर्वावस्थैरनुभूयमानम् असृजत सृष्टवान् । यदिद किंच यत्किंचेदमविशिष्टम्, तत् इद जगत् सृष्ट्वा, किमकरोदिति, उच्यते— तदेव सृष्ट जगत् अनुप्राविशदिति ॥

तत्रैतच्चिन्त्यम्—कथमनुप्राविशदिति । किम्, य स्रष्टा, स तेनैवात्मनानुप्राविशत्, उत अन्येनेति ? किं तावद्युक्तम् ? क्त्वाप्रत्ययश्रवणात्, य स्रष्टा, स एवानुप्राविशदिति । ननु न युक्त मृद्बुद्धेत्कारण ब्रह्म, तदात्मकत्वात्कार्यस्य, कारणमेव हि कार्यात्मना परिणमते, अत अप्रविष्टस्यैव कार्योत्प

स्तेरूर्ध्वं पृथक्कारणस्य पुन प्रवेशोऽनुपपन्न । न हि घटपरिणामव्यतिरेकेण मृदो घट प्रवेशोऽस्ति । यथा घटे चूर्णात्मना मृदोऽनुप्रवेश , एवमनेन आत्मना नामरूपकार्ये अनुप्रवेश आत्मन इति चेत् , श्रुत्यन्तराच्च 'अनेन जीवेनात्मनानुप्रविश्य' इति, नैव युक्तम्, एकत्वाद्ब्रह्मण । मृदात्मनस्त्वनेकत्वात् सावयवत्वाच्च युक्तो घटे मृदश्चूर्णात्मनानुप्रवेश , मृदश्चूर्णस्य अप्रविष्टदशत्वाच्च । न त्वात्मन एकत्व सति निरवयवत्वादप्रविष्टदेशाभावाच्च प्रवेश उपपद्यते, कथ तर्हि प्रवेश स्यात्' युक्तश्च प्रवेश , श्रुतत्वात्— 'तदवानुप्राविशत्' इति । सावयवमात्मा तु, तर्हि सावयवत्वात् मुखे हस्तप्रवेशवत् नामरूपकार्ये जीवात्मनानुप्रवेश युक्त एवेति चेत्, न, अशून्यदेशत्वात् । न हि कार्यात्मना परिणतस्य नामरूपकार्यदेशव्यतिरेकेण आत्मशून्य प्रदशोऽस्ति य प्रविशज्जीवात्मना । कारणमेव चेत्प्रविशेत्, जीवात्मत्व जह्यात् यथा घटो मृत्प्रवेशे घटत्व जहाति । 'तदवानुप्राविशत्' इति च श्रुतर्न कारणानुप्रवेशो युक्त । कार्यान्तरमेव स्यादिति चेत् — तदेवानुप्राविशदिति जीवात्मरूप कार्य नामरूपपरिणत कार्यान्तरमेव आपद्यत इति चेत्, न, विरोधात् । न हि घटो घटान्तरमापद्यते, व्यतिरेकश्रुतिविरोधाच्च । जीवस्य

नामरूपकार्यव्यतिरेकानुवादिन्य श्रुतयो विरुध्येरन्, तदापत्तौ माक्षात्मभवाच्च । न हि यतो मुच्यमान, तदेव आपद्यते । न हि शृङ्खलापत्ति बद्धस्य तस्करादे । बाह्यान्तर्भेदेन परिणतमिति चेत्—तदेव कारण ब्रह्म शरीराद्याधारत्वन तदन्तर्जीवात्मना आधेयत्वेन च परिणतमिति चेत्, न, बहिष्ठस्य प्रवेशोपपत्ते । न हि यो यस्यान्त स्थ स एव तत्प्रविष्ट उच्यते । बहिष्ठस्यानुप्रवेश स्यात्, प्रवेशशब्दाथस्यैव दृष्टत्वात्—यथा गृह कृत्वा प्राविशदिति । जलसूर्यकादिप्रतिबिम्बवत् प्रवेश स्यादिति चेत्, न, अपरिच्छिन्नत्वादमूर्तत्वाच्च । परिच्छिन्नस्य मूर्तस्यान्यस्य अन्यत्र प्रसादस्व भावके जलादौ सूर्यकादिप्रतिबिम्बोदय स्यात्, न त्वात्म न, अमूर्तत्वात्, आकाशादिकारणस्य आत्मन व्यापकत्वात् । तद्विप्रकृष्टदेशप्रतिबिम्बाधारवस्त्वन्तराभावाच्च प्रतिबिम्बवत्प्रवेशो न युक्त । एव तर्हि नैवास्ति प्रवेश, न च गत्यन्तरमुपलभामहे, 'तदेवानुप्राविशत्' इति श्रुते । श्रुतिश्च नोऽतीन्द्रियविषये विज्ञानोत्पत्तौ निमित्तम् । न चास्माद्वाक्यात् यत्नवतामपि विज्ञानमुत्पद्यते । हन्त तह्यनर्थकत्वादपोह्यमेतद्वाक्यम् 'तत्सृष्ट्वा तदेवानुप्राविशत्' इति, न, अन्यार्थत्वात् । किमर्थमस्थाने चर्चा? प्रकृतो ह्यन्यो

विवक्षितोऽस्य वाक्यार्थ अस्ति, स ज्ञातव्य — 'ब्रह्मवि-दाप्नोति परम्' 'सत्य ज्ञानमनन्त ब्रह्म' 'यो वेद निहित गुहायाम्' इति । तद्विज्ञान च विवक्षितम्, प्रकृत च तत् । ब्रह्मस्वरूपावगमाय च आकाशाद्यन्नमयान्त कार्य प्रदर्शि-तम्, ब्रह्मावगमश्च आरब्ध । तत्र अन्नमयादात्मनोऽन्यो-ऽन्तर आत्मा प्राणमय, तदन्तमनोमयो विज्ञानमय इति विज्ञानगुहाया प्रवेशित, तत्र च आनन्दमयो विशिष्ट आत्मा प्रदर्शित । अत परमानन्दमयलिङ्गाधिगमद्वारेण आनन्दविवृद्धयवसान आत्मा । ब्रह्म पुच्छ प्रतिष्ठा सर्वावि कल्पास्पदो निर्विकल्पोऽस्यामेव गुहायामधिगन्तव्य इति तत्रवश प्रकल्प्यत । न ह्यन्यत्रोपलभ्यते ब्रह्म, निर्विशेष त्वात्, विशेषसम्बन्धा ह्युपलब्धिहेतुर्दृष्ट — यथा राहोश्चन्द्रा र्कविशेषसम्बन्ध । एवमन्त करणगुहात्मसम्बन्धो ब्रह्मण उप लब्धिहेतु, सन्निकर्षात्, अवभासात्मकत्वाच्च अन्त कर णस्य । यथा च आलोकविशिष्टचक्षुषोपलब्धि एव बुद्धि-रूपयालोकविशिष्टात्मोपलब्धि स्यात्, तस्मात् उपलब्धि हेतौ गुहाया निहितमिति प्रकृतमत्र । तद्वृत्तस्थानीये त्विह पुनस्तत्सृष्ट्वा तत्रैवानुप्राविशदित्युच्यते ॥

तदेवेदमाकाशादिकारण कार्य सृष्ट्वा तदनुप्रविष्टमिवान्त-

र्गुहाया बुद्धौ द्रष्टृ श्रोतृ मन्तृ विज्ञात्रित्येव विशेषवदुपल-भ्यते। स एव तस्य प्रवेश, तस्मादस्ति तत्कारण ब्रह्म। अत अस्तित्वादस्तीत्येवोपलब्धव्य तत्। तत् कार्यमनुप्र विश्य, किम्[2] सच्च मूर्त त्यच्च अमूर्तम् अभवत्। मूर्तामूर्ते ह्यव्याकृतनामरूपे आत्मस्थे अन्तर्गतेन आत्मना व्याक्रियेते मूर्तामूर्तशब्दवाच्ये। ते आत्मना त्वप्रविभक्तदेशकाले इति कृत्वा आत्मा ते अभवदित्युच्यते। किं च, निरुक्त चानि रुक्त च, निरुक्त नाम निष्कृष्य समानासमानजातीये-भ्य देशकालविशिष्टतया इद तदित्युक्तम्, अनिरुक्त तद्विपरीतम्, निरुक्तानिरुक्ते अपि मूर्तामूर्तयोरेव विशेषणे। यथा सच्च त्यच्च प्रत्यक्षपरोक्ष, तथा निलयन चानिलयन च। निल-यन नीडम् आश्रय मूर्तस्यैव धम, अनिलयन तद्विपरीतम् अमूर्तस्यैव धम। त्यदनिरुक्तानिलयनानि अमूर्तधर्मत्वेऽपि व्याकृतविषयाण्येव, सर्गोत्तरकालभावश्रवणात्। त्यदिति प्राणाद्यनिरुक्त तदेवानिलयन च। अता विशषणानि अमू र्तस्य व्याकृतविषयाण्येवैतानि। विज्ञान चेतनम्, अविज्ञान तद्रहितमचेतन पाषाणादि। सत्य च व्यवहारविषयम्, अ धिकारात्, न परमार्थसत्यम्, एकमेव हि परमार्थसत्य ब्रह्म। इह पुन व्यवहारविषयमापेक्षिक सत्यम, मृगतृष्णि

काद्यनृतापेक्षया उदकादि सत्यमुच्यते । अनृत च तद्विपरीतम् । किं पुनः एतत्सर्वमभवत्, सत्य परमार्थसत्यम्, किं पुनस्तत्? ब्रह्म, 'सत्य ज्ञानमनन्त ब्रह्म' इति प्रकृतत्वात् । यस्मात् सत्यादिकं मूर्तामूर्तधर्मजातं यत्किंचेद सर्वमविशिष्ट विकारजातमेकमेव सच्छब्दवाच्य ब्रह्माभवत्, तद्व्यतिरेकेणाभावान्नामरूपविकारस्य, तस्मात् तत् ब्रह्म सत्यमित्याचक्षते ब्रह्मविद । अस्ति नास्तीत्यनुप्रश्न प्रकृत, तस्य प्रतिवचनविषये एतदुक्तम्—'आत्माकामयत बहु स्याम्' इति । स यथाकाम च आकाशादिकार्य सत्यादिलक्षण सृष्ट्वा तदनुप्रविश्य पश्यञ्शृण्वन्मन्वानो विजानन ब्रह्मभवत्, तस्मात् तदेवेदमाकाशादिकारण कार्यस्थ परमे व्योमन् हृदयगुहाया निहित तत्प्रत्ययावभासविशेषेणोपलभ्यमानमस्तीत्येव विजानीयादित्युक्त भवति । तत् एतस्मिन्नर्थे ब्राह्मणोक्ते एष श्लोक मन्त्र भवति । यथा पूर्वेष्वन्नमयाद्यात्मप्रकाशका पञ्चस्वपि, एव सर्वान्तरतमात्मास्तित्वप्रकाशकोऽपि मन्त्र कार्यद्वारेण भवति ॥

इति षष्ठानुवाकभाष्यम् ॥



परिग्रहण स 10368
ग्रन्थालय, क उ ति शि संस्थान
सारनाथ, वाराणसी

सप्तमोऽनुवाकः ॥

असद्वा इदमग्र आसीत् । ततो वै सदजायत । तदात्मानꣳ स्वयमकुरुत । तस्मात्तत्सुकृतमुच्यत इति । यद्वै तत्सुकृतम् । रसो वै सः । रसꣳ ह्येवाय लब्ध्वानन्दी भवति । को ह्येवान्यात्कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात् । एष ह्येवानन्दयाति । यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभय प्रतिष्ठा विन्दते । अथ सोऽभय गतो भवति । यदा ह्येवैष एतस्मिन्नुदरमन्तर कुरुते । अथ तस्य भय भवति । तत्त्वेव भय विदुषो मन्वानस्य । तदप्येष श्लोको भवति ॥ १ ॥

इति सप्तमोऽनुवाक ॥

असद्वा इदमग्र आसीत्। असदिति व्याकृतनामरूप विशेषविपरीतरूपम् अव्याकृत ब्रह्म उच्यते, न पुनरत्यन्त मेवासत्। न ह्यसत सज्जन्मास्ति। इदम् इति नामरूपविशेषवद्व्याकृत जगत्, अग्रे पूर्व प्रागुत्पत्ते ब्रह्मैव असच्छब्दवाच्यमासीत्। तत असत वै सत् प्रविभक्तनामरूपविशेषम् अजायत उत्पन्नम्। किं तत प्रविभक्त कार्यमिति—पितुरिव पुत्र ? नेत्याह। तत् असच्छब्दवाच्य स्वयमेव आत्मानमेव अकुरुत कृतवत्। यस्मादेवम्, तस्मात् तत् ब्रह्मैव सुकृत स्वय कर्तृ उच्यते। स्वय कर्तृ ब्रह्मेति प्रसिद्ध लोके सर्वकारणत्वात्। यस्माद्वा स्वयमकरोत्सर्वं सर्वात्मना, तस्मात्पुण्यरूपेणापि तदेव ब्रह्म कारण सुकृतम् उच्यते। सर्वथापि तु फलसबन्धादिकारण सुकृतशब्दवाच्य प्रसिद्ध लोके। यदि पुण्य यदि वा अन्यत् सा प्रसिद्धि नित्ये चेतनकारणे सति उपपद्यते, तस्मादस्ति ब्रह्म, सुकृतप्रसिद्धेरिति। इतश्चास्ति, कुत ? रसत्वात्। कुतो रसत्वप्रसिद्धिर्ब्रह्मण इत्यत आह— यद्वै तत्सुकृत रसो वै स। रसो नाम तृप्तिहेतु आनन्दकरो मधुराम्लादि प्रसिद्धो लोके। रसमेव हि अय लब्ध्वा प्राप्य आनन्दी सुखी भवति। नासत आनन्दहेतुत्व दृष्ट लोके। बाह्यानन्दसाधनरहिता अपि अनीहा निरेषणा ब्राह्मणा बाह्यरस-

लाभादिव सानन्दा दृश्यन्ते विद्वास , नून ब्रह्मैव रसस्तेषाम् । तस्मादस्ति तत्तेषामानन्दकारण रसवद्ब्रह्म । इतश्चास्ति , कुत ? प्राणनादिक्रियादर्शनात् । अयमपि हि पिण्डो जीवत प्राणेन प्राणिति अपानेन अपानिति । एव वायवीया ऐन्द्रियकाश्च चेष्टा सहतै कायकरणैर्निर्वर्त्यमाना दृश्यन्ते । तच्चैकार्थवृत्तित्वेन सहनन नान्तरेण चेतनमसहत स भवति, अन्यत्रादर्शनात् । तदाह—यत् यदि एष आकाशे परमे व्योम्नि गुहाया निहित आनन्दो न स्यात् न भवेत, को ह्येव लोके अन्यात् अपानचेष्टा कुर्यादित्यर्थ । क प्राण्यात् प्राणन वा कुर्यात्, तस्मादस्ति तद्ब्रह्म , यदर्था कार्य करणप्राणनादिचेष्टा , तत्कृत एव च आनन्दो लोकस्य । कुत ? एष ह्येव पर आत्मा आनन्दयाति आनन्दयति सुखयति लोक धर्मानुरूपम । स एवात्मा आनन्दरूपोऽविद्यया परिच्छिन्नो विभाव्यते प्राणिभिरित्यर्थ । भयाभयहेतुत्वाद्विद्वदविदुषारस्ति तद्ब्रह्म । सद्वस्त्वाश्रयणेन हि अभय भवति , नासद्वस्त्वाश्रयणेन भयनिवृत्तिरुपपद्यते । कथमभयहेतुत्वमिति, उच्यते— यदा ह्येव यस्मात् एष साधक एतस्मिन् ब्रह्मणि— किंविशिष्टे ? अदृश्ये दृश्य नाम द्रष्टव्य विकार , दर्शनार्थत्वाद्विकारस्य , न दृश्यम् अदृश्यम् , अविकार

इत्यर्थ । एतस्मिन्नदृश्य अविकारेऽविषयभूते, अनात्म्ये अशरीरे यस्माददृश्य तस्मादनात्म्यम्, यस्मादनात्म्य तस्मान्निरुक्तम्, विशेषो हि निरुच्यते, विशेषश्च विकार, अविकार च ब्रह्म, सर्वविकारहेतुत्वात् तस्मात् अनिरुक्तम् । यत एवम् तस्मादनिलयन निलयन नीड आश्रय न निलयनम् अनिलयनम् अनाधार तस्मिन् एतस्मिन् अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने सर्वकार्यधर्मविलक्षण ब्रह्मणीति वाक्यार्थ । अभयमिति क्रियाविशेषणम् । अभयामिति वा लिङ्गान्तर परिणम्यत । प्रतिष्ठा स्थितिमात्मभाव विन्दते लभते । अथ तदा स तस्मिन्नानात्वस्य भयहेतोरविद्याकृतस्यादर्शनादभय गतो भवति । स्वरूपप्रतिष्ठो ह्यसौ यदा भवति, तदा नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति । अन्यस्य ह्यन्यतो भय भवति, न आत्मन एव आत्मनो भय युक्तम्, तस्मात् आत्मैव आत्मन अभयकारणम् । सर्वतो हि निर्भया ब्राह्मणा दृश्यन्ते सत्सु भयहेतुषु, तच्चायुक्तमसति भयत्राणे ब्रह्मणि । तस्मात्तेषामभयदर्शनादस्ति तदभयकारण ब्रह्मेति । कदा असौ अभय गतो भवति साधक ? यदा नान्यत्पश्यति आत्मनि च अन्तर भेद न कुरुते, तदा अभय गतो भवतीत्यभिप्राय । यदा पुनरविद्यावस्थाया हि यस्मात् एष अविद्या

वान् अविद्यया प्रत्युपस्थापित वस्तु तैमिरिकद्वितीयचन्द्रव-त्पश्यत्यात्मनि च एतस्मिन् ब्रह्मणि, उत अपि, अरम् अल्प-मपि, अन्तर छिद्र भेददर्शन कुरुते , भेददर्शनमेव हि भयका-रणम् , अल्पमपि भेद पश्यतीत्यर्थ । अथ तस्माद्भेददर्शनाद्धेतो तस्य भेददर्शिन आत्मनो भय भवति । तस्मादात्मैवात्मनो भयकारणमविदुष , तदेतदाह—तत् ब्रह्म त्वेव भय भेददर्शि-नो विदुष ईश्वरोऽ यो मत्त अहमन्य ससारीत्येवाविदुष भेददृष्टमीश्वराख्य तदेव ब्रह्म अल्पमप्य तर कुर्वत भय भवति एकत्वेन अमन्वानस्य। तस्मात् विद्वानप्यविद्वानेवासौ, योऽय-मेकमभिन्नमात्मतत्त्व न पश्यति । उच्छेदहेतुदर्शनाद्ध्युच्छे-द्याभिमतस्य भय भवति, अनुच्छेद्यो ह्युच्छेदहेतु , तत्र अ सत्युच्छेदहेतौ उच्छेद्ये न तद्दर्शनकार्य भय युक्तम् । सर्वं च जगद्भयवद्दृश्यते । तस्माज्जगतो भयदर्शनाद्बिभ्यते—नून तद-स्ति भयकारणमुच्छेदहेतुरनुच्छेद्यात्मकम् , यतो जगद्बिभेती ति । तत् एतस्मिन्नप्यर्थे एष श्लोक भवति ॥

इति सप्तमानुवाकभाष्यम् ॥



अष्टमोऽनुवाक. ॥

भीषास्माद्वात पवते । भीषोदेति सूर्य. । भीषास्मादग्निश्चेन्द्रश्च । मृत्युर्धावति पञ्चम इति । सैषानन्दस्य मीमांसा भवति । युवा स्यात्साधुयुवाध्यायक । आशिष्ठो दृढिष्ठो बलिष्ठ. । तस्येय पृथिवी सर्वा वित्तस्य पूर्णा स्यात् । स एको मानुष आनन्दः । ते ये शत मानुषा आनन्दा' ॥ १ ॥

स एको मनुष्यगन्धर्वाणामानन्द । श्रोत्रियस्य चाकामहतस्य । ते ये शत मनुष्यगन्धर्वाणामानन्दाः । स एको देवगन्धर्वाणामानन्द । श्रोत्रियस्य चाकामहतस्य । ते ये शत देवगन्धर्वाणामानन्दा. । स एक. पितृणा चिरलोकलोका-

नामानन्द' । श्रोत्रियस्य चाकामहतस्य । ते ये शत पितृणा चिरलोकलोकानामानन्दा । स एक आजानजाना देवानामानन्द. ॥ २ ॥

श्रोत्रियस्य चाकामहतस्य । ते ये शतमाजानजाना देवानामानन्दा । स एकः कर्मदेवाना देवानामानन्द' । ये कर्मणा देवानपियन्ति । श्रोत्रियस्य चाकामहतस्य । ते ये शत कर्मदेवाना देवानामानन्दा' । स एको देवानामानन्द । श्रोत्रियस्य चाकामहतस्य । ते ये शत देवानामानन्दा । स एक इन्द्रस्यानन्द ॥ ३ ॥

श्रोत्रियस्य चाकामहतस्य । ते ये शतमिन्द्रस्यानन्दा । स एको बृहस्पतेरानन्द' । श्रोत्रियस्य चाकामहतस्य । ते ये शत बृहस्पतेरानन्दा । स एकः प्रजाप

तेरानन्द.। श्रोत्रियस्य चाकामहतस्य। ते ये शत प्रजापतेरानन्दा। स एको ब्रह्मण आनन्द। श्रोत्रियस्य चाकामहतस्य॥ ४॥

भीषा भयेन अस्मात् वात पवते। भीषोदेति सूर्य। भीषा अस्मात् अग्निश्चेन्द्रश्च। मृत्युर्धावति पञ्चम इति। वातादयो हि महार्हा स्वयमीश्वरा सन्त पवनादिकार्येष्वायासबहुलेषु नियता प्रवर्तन्ते, तद्युक्त प्रशास्तरि सति, यस्मात् नियमेन तेषा प्रवर्तनम्, तस्मादस्ति भयकारण तेषा प्रशास्तृ ब्रह्म। यतस्ते भृत्या इव राज्ञ अस्मात् ब्रह्मण भयेन प्रवर्तन्ते तच्च भयकारणमानन्द ब्रह्म। तस्य अस्य ब्रह्मण आनन्दस्य एषा मीमासा विचारणा भवति। किमानन्दस्य मीमास्यमिति, उच्यते— किमानन्दो विषयविषयिसब धजनित लौकिकानन्दवत्, आहोस्वित् स्वाभाविक, इत्यवमेषा आनन्दस्य मीमासा॥

तत्र लौकिक आनन्दो बाह्याध्यात्मिकसाधनसपत्तिनिमित्त उत्कृष्ट। स य एष निर्दिश्यते ब्रह्मानन्दानुगमार्थम्। अनेन हि प्रसिद्धेन आनन्देन व्यावृत्तविषयबुद्धिगम्य

आनन्दोऽनुगन्तु शक्यते । लौकिकोऽप्यानन्द ब्रह्मानन्द स्यैव मात्रा, अविद्यया तिरस्क्रियमाणे विज्ञाने उत्कृष्यमा णाया च अविद्याया ब्रह्मादिभि कर्मवशात् यथाविज्ञान विषयादिसाधनसबन्धवशाच्च विभाव्यमानश्च लोकेऽनव स्थितो लौकिक सपद्यते, स एव अविद्याकामकर्मापकर्षेण मनुष्यगन्धर्वाद्युत्तरोत्तरभूमिषु अकामहतविद्वच्छ्रोत्रियप्रत्यक्षो विभाव्यते शतगुणोत्तरोत्तरोत्कर्षेण यावद्धिरण्यगर्भस्य ब्र ह्मण आनन्द इति ॥

निरस्ते त्वविद्याकृते विषयविषयिविभागे, विद्यया स्वाभा विक परिपूर्ण एक आनन्द अद्वैत भवतीत्येतमर्थ विभावयिष्यन्नाह—युवा प्रथमवया, साधुयुवेति साधु श्चासौ युवा चेति यूनो विशेषणम्, युवाप्यसाधुर्भवति सा धुरप्ययुवा, अतो विशेषण युवा स्यात्साधुयुवेति, अध्या यक अधीतवेद । आशिष्ठ आशास्तृतम, दृढिष्ठ दृढ तम, बलिष्ठ बलवत्तम, एवमाध्यात्मिकसाधनसपन्न । तस्येय पृथिवी उर्वी सर्वा वित्तस्य वित्तेनोपभोगसाधनेन दृष्टार्थेनादृष्टार्थेन च कर्मसाधनेन सपन्ना पूर्णा राजा पृथि वीपतिरित्यर्थ । तस्य च य आनन्द, स एक मानुष मनु ष्याणा प्रकृष्ट एक आनन्द । ते ये शत मानुषा आनन्दा,

स एको मनुष्यगन्धर्वाणामानन्द , मानुषानन्दात् शतगुणेनोत्कृष्ट मनुष्यगन्धर्वाणामानन्द भवति । मनुष्या सन्त कर्मविद्याविशेषात् गन्धर्वत्व प्राप्ता मनुष्यगन्धर्वा । ते ह्यन्तर्धानादिशक्तिसपन्ना सूक्ष्मकार्यकरणा , तस्मात्प्रतिघातालपत्व तेषा द्वन्द्वप्रतिघातशक्तिसाधनसपत्तिश्च । तत अप्रतिहन्यमानस्य प्रतीकारवत मनुष्यगन्धर्वस्य स्याच्चित्तप्रसाद । तत्प्रसादविशेषात्सुखविशेषाभिव्यक्ति । एव पूर्वस्या पूर्वस्या भूमेरुत्तरस्यामुत्तरस्या भूमौ प्रसादविशेषत शतगुणेन आनन्दोत्कर्ष उपपद्यते । प्रथम तु अकामहताग्रहण मनुष्यविषयभोगकामानभिहतस्य श्रोत्रियस्य मनुष्यानन्दात् शतगुणत आनन्दोत्कष मनुष्यगन्धर्वण तुल्यो वक्तव्य इत्येवमर्थम । साधुयुवा अध्यायक इति श्रोत्रियत्वाव्रजिनत्वे गृह्यते । त ह्यविशिष्टे सर्वत्र । अकामहतत्व तु विषयोत्कषापकषत सुखोत्कषापकषाय विशेष्यत । अत अकामहतग्रहणम , तद्विशषत शतगुणसुखात्कर्षोपलब्ध अकामहतत्वस्य परमानन्दप्राप्तिसाधनत्वविधानार्थम । व्याख्यातमन्यत् । देवगन्धर्वा जातित एव । चिरलोकलोकानामिति पितृणा विशेषणम । चिरकालस्थायी लोको येषा पितृणाम्, त चिरलोकलोका इति । आजान इति देवलोक तस्मिन्नाजाने

जाता आजानजा देवा, स्मार्तकर्मविशेषतो देवस्थानषु जाता । कर्मदेवा ये वैदिकेन कर्मणा अग्निहोत्रादिना केवलेन देवानपियन्ति । देवा इति त्रयस्त्रिंशद्धविर्भुज, इन्द्रस्तेषा स्वामी, तस्य आचार्यो बृहस्पति । प्रजापति विराट् त्रैलोक्यशरीरो ब्रह्मा समष्टिव्यष्टिरूप ससारमण्डलव्यापी । यवैते आनन्दभेदा एकता गच्छन्ति, धर्मश्च तन्निमित्त ज्ञान च तद्विषयम् अकामहतत्व च निरतिशय यत्र, स एष हिरण्यगर्भो ब्रह्मा, तस्यैष आनन्द श्रोत्रियेण अवृजिनेन अकामहतेन च सर्वत प्रत्यक्षमुपलभ्यत । तस्मादेतानि त्रीणि साधनानीत्यवगम्यते । तत्र श्रोत्रियत्वावृजिनत्वे नियते, अकामहतत्व तु उत्कृष्यत इति प्रकृष्टसाधनता अवगम्यते । तस्य अकामहतत्वप्रकर्षतश्चोपलभ्यमान श्रोत्रियप्रत्यक्षो ब्रह्मण आनन्द यस्य परमानन्दस्य मात्रा एक देश, 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुत्यन्तरात् । स एष आनन्द —यस्य मात्रा समुद्राम्भस इव विप्रुष प्रावभक्ता यत्रैकता गता —स एष परमानन्द स्वाभाविक, अद्वैतात्, आनन्दानन्दिनोश्च अविभागोऽत्र ॥

स यश्चाय पुरुषे । यश्चासावादित्ये ।
स एक. । स य एवंवित् । अस्माल्लोका-

त्प्रेत्य । एतमन्नमयमात्मानमुपसक्रामति । एत प्राणमयमात्मानमुपसक्रामति । एत मनोमयमात्मानमुपसक्रामति । एत विज्ञानमयमात्मानमुपसक्रामति । एतमानन्दमयमात्मानमुपसक्रामति । तदप्येष श्लोको भवति ॥ ८ ॥

इति अष्टमोऽनुवाक ॥

तदेतन्मीमासाफलमुपसंहियते——स यश्चाय पुरुष इति । य गुहाया निहित परमे व्योम्नि आकाशादिकार्य सृष्ट्वा अन्नमयान्तम्, तदेवानुप्रविष्ट, स य इति निश्चीयते । कोऽसौ? अय पुरुषे । यश्चासावादित्ये य परमानन्द श्रोत्रियप्रत्यक्षो निदिष्ट, यस्यैकदेश ब्रह्मादीनि भूतानि सुखार्हाण्युपजीवन्ति, स यश्चासावादित्ये इति निर्दिश्यते । स एक भिन्नप्रदेशघटाकाशाकाशैकत्ववत । ननु तस्मिन्देशे स यश्चाय पुरुष इत्यविशेषतोऽध्यात्म न युक्तो निर्देश, यश्चाय दक्षिणेऽक्षन्निति तु युक्त, प्रसिद्धत्वात् । न, पराधिकारात् । परो ह्यात्मा अत्र अधिकृत 'अदृश्येऽनात्म्ये' 'भीषास्माद्वात पवते' 'सैषानन्दस्य मीमासा' इति । न

हि अकस्मादप्रकृतो युक्तो निर्देष्टुम् , परमात्मविज्ञान च विव क्षितम् । तस्मात् पर एव निर्दिश्यते—स एक इति । नन्वा नन्दस्य मीमासा प्रकृता तस्या अपि फलमुपसहर्तव्यम् । अभिन्न स्वाभाविक आनन्द परमात्मैव, न विषयविषयि सबन्धजनित इति । ननु तदनुरूप एव अय निर्देश — 'स यश्चाय पुरुषे यश्चासावादित्ये स एक ' इति भिन्नाधि-करणस्थविशेषोपमर्देन । नन्वेवमप्यादित्यविशेषग्रहणमनर्थ कम्, न अनर्थकम , उत्कर्षापकर्षापोहार्थत्वात् । द्वैतस्य हि यो मूर्तामूर्तलक्षणस्य पर उत्कर्ष सवित्रभ्यन्तर्गत स चेत्पुरु षगतविशेषोपमर्देन परमानन्दमपेक्ष्य समो भवति, न कश्चि दुत्कर्षोऽपकर्षो वा ता गति गतस्येत्यभय प्रतिष्ठा विन्दत इत्युपपन्नम् ॥

अस्ति नास्तीत्यनुप्रश्नो व्याख्यात । कार्यरसलाभप्राण-नाभयप्रतिष्ठाभयदर्शनोपपत्तिभ्योऽस्त्येव तदाकाशादिकारण ब्रह्मेत्यपाकृत अनुप्रश्न एक , द्वावन्यानुप्रश्नौ विद्वदविदुषो ब्रह्मप्राप्त्यप्राप्तिविषयौ , तत्र विद्वान्समश्नुते न समश्नुत इत्य नुप्रश्नोऽन्त्य , तदपाकरणायोच्यते । मध्यमोऽनुप्रश्न अन्त्या पाकरणादेव अपाकृत इति तदपाकरणाय न यत्यते । स य कश्चित् एव यथोक्त ब्रह्म उत्सृज्योत्कर्षापकर्षमद्वैत सत्य ज्ञा-

नमनन्तमस्मीत्येव वेत्तीति एववित्, एवशब्दस्य प्रकृतपरामर्शार्थत्वात्। स किम्? अस्माल्लोकात्प्रेत्य दृष्टादृष्टविषयसमुत्थायो हि अय लोक, तस्मादस्माल्लोकात्प्रेत्य प्रत्यावृत्य निरपेक्षा भूत्वा एत यथाव्याख्यातम् अन्नमयमात्मानमुपसक्रामति विषयजातमन्नमयात्पिण्डात्मनो व्यतिरिक्त न पश्यति, सर्व स्थूलभूतमन्नमयमात्मान पश्यतीत्यर्थ। तत अभ्यन्तरमेत प्राणमय सर्वान्नमयात्मस्थमविभक्तम्। अथैत मनोमय विज्ञानमयमानन्दमयमात्मानमुपसक्रामति। अथाहश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभय प्रतिष्ठा विन्दते॥

तत्रैतच्चिन्त्यम्— कोऽयमेववित्, कथ वा सक्रामतीति, कि परस्मादात्मनोऽन्य सक्रमणकर्ता प्रविभक्त, उत स एवेति। कि तत? यद्यन्य स्यात् श्रुतिविरोध — 'तत्सृष्ट्वा तदेवानुप्राविशत्' 'अन्योऽसावन्योऽहमस्मीति। न स वेद' 'एकमेवाद्वितीयम्' तत्त्वमसि' इति। अथ स एव आनन्दमयमात्मानमुपसक्रामतीति, कमकर्तृत्वानुपपत्ति। परस्यैव च ससारित्व पराभावो वा। यद्युभयथा प्राप्ता दोषो न पारहर्तु शक्यत इति, व्यर्था चिन्ता। अथ अन्यतरस्मिन्पक्षे दोषाप्राप्ति तृतीये वा पक्षे अदुष्टे, स एव शास्त्रार्थ इति व्यर्थैव चिन्ता, न, तन्निर्धारणार्थत्वात्। सत्य

प्राप्तो दोषो न शक्य परिहर्तुमन्यतरस्मिन् तृतीये वा पक्षे अदुष्टे अवधृते व्यर्था चिन्ता स्यात्, न तु सोऽवधृत इति तदवधारणार्थत्वादर्थवत्येवैषा चिन्ता । सत्यमर्थवती चिन्ता, शास्त्रार्थावधारणार्थत्वात् । चिन्तयसि च त्वम्, न तु निर्णेष्यसि, किं न निर्णेतव्यमिति वेदवचनम्? न, कथ तर्हि? बहुप्रतिपक्षत्वात्, एकत्ववादी त्वम्, वेदार्थपरत्वात्, बहवो हि नानात्ववादिनो वेदबाह्या त्वत्प्रतिपक्षा, अतो ममाशङ्का— न निर्णेष्यसीति । एतदेव मे स्वस्त्ययनम्— यन्मामेकयोगिनमनेकयोगिबहुप्रतिपक्षमात्थ । अतो जेष्यामि सर्वान्, आरभे च चिन्ताम् ॥

स एव तु स्यात्, तद्भावस्य विवक्षितत्वात् । तद्विज्ञानेन परमात्मभावो हि अत्र विवक्षित — 'ब्रह्मविदाप्नोति परम्' इति । न हि अन्यस्य अन्यभावापत्तिरुपपद्यते । ननु तस्यापि तद्भावापत्तिरनुपपन्नैव । न, अविद्याकृतानात्मापोहार्थत्वात् । या हि ब्रह्मविद्यया स्वात्मप्राप्तिरुपदिश्यत, सा अविद्याकृतस्य अन्नादिविशेषात्मन आत्मत्वनाध्यारोपितस्य अनात्मन अपोहार्था । कथमेवमर्थता अवगम्यते? विद्यामात्रोपदेशात् । विद्यायाश्च दृष्ट कार्यमविद्यानिवृत्ति, तच्चेह विद्यामात्रमात्मप्राप्तौ साधनमुपदिश्यते । मार्गविज्ञानोपदेशव

न्निति चेत्, तदात्मत्व विद्यामात्रसाधनोपदेशाऽहतु । कस्मात्? देशान्तरप्राप्तौ मार्गविज्ञानोपदेशदर्शनात् । न हि ग्राम एव गन्तेति चेत्, न, वैधर्म्यात् । तत्र हि ग्रामविषय नोपदिश्यते, तत्प्राप्तिमार्गविषयमेवोपदिश्यते विज्ञानम्, न तथह ब्रह्मविज्ञानव्यतिरेकेण साधनान्तरविषय विज्ञान मुपदिश्यते । उक्तकर्मादिसाधनापेक्ष ब्रह्मविज्ञान परप्राप्तौ साधनमुपदिश्यत इति चेत्, न, नित्यत्वान्मोक्षस्येत्यादिना प्रत्युक्तत्वात् । श्रुतिश्च 'तत्सृष्ट्वा तदेवानुप्राविशत्' इति कार्यस्य तदात्मत्व दर्शयति । अभयप्रतिष्ठोपपत्तेश्च । यदि हि विद्वान् स्वात्मनाऽन्यन्न पश्यति, तत अभय प्रतिष्ठा विन्दत इति स्यात्, भयहेतो परस्य अन्यस्य अभावात् । अन्यस्य च अविद्याकृतत्वे विद्यया अवस्तुत्वदर्शनोपपत्ति, तद्धि द्वितीयस्य चन्द्रस्य असत्त्वम्, यदतैमिरिकेण चक्षुष्मता न गृह्यत, नैव न गृह्यत इति चेत्, न, सुषुप्तसमाहितयोरग्रहणात् । सुषुप्तऽग्रहणमन्यासक्तवदिति चेत्, न, सर्वाग्रहणात् । जाग्रत्स्वप्नयोरन्यस्य ग्रहणात्सत्त्वमेवेति चेत्, न, अविद्याकृतत्वात् जाग्रत्स्वप्नयो, यदन्यग्रहण जाग्रत्स्वप्नयो, तदविद्याकृतम्, विद्याभावे अभावात् । सुषुप्ते अग्रहणमपि अविद्याकृतमिति चेत्, न, स्वाभाविकत्वात् । द्रव्यस्य

हि तत्त्वमविक्रिया, परानपेक्षत्वात्, विक्रिया न तत्त्वम्, परापेक्षत्वात् । न हि कारकापेक्ष वस्तुनस्तत्त्वम्, सतो विशेष कारकापेक्ष , विशेषश्च विक्रिया, जाग्रत्स्वप्नयोश्च ग्रहण विशेष । यद्धि यस्य नान्यापेक्ष स्वरूपम्, तत्तस्य तत्त्वम्, यदन्यापेक्षम्, न तत्तत्त्वम्, अन्याभावे अभावात् । तस्मात् स्वाभाविकत्वात् जाग्रत्स्वप्नवत् न सुषुप्ते विशेष । येषा पुनरीश्वरो अन्य आत्मन , कार्य च अन्यत्, तेषा भया निवृत्ति , भयस्य अन्यनिमित्तत्वात्, सतश्च अन्यस्य आत्महानानुपपत्ति । न च असत आत्मलाभ । सापेक्षस्य अन्यस्य भयहेतुत्वमिति चेत्, न, तस्यापि तुल्यत्वात् । यद्धर्माद्यनुसहायीभूत नित्यमनित्य वा निमित्तमपेक्ष्य अन्यद्भयकारण स्यात्, तस्यापि तथाभूतस्य आत्महानाभावात् भयानिवृत्ति , आत्महान वा सदसतोरितरेतरापत्तौ सर्वत्र अनाश्वास एव । एकत्वपक्षे पुन सनिमित्तस्य ससारस्य अविद्या कल्पितत्वाददोष । तैमिरिकदृष्टस्य हि द्वितीयचन्द्रस्य न आत्मलाभो नाशो वा अस्ति । विद्याविद्ययो तद्धर्मत्व मिति चेत्, न, प्रत्यक्षत्वात् । विवेकाविवेकौ रूपादिवत् प्रत्यक्षावुपलभ्येते अन्त करणस्थौ । न हि रूपस्य प्रत्यक्षस्य सतो द्रष्टृधर्मत्वम् । अविद्या च स्वानुभवन रूप्यते— मूढो

ऽहम् अविविक्त मम विज्ञानम् इति । तथा विद्याविवेको अनुभूयत । उपदिशन्ति च अन्येभ्य आत्मनो विद्या बुधा । तथा च अन्ये अवधारयन्ति । तस्मात् नामरूपपक्षस्यैव विद्याविद्ये नामरूपे च, न आत्मधर्मौ, 'नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म' इति श्रुत्यन्तरात् । ते च पुनर्नामरूपे सवितर्यहोरात्रे इव कल्पिते, न परमार्थतो विद्यमाने । अभेदे 'एतमानन्दमयमात्मानमुपसक्रामति' इति कर्मकर्तृत्वानुपपत्तिरिति चेत्, न, विज्ञानमात्रत्वात् सक्रमणस्य । न जलूकादिवत् सक्रमणमिहोपदिश्यते, किं तर्हि, विज्ञानमात्र सक्रमणश्रुतेरर्थ । ननु मुख्यमेव सक्रमण श्रूयते—उपसक्रामतीति इति चेत्, न, अन्नमये अदर्शनात् । न हि अन्नमयमुपसक्रामत बाह्यादस्माल्लोकात् जलूकावत् सक्रमण दृश्यते, अन्यथा वा । मनोमयस्य बहिर्निगतस्य विज्ञानमयस्य वा पुन प्रत्यावृत्त्या आत्मसक्रमणमिति चेत्, न, स्वात्मनि क्रियाविरोधात् । अन्योऽन्नमयमन्यमुपसक्रामतीति प्रकृत्य मनोमयो विज्ञानमयो वा स्वात्मानमेवोपसक्रामतीति विरोध स्यात् । तथा न आनन्दमयस्य आत्मसक्रमणमुपपद्यते । तस्मात् न प्राप्ति सक्रमणम्, नापि अन्नमयादीनामन्यतमकर्तृक पारिशेष्यादन्नमयाद्यानन्दमयान्तात्मव्यतिरिक्तकर्तृक

ज्ञानमात्र च सक्रमणमुपपद्यते । ज्ञानमात्रत्वे च आनन्दमयान्त स्यस्यैव सर्वान्तरस्य आकाशाद्यन्नमयान्त कार्य सृष्ट्वा अनुप्रविष्टस्य हृदयगुहाभिसबन्धादन्नमयादिषु अनात्मसु आत्मविभ्रम सक्रमणात्मकविवेकविज्ञानात्पत्त्या विनश्यति । तदतस्मिन्नविद्याविभ्रमनाशे सक्रमणशब्द उपचर्यते, न हि अन्यथा सर्वगतस्य आत्मन सक्रमणमुपपद्यते । वस्त्वन्तराभावाच्च । न च स्वात्मन एव सक्रमणम् । न हि जलूका आत्मानमेव सक्रामति । तस्मात् सत्य ज्ञानमनन्त ब्रह्मेति यथोक्तलक्षणात्मप्रतिपत्त्यर्थमेव बहुभवनसर्गप्रवेशरसलाभाभयसक्रमणादि परिकल्प्यते ब्रह्मणि सर्वव्यवहारविषये, न तु परमार्थतो निर्विकल्प ब्रह्मणि कश्चिदपि विकल्प उपपद्यते । तमेत निर्विकल्पमात्मानम् एव क्रमेणोपसक्रम्य विदित्वा न बिभेति कुतश्चन अभय प्रतिष्ठा विन्दत इत्येतस्मिन्नर्थेऽपि एष श्लोक भवति । सर्वस्यैव अस्य प्रकरणस्य आनन्दवल्ल्यर्थस्य सक्षेपत प्रकाशनाय एष मन्त्रो भवति ॥

इति अष्टमानुवाकभाष्यम् ॥



नवमोऽनुवाक ॥

यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्द ब्रह्मणो विद्वान् । न बिभेति कुतश्चनेति । एतꣳ ह वाव न तपति । किमहꣳ साधु नाकरवम् । किमहꣳ पापमकरवमिति । स य एव विद्वानेते आत्मानꣳ स्पृणुते । उभे ह्येवैष एते आत्मानꣳ स्पृणुते । य एव वेद । इत्युपनिषत् ॥ १ ॥

इति नवमोऽनुवाक ॥

यत यस्मात् निर्विकल्पात् यथोक्तलक्षणात् अद्वयानन्दात् आत्मन , वाच अभिधानानि द्रव्यादिसविकल्पवस्तुविषयाणे वस्तुसामान्यान्निर्विकल्पे अद्वयऽपि ब्रह्मणि प्रयोक्तृभि प्रकाशनाय प्रयुज्यमानानि, अप्राप्य अप्रकाश्यैव निवर्तन्ते स्वसामर्थ्याद्धीयन्ते । मन इति प्रत्ययो विज्ञानम । तच्च, यत्राभिधान प्रवृत्तमतीन्द्रियऽप्यर्थे, तदर्थे च प्रवर्तते प्रकाशनाय । यत्र च विज्ञानम, तत्र वाच प्रवृत्ति । तस्मात् सहैव वाङ्मनसया अभिधानप्रत्ययो प्रवृत्ति सर्वत्र । त

स्मात् ब्रह्मप्रकाशनाय सर्वथा प्रयोक्तृभि प्रयुज्यमाना अपि वाच यस्मादप्रत्ययविषयादनभिधेयाददृश्यादिविशेषणात् सहैव मनसा विज्ञानेन सर्वप्रकाशनसमर्थेन निवर्तन्ते, त ब्रह्मण आनन्द श्रोत्रियस्य अवृजिनस्य अकामहतस्य सर्वैषणाविनिर्मुक्तस्य आत्मभूत विषयविषयिसबन्धविनिर्मुक्त स्वाभाविक नित्यमविभक्त परमानन्द ब्रह्मणो विद्वान् यथोक्तेन विधिना न बिभति कुतश्चन, निमित्ताभावात् । न हि तस्माद्विदुष अन्यद्वस्त्वन्तरमस्ति भिन्न यतो बिभेति । अविद्यया यदा उदरमन्तर कुरुते, अथ तस्य भय भवतीति हि युक्तम् । विदुषश्च अविद्याकायस्य तैमिरिकदृष्टद्वितीयचन्द्रवत् नाशाद्भयनिमित्तस्य न बिभेति कुतश्चनेति युज्यते । मनोमये च उदाहृत मन्त्र , मनसो ब्रह्मविज्ञानसाधनत्वात् । तत्र ब्रह्मत्वमध्यारोप्य तत्स्तुत्यर्थ न बिभेति कदाचनेति भयमात्र प्रतिषिद्धम्, इह अद्वैत विषये न बिभेति कुतश्चनेति भयनिमित्तमेव प्रतिषिध्यते । नन्वस्ति भयनिमित्त साध्वकरण पापक्रिया च । नैवम् । कथमिति, उच्यते— एत यथोक्तमेवविदम् , ह वाव इत्य वधारणार्थौ, न तपति नोद्वेजयति न सतापयति । कथ पुन साध्वकरण पापक्रिया च न तपतीति, उच्यते— किं

कस्मात् साधु शोभन कर्म नाकरव न कृतवानस्मि इति पश्चात्सतापो भवति आसन्ने मरणकाले, तथा किं कस्मात् पाप प्रतिषिद्ध कर्म अकरव कृतवानस्मि इति च नरकपतनादिदुःखभयात् तापो भवति। ते एते साध्वकरणपापक्रिये एवमेव न तपत, यथा अविद्वास तपत। कस्मात्पुनर्विद्वास न तपत इति, उच्यते—स य एवविद्वान एते साध्वसाधुनी तापहेतू इति आत्मान स्पृणुते प्रीणाति बलयति वा, परमात्मभावेन उभे पश्यतीत्यर्थ। उभे पुण्यपाप हि यस्मात् एवम् एष विद्वान एते आत्मा नात्मरूपेणैव पुण्यपापे स्वेन विशेषरूपेण शून्ये कृत्वा आत्मान स्पृणुत एव। कः य एव वेद यथोक्तमद्वैतमानन्द ब्रह्म वेद, तस्य आत्मभावन दृष्टे पुण्यपापे निर्वीर्ये अतापके जन्मा तरारम्भके न भवत। इतीयम् एव यथोक्ता अस्या वल्ल्या ब्रह्मविद्योपनिषत्, सर्वाभ्य विद्याभ्य परमरहस्य दर्शितमित्यर्थ —पर श्रेय अस्या निषण्णमिति॥

इति नवमानुवाकभाष्यम्॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवत कृतौ

तैत्तिरीयोपनिषद्भाष्ये ब्रह्मानन्दवल्लीभाष्य

सपूर्णम्॥


तैत्तिरीयोपनिषद्भाष्यम्
भृगुवल्ली

ॐ

भृगुवल्ली ॥



त्य ज्ञानमनन्त ब्रह्म आकाशादिकार्यमन्न-मयान्त सृष्ट्वा तदेवानुप्रविष्ट विशेषवदिवोपलभ्यमान यस्मात्, तस्मात् सर्वकार्यविलक्षणम् अदृश्यादिधर्मकमेव आनन्द तदेवाहमिति विजानीयात्, अनुप्रवेशस्य तदथत्वात्, तस्यैव विजानत शुभाशुभे कर्मणी जन्मान्तरारम्भके न भवत इत्येवमानन्दवल्ल्या विवक्षितोऽर्थ । परिसमाप्ता च ब्रह्म विद्या । अत पर ब्रह्मविद्यासाधन तपो वक्तव्यम्, अन्नादिविषयाणि च उपासनान्यनुक्तानीत्यत इदमारभ्यते—

भृगुर्वै वारुणिः । वरुण पितरमुपससार । अधीहि भगवो ब्रह्मेति । तस्मा एत त्प्रोवाच । अन्न प्राण चक्षु श्रोत्र मनो वाचमिति । त५ होवाच । यतो वा इमा-

नि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ १ ॥

इति प्रथमोऽनुवाक ॥

आख्यायिका विद्यास्तुतय, प्रियाय पुत्राय पित्रोक्तेति— भृगुर्वै वारुणि । वै-शब्द प्रसिद्धानुस्मारक, भृगुरित्येव नामा प्रसिद्धो अनुस्मार्यते, वारुणि वरुणस्यापत्य वारुणि वरुण पितर ब्रह्म विजिज्ञासु उपससार उपगतवान— अधीहि भगवो ब्रह्म इत्यनेन मन्त्रेण । अधीहि अध्यापय कथय । स च पिता विधिवदुपसन्नाय तस्मै पुत्राय एतत् वचन प्रोवाच— अन्न प्राण चक्षु श्रोत्रम् मनो वाचम् इति । अन्न शरीर तदभ्यन्तर च प्राणम् अत्तारम् अनन्तरमुपलब्धिसाधनानि चक्षु श्रोत्र मनो वाचम् इत्येतानि ब्रह्मापलब्धौ द्वाराण्युक्तवान । उक्त्वा च द्वारभूतान्येतान्यन्नादीनि त भृगु होवाच ब्रह्मणो लक्षणम् । कि तत्[2] यत यस्मात् वा इमानि ब्रह्मादीनि स्तम्बपर्यन्तानि भूतानि जायन्ते, येन जातानि जीवन्ति प्राणान्धारयन्ति वर्धन्ते,

विनाशकाले च यत्प्रयन्ति यद्ब्रह्म प्रतिगच्छन्ति, अभिसविशन्ति तादात्म्यमेव प्रतिपद्यन्ते, उत्पत्तिस्थितिलयकालेषु यदात्मता न जहति भूतानि, तदेतद्ब्रह्मणो लक्षणम्, तद्ब्रह्म विजिज्ञासस्व विशेषेण ज्ञातुमिच्छस्व, यदेवलक्षण ब्रह्म तदन्नादिद्वारेण प्रतिपद्यस्वेत्यर्थः । श्रुत्यन्तर च—'प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्न मनसो ये मनो विदुस्ते निचिक्युर्ब्रह्म पुराणमग्र्यम्' इति ब्रह्मोपलब्धौ द्वाराण्येतानीति दर्शयति । स भृगु ब्रह्मोपलब्धिद्वाराणि ब्रह्मलक्षण च श्रुत्वा पितु, तपो ब्रह्मोपलब्धिसाधनत्वेन अतप्यत तप्तवान् । कुत पुनरनुपदिष्टस्यैव तपस साधनत्वप्रतिपत्तिर्भृगो ? सावशेषोक्ते । अन्नादिब्रह्मण प्रतिपत्तौ द्वार लक्षण च यतो वा इमानि इत्याद्युक्तवान् । सावशेष हि तत्, साक्षाद्ब्रह्मणोऽनिर्देशात् । अन्यथा हि स्वरूपेणैव ब्रह्म निर्देष्टव्य जिज्ञासवे पुत्राय इदमित्थरूप ब्रह्म इति, न चैव निरदिशत्, किं तर्हि, सावशेषमेवोक्तवान् । अतोऽवगम्यते नून साधनान्तरमप्यपेक्षते पिता ब्रह्मविज्ञान प्रतीति । तपोविशेषप्रतिपत्तिस्तु सर्वसाधकतमत्वात्, सर्वेषा हि नियतसाध्यविषयाणा साधनाना तप एव साधकतम साधनमिति हि प्रसिद्ध लोके । तस्मात् पित्रा अनुपदिष्टमपि ब्रह्मविज्ञानसा

धनत्वेन तप प्रतिपेद भृगु । तच्च तपा बाह्यान्त करणस्य साधानम, तद्वारकत्वाद्ब्रह्मप्रतिपत्ते, 'मनसश्चेन्द्रियाणा च ह्यैकाग्र्य परम तप । तज्ज्याय सवधर्मेभ्य स धर्म पर उन्नयत' इति स्मृत । स च तपस्त्वा ॥

इति प्रथमानुवाकभाष्यम् ॥



द्वितीयोऽनुवाक. ॥

अन्न ब्रह्मेति व्यजानात्। अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते। अन्नेन जातानि जीवन्ति। अन्न प्रयन्त्यभिसविशन्तीति। तद्विज्ञाय। पुनरेव वरुण पितरमुपससार। अधीहि भगवो ब्रह्मेति। तꣳहोवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा ॥ १ ॥

इति द्वितीयोऽनुवाक ॥

अन्न ब्रह्मेति व्यजानात् विज्ञातवान्। तद्धि यथोक्तलक्षणोपेतम्। कथम्? अन्नाद्ध्येव खलु इमानि भूतानि जायन्ते। अन्नेन जातानि जीवन्ति। अन्न प्रयन्त्यभिसविशन्तीति। तस्मादुक्तमन्नस्य ब्रह्मत्वमित्यभिप्राय। स एव तपस्तप्त्वा, अन्न ब्रह्मेति विज्ञाय लक्षणेन उपपत्त्या च पुन-

रेव सशयमापन्न वरुण पितरमुपससार—अधीहि भगवो ब्रह्मेति । क पुन सशयहतुरस्येति, उच्यत—अन्नस्यात्पत्तिदर्शनात । तपस पुन पुनरुपदश साधनातिशयत्वावधारणार्थ । यावद्ब्रह्मणा लक्षण निरतिशय न भवति, यावच्च जिज्ञासा न निवर्तते, तावत्तप एव त साधनम्, तपसैव ब्रह्म विजिज्ञासस्वेत्यथ । ऋज्वन्यत ॥

इति द्वितीयानुवाकभाष्यम् ॥



तृतीयोऽनुवाकः ॥

प्राणो ब्रह्मेति व्यजानात्। प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते। प्राणेन जातानि जीवन्ति। प्राण प्रयन्त्यभिसविशन्तीति। तद्विज्ञाय। पुनरेव वरुण पितरमुपससार। अधीहि भगवो ब्रह्मेति। तꣳ होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा ॥ १ ॥

इति तृतीयोऽनुवाकः ॥



चतुर्थोऽनुवाक ॥

मनो ब्रह्मेति व्यजानात । मनसो ह्येव खल्विमानि भूतानि जायन्ते । मनसा जातानि जीवन्ति । मन प्रयन्त्यभिसविशन्तीति । तद्विज्ञाय । पुनरेव वरुण पितरमुपससार । अधीहि भगवो ब्रह्मेति । तꣳ होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ १ ॥

इति चतुर्थोऽनुवाक ॥



पञ्चमोऽनुवाक ॥

विज्ञान ब्रह्मेति व्यजानात्। विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते। विज्ञानेन जातानि जीवन्ति। विज्ञान प्रयन्त्यभिसविशन्तीति। तद्विज्ञाय। पुनरेव वरुण पितरमुपससार। अधीहि भगवो ब्रह्मेति। तꣳ होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा ॥ १ ॥

इति पञ्चमोऽनुवाक ॥



षष्ठोऽनुवाक ॥

आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्दन जातानि जीवन्ति। आनन्द प्रयन्त्यभिसविशन्तीति। सैषा भार्गवी वारुणी विद्या। परमे व्योमन् प्रतिष्ठिता। स य एव वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान भवति। प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या ॥ १ ॥

इति षष्ठोऽनुवाक ॥

एव तपसा विशुद्धात्मा प्राणादिषु साकल्येन ब्रह्मलक्षणमपश्यन शनै शनै अन्तरनुप्रविश्य अन्तरतममानन्द ब्रह्म ावज्ञातवान तपसैव साधनेन भृगु , तस्मात ब्रह्म विजिज्ञासुना बाह्यान्त करणसमाधानलक्षण परम तप साधनमनुष्ठेयमिति प्रकरणार्थ । अधुना आख्यायिका च

उपसहृत्य श्रुति स्वेन वचनेन आख्यायिकानिर्वर्त्यमर्थमा चष्टे । सैषा भार्गवी भृगुणा विदिता वरुणेन प्रोक्ता वारुणी विद्या परमे व्योमन हृदयाकाशगुहाया परमे आनन्दे अद्वैत प्रतिष्ठिता पारिसमाप्ता अन्नमयादात्मनोऽधिप्रवृत्ता । य एवमन्योऽपि तपसैव साधनेन अनेनैव क्रमेण अनुप्रवि श्य आनन्द ब्रह्म वेद, स एव विद्याप्रतिष्ठानात् प्रतितिष्ठति आनन्दे परमे ब्रह्मणि, ब्रह्मैव भवतीत्यथ । दृष्ट च फल तस्योच्यते— अन्नवान प्रभूतमन्नमस्य विद्यत इत्यन्नवान् , स-त्तामात्रेण तु सर्वो हि अन्नवानिति विद्याया विशषा न स्यात् । एवमन्नमत्तीत्यन्नाद , दीप्ताग्निभवतीत्यर्थ । महान्भवति । केन महत्त्वमित्यत आह— प्रजया पुत्रादिना पशुभि गवा-श्वादिभि ब्रह्मवर्चसेन शमदमज्ञानादिनिमित्तेन तेजसा । महा-न्भवति कीर्त्या ख्यात्या शुभाचारनिमित्तया ॥

इति षष्ठानुवाकभाष्यम् ॥



सप्तमोऽनुवाक ॥

अन्न न निन्द्यात । तद्व्रतम् । प्राणो वा अन्नम् । शरीरमन्नादम् । प्राणे शरीर प्रतिष्ठितम् । शरीरे प्राण प्रतिष्ठितः । तदेतदन्नमन्ने प्रतिष्ठितम् । स य एतदन्नमन्ने प्रतिष्ठित वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान् भवति । प्रजया पशुभिर्ब्रह्मवर्चसेन । महान् कीर्त्या ॥ १ ॥

इति सप्तमोऽनुवाक ॥

किं च, अन्नेन द्वारभूतेन ब्रह्म विज्ञात यस्मात, तस्मात् गुरुमिव अन्न न निन्द्यात, तत अस्य एव ब्रह्मविदो व्रतम उपदिश्यते । व्रतोपदेशो अन्नस्तुतये, स्तुतिभाक्त्व च अन्नस्य ब्रह्मोपलब्ध्युपायत्वात । प्राणो वा अन्नम्, शरीरान्तर्भावात्प्राणस्य । यत् यस्यान्त प्रतिष्ठित भवति, तत्तस्यान्न भवतीति । शरीरे च प्राण प्रतिष्ठित, तस्मात् प्राणोऽन्न शरीर-

मन्नादम । तथा शरीरमप्यन्न प्राणोऽन्नाद । कस्मात् प्राणे शरीर प्रतिष्ठितम्[१] तन्निमित्तत्वाच्छरीरस्थिते । तस्मात् तदेतत् उभय शरीर प्राणश्च अन्नमन्नादश्च । येनान्योन्य-स्मिन्प्रतिष्ठित तेनान्नम्, येना-न्योन्यस्य प्रतिष्ठा तेनान्नाद । तस्मात् प्राण शरीर च उभयमन्नमन्नाद च । स य एवम् एतदन्नमन्ने प्रतिष्ठित वेद प्रतितिष्ठति अन्नान्नादात्मनैव । किं च, अन्नवानन्नादो भवतीत्यादि पूर्ववत् ॥

इति सप्तमानुवाकभाष्यम् ॥



अष्टमोऽनुवाक ॥

अन्न न परिचक्षीत । तद्व्रतम् । आपो वा अन्नम् । ज्योतिरन्नादम् । अप्सु ज्योति प्रतिष्ठितम् । ज्योतिष्यापः प्रतिष्ठिता । तदेतदन्नमन्ने प्रतिष्ठितम् । स य एतदन्नमन्ने प्रतिष्ठित वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान्भवति । प्रजया पशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या ॥

इति अष्टमोऽनुवाक ॥

अन्न न परिचक्षीत न परिहरेत् । तद्व्रत पूर्ववत्स्तुत्यर्थम् । तदेव शुभाशुभकल्पनया अपरिहीयमाण स्तुत महीकृतमन्न स्यात् । एव यथोक्तमुत्तरेष्वपि आपो वा अन्नम इत्यादिषु योजयेत् ॥

इति अष्टमानुवाकभाष्यम् ॥

नवमोऽनुवाकः ॥

अन्न बहु कुर्वीत । तद्व्रतम् । पृथिवी वा अन्नम् । आकाशोऽन्नाद । पृथिव्या-माकाश प्रतिष्ठित । आकाशे पृथिवी प्रतिष्ठिता । तदेतदन्नमन्ने प्रतिष्ठितम् । "स य एतदन्नमन्ने प्रतिष्ठित वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान्भवति । प्र जया पशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या ॥

इति नवमोऽनुवाकः ॥

अप्सु ज्याति इत्यब्ज्योतिषोरन्नान्नादगुणत्वेनोपासकस्य अन्नस्य बहुकरण व्रतम् ॥

इति नवमानुवाकभाष्यम् ॥



दशमोऽनुवाक ॥

न कचन वसतौ प्रत्याचक्षीत। तद्व्रतम्। तस्माद्यया कया च विधया बह्वन्न प्राप्नुयात्। अराध्यस्मा अन्नमित्याचक्षते। एतद्वै मुखतोऽन्नꣳ राद्धम्। मुखतोऽस्मा अन्नꣳ राध्यते। एतद्वै मध्यतोऽन्नꣳ राद्धम्। मध्यतोऽस्मा अन्नꣳ राध्यते। एतद्वा अन्ततोऽन्नꣳ राद्धम्। अन्ततोऽस्मा अन्नꣳ राध्यत ॥ १ ॥

तथा पृथिव्याकाशापासकस्य वसतौ वसतिनिमित्त कचन काचदपि न प्रत्याचक्षीत, वसत्यर्थमागत न निवारयेदित्यर्थ। प्रासे च दत्त अवश्य हि अशन दातव्यम्। तस्माद्यया कया च विधया येन केन च प्रकारेण बह्वन्न प्राप्नुयात् बह्वन्नसग्रह कुर्यादित्यर्थ। यस्मादन्नवन्तो विद्वास अभ्यागताय अन्नार्थिने अराधि ससिद्धम अस्मै अन्नम इत्याचक्षते, न नास्ती-

ति प्रत्याख्यान कुर्वन्ति, तस्माच्च हेतो बह्वन्न प्राप्नुयादिति पूर्वेण सबन्ध । अपि च अन्नदानस्य माहात्म्यमुच्यते— यथा यत्काल प्रयच्छत्यन्नम्, तथा तत्कालमेव प्रत्युपनमते । कथमिति तदेतदाह— एतद्वै अन्न मुखत मुख्ये प्रथमे वयसि मुख्यया वा वृत्त्या पूजापुर सरमभ्यागतायान्नार्थिने राद्ध ससिद्ध प्रयच्छतीति वाक्यशेष । तस्य किं फल स्या दिति, उच्यते— मुखत पूर्वे वयसि मुख्यया वा वृत्त्या अस्मै अन्नदाय अन्न राध्यत, यथादत्तमुपतिष्ठत इत्यर्थ । एव मध्यतो मध्यमे वयसि मध्यमेन च उपचारेण, तथा अन्तत अन्ते वयसि जघन्येन च उपचारेण परिभवेन तथैवास्मै राध्यते ससिध्यत्यन्नम् ॥

य एव वेद । क्षेम इति वाचि । योगक्षेम इति प्राणापानयो । कर्मेति हस्तयो. । गतिरिति पादयो. । विमुक्तिरिति पायौ । इति मानुषीः समाज्ञाः । अथ दैवीः । तृप्तिरिति वृष्टौ । बलमिति विद्युति ॥२॥

य एव वेद य एवमन्नस्य यथोक्त माहात्म्य वेद तदानस्य च फलम्, तस्य यथोक्त फलमुपनमते । इदानीं ब्रह्मण

उपासनप्रकार उच्यत— क्षम इति वाचि । क्षेमो नाम उपात्तपाररक्षणम् । ब्रह्म वाचि क्षेमरूपेण प्रतिष्ठित मित्युपास्यम् । योगक्षेम इति, योग अनुपात्तस्योपादा नम् । तौ हि योगक्षेमौ प्राणापानयो बलवतो सतार्भवत यद्यपि, तथाप न प्राणापाननिमित्तावेव, किं तर्हि, ब्रह्मनि-मित्तौ । तस्माद्ब्रह्म योगक्षमात्मना प्राणापानयो प्रतिष्ठित मित्युपास्यम् । एवमुत्तरेष्वन्येषु तेन तेन आत्मना ब्रह्मैवो पास्यम् । कर्मणो ब्रह्मनिवर्त्यत्वा[1] हस्तया कर्मात्मना ब्रह्म प्रतिष्ठितमित्युपास्यम् । गतिरिति पादया । विमुक्तिरिति पायौ । इत्येता मानुषी मनुष्यषु भवा मानुष्या समाज्ञा , आध्यात्मिक्य समाज्ञा ज्ञानानि विज्ञानान्युपासनानीत्यथ । अथ अनन्तर दैवी दैव्य देवषु भवा समाज्ञा उच्यन्ते । तृप्तिरिति वृष्टौ । वृष्टेरन्नादिद्वारेण तृप्तिहेतुत्वाद्ब्रह्मैव तृप्त्या त्मना वृष्टौ व्यवस्थितमित्युपास्यम् , तथा अन्येषु तेन तेना त्मना ब्रह्मैवोपास्यम् । तथा बलरूपेण विद्युति ॥

यश इति पशुषु । ज्योतिरिति नक्ष-त्रेषु । प्रजातिरमृतमानन्द इत्युपस्थे । सर्व मित्याकाशे । तत्प्रतिष्ठेत्युपासीत । प्रति

ष्ठावान् भवति । तन्मह इत्युपासीत । महान् भवति । तन्मन इत्युपासीत । मानवान् भवति ॥ ३ ॥

यशोरूपेण पशुषु । ज्योतीरूपेण नक्षत्रेषु । प्रजाति अमृतम् अमृतत्वप्राप्ति पुत्रेण ऋणविमोक्षद्वारेण आनन्द सुखमित्ये तत्सर्वमुपस्थनिमित्त ब्रह्मैव अनेनात्मना उपस्थे प्रतिष्ठितमि-त्युपास्यम् । सर्वं हि आकाशे प्रतिष्ठितम्, अतो यत्सर्वमाकाशे तद्ब्रह्मैवेत्युपास्यम्, तच्चाकाश ब्रह्मैव । तस्मात् तत् सर्वस्य प्रति-ष्ठेत्युपासीत । प्रतिष्ठागुणोपासनात् प्रतिष्ठावान् भवति । एव सर्वेष्वपि । यद्यत्राधिगत फलम्, तत् ब्रह्मैव, तदुपासनात्तद्वा न्भवतीति द्रष्टव्यम्, श्रुत्यन्तराच्च——'त यथा यथोपासते तदेव भवति' इति । तन्मह इत्युपासीत । मह महत्त्वगुण वत् तदुपासीत । महान्भवति । तन्मन इत्युपासीत । मनन मन । मानवान्भवति मननसमर्थो भवति ॥

तन्नम इत्युपासीत । नम्यन्तेऽस्मै का मा' । तद्ब्रह्मेत्युपासीत । ब्रह्मवान् भव-ति । तद्ब्रह्मण परिमर इत्युपासीत । पर्ये-ण म्रियन्ते द्विषन्तः सपत्ना' । परि ये

ऽप्रिया भ्रातृव्या' । स यश्चाय पुरुषे । य-श्चासावादित्ये । स एक ॥ ४ ॥

तन्नम इत्युपासीत नमन नम नमनगुणवत् तदुपासीत । नम्यन्ते प्रह्वीभवन्ति अस्मै उपासित्रे कामा काम्यन्त इति भोग्या विषया इत्यर्थ । तद्ब्रह्मेत्युपासीत । ब्रह्म परि बृढतमभित्युपासीत । ब्रह्मवान तद्गुणो भवति । तद्ब्रह्मण परिमर इत्युपासीत ब्रह्मण परिमर परिम्रियन्तेऽस्मिन्पञ्च ने वता विद्युद्वृष्टिश्चन्द्रमा आदित्योऽग्निरित्येता । अत वायु परिमर, श्रुत्यन्तरप्रसिद्धे । स एवाय वायुराकाशेनानन्य इत्याकाशो ब्रह्मण परिमर, तस्मादाकाश वाग्वात्मान ब्रह्मण परिमर इत्युपासीत । एनम् एवविद प्रतिस्पर्धिनो द्विषन्त, अद्विषन्तोऽपि सपत्ना यतो भवन्ति, अता विशेष्यन्ते द्विषन्त सपत्ना इति । एन द्विषन्त सपत्ना त परिम्रियन्ते प्राणान् जहति । कि च, ये च अप्रिया अस्य भ्रातृव्या अद्विषन्तोऽपि ते च परिम्रियन्ते ॥

'प्राणो वा अन्न शरीरमन्नादम' इत्यारभ्य आकाशान्तस्य कार्यस्यैव अन्नान्नादत्वमुक्तम् । उक्त नाम—कि तेन ? तेनै तत्सिद्ध भवति— कार्यविषय एव भोज्यभोक्तृत्वकृत

ससार , न त्वात्मनीति । आत्मनि तु भ्रान्त्या उपचर्यते । नन्वात्मापि परमात्मन कार्यम् , ततो युक्त तस्य ससार इति , न, अससारिण एव प्रवेशश्रुते । ' तत्सृष्ट्वा तदेवानुप्राविशत् ' इत्याकाशादिकारणस्य हि अससारिण एव परमात्मन कार्येष्वनुप्रवेश श्रूयते । तस्मात्कार्यानुप्रविष्टो जीव आत्मा पर एव अससारी , सृष्ट्वा अनुप्राविशदिति समानकर्तृत्वोपपत्तेश्च । सर्गप्रवेशक्रिययोश्चैकश्चेत्कर्ता, तत क्त्वाप्रत्ययो युक्त । प्रविष्टस्य तु भावान्तरापत्तिरिति चेत् , न , प्रवेशस्यान्यार्थत्वेन प्रत्याख्यातत्वात् । ' अनेन जीवेन ' इति विशेषश्रुते धर्मान्तरेणानुप्रवेश इति चेत् , न , ' तत्सत्यम् ' ' स आत्मा ' ' तत्त्वमसि ' इति सामानाधिकरण्यात् । दृष्ट जीवस्य ससारित्वमिति चेत् , न , उपलब्धुरनुपलभ्यत्वात् । ससारधर्मविशिष्ट आत्मोपलभ्यत इति चेत् , न, धर्माणा धर्मिणोऽव्यतिरकात् कर्मत्वानुपपत्ते । उष्णप्रकाशयोर्दाह्यप्रकाश्यत्वानुपपत्तिवत् त्रासादिदशनाद्दु खित्वाद्यनुमीयत इति चेत् , न , त्रासादर्दु खस्य च उपलभ्यमानत्वात् नोपलब्धृधर्मत्वम् । कापिलकाणादादितकशास्त्रविरोध इति चेत् , न , तेषा मूलाभावे वेदविरोधे च भ्रान्तत्वोपपत्ते । श्रुत्युपपत्तिभ्या च सिद्धम् आत्मनोऽससारित्वम् , एकत्वाच्च । कथमेकत्वमिति, उ

च्यते—स यश्चाय पुरुष यश्चासावादित्ये स एक इत्यवमादि पूर्ववत्सर्वम् ॥

स य एवंवित् । अस्माल्लोकात्प्रेत्य । एतमन्नमयमात्मानमुपसंक्रम्य । एत प्राणमयमात्मानमुपसंक्रम्य । एत मनोमयमात्मानमुपसंक्रम्य । एत विज्ञानमयमात्मानमुपसंक्रम्य । एतमानन्दमयमात्मानमुपसंक्रम्य । इमाँल्लोकान्कामान्नी कामरूप्यनुसंचरन् । एतत्साम गायन्नास्ते । हा३वु हा३वु हा३वु ॥ ५ ॥

अन्नमयादिक्रमेण आनन्दमयमात्मानमुपसंक्रम्य एतत्साम गायन्नास्ते । 'सत्य ज्ञानम्' इत्यस्या ऋच अर्थ व्याख्यात विस्तरेण तद्विवरणभूतया आनन्दवल्ल्या । 'सोऽश्नुत सर्वान्कामान्सह ब्रह्मणा विपश्चिता' इति तस्य फलवचनस्य अर्थविस्तारो नोक्त । के ते किंविषया वा सर्वे कामा कथ वा ब्रह्मणा सह समश्नुते—इत्येतदुक्तव्यमितीदमिदानीमारभ्यते । तत्र पितापुत्राख्यायिकाया पूर्वविद्याशेषभूताया तप ब्रह्मविद्यासाधनमुक्तम् । प्राणादे-

राकाशान्तस्य च कार्यस्य अन्नान्नादत्वेन विनियोगश्च उक्त , ब्रह्मविषयोपासनानि च । ये च सर्वे कामा प्रतिनियताने कसाधनसाध्या आकाशादिकार्यभेदविषया , एते दर्शिता । एकत्वे पुन कामकामित्वानुपपत्ति , भेदजातस्य सर्वस्य आ त्मभूतत्वात् । तत्र कथ युगपद्ब्रह्मस्वरूपेण सर्वान्कामान् एव- वित्समश्नुत इति, उच्यते— सर्वात्मत्वोपपत्ते । कथ सर्वा त्मत्वोपपत्तिरिति, आह—पुरुषादित्यस्थात्मैकत्वविज्ञानेनापो- ह्योत्कषापकर्षावन्नमयादीन् आत्मनोऽविद्याकल्पितान् क्रमेण सक्रम्य आनन्दमयान्तान् सत्य ज्ञानमनन्त ब्रह्म अदृश्यादि- धर्मक स्वाभाविकमानन्दमजमभृतमभयमद्वैत फलभूतमापन्न इमाँल्लोकान्भूरादीननुसचरन्निति व्यवहितेन सबन्ध । कथ- मनुसचरन् ? कामान्नी कामतोऽन्नमस्येति कामान्नी , तथा कामतो रूपाण्यस्येति कामरूपी , अनुसचरन् सर्वात्मना इमान् लोकानात्मत्वेन अनुभवन । किम् ? एतत्साम गायन्नास्ते । स मत्वाद्ब्रह्मैव साम सर्वानन्यरूप गायन् शब्दयन् आत्मैकत्व प्रख्यापयन् लोकानुग्रहार्थं तद्विज्ञानफल च अतीव कृतार्थत्व गायन् आस्ते तिष्ठति । कथम् ? हा३वु हा३वु हा३वु । अ- हो इत्येतस्मिन्नर्थेऽत्यन्तविस्मयख्यापनार्थम् ॥

अहमन्नमहमन्नमहमन्नम् । अहमन्ना-

दो३ऽहमन्नादो३ऽहमन्नाद । अहꣳ श्लोक कृदहꣳ श्लोककृदहꣳ श्लोककृत् । अह मस्मि प्रथमजा ऋता३स्य । पूर्व देवेभ्यो ऽमृतस्य ना३भायि । यो मा ददाति स इदेव मा३वा । अहमन्नमन्नमदन्त मा३द्मि । अह विश्व भुवनमभ्यभवा३म् । सुवर्न ज्योती' । य एव वेद । इत्युपनि षत् ॥ ६ ॥

इति दशमोऽनुवाक ॥

क पुनरसौ विस्मय इति, उच्यत— अद्वैत आत्मा निरञ्जनोऽपि सन अहमेवान्नमन्नादश्च । किच, अहमेव श्लोककृत् । श्लोका नाम अन्नान्नादयो सघात, तस्य कर्ता चतनावान । अन्नस्यैव वा परार्थस्य अन्नादार्थस्य सतो-ऽनेकात्मकस्य पारार्थ्येन हतुना सघातकृत । त्रिरुक्ति विस्मयत्वख्यापनार्था । अहमस्मि भवामि । प्रथमजा प्रथ-मज प्रथमोत्पन्न । ऋतस्य सत्यस्य मूर्तामूर्तस्यास्य जगतो देवेभ्यश्च पूर्वममृतस्य नाभि अमृतत्वस्य नाभि, मध्य मत्सस्थम् अमृतत्व प्राणिनामित्यर्थ । य कश्चित् मा


माम् अन्नमन्नार्थिभ्यो ददाति प्रयच्छति—अन्नात्मना ब्रवीति, स इत् इत्थमेवेत्यर्थ, एवमविनष्ट यथाभूत माम् आवा अवतीत्यर्थ । य पुनरन्यो मामदत्वा अर्थिभ्य काले प्राप्तेऽन्नमत्ति तमन्नमदन्त भक्षयन्त पुरुषमहमन्नमेव सप्रत्याद्य भक्षयामि । अत्राह— एव तर्हि बिभेमि सर्वात्मत्वप्राप्त मोक्षात्, अस्तु ससार एव, यतो मुक्तोऽप्यहम् अन्नभूत अद्य स्याम् अन्यस्य । एव मा भैषी , सव्यवहारविषय त्वात् सर्वकामाशनस्य, अतीत्याय सव्यवहारविषयमन्नान्नादादिलक्षणमविद्याकृत विद्यया ब्रह्मत्वमापन्न विद्वान्, तस्य नैव द्वितीय वस्त्वन्तरमस्ति, यतो बिभेति, अतो न भेतव्य मोक्षात् । एव तर्हि किमिदमाह— अहमन्नमहमन्नाद इति? उच्यते । योऽयमन्नान्नादादिलक्षण सव्यवहार कार्यभूत, स सव्यवहारमात्रमेव, न परमार्थवस्तु । स एवभूतोऽपि ब्रह्मनिमित्तो ब्रह्मव्यतिरेकेणासन्निति कृत्वा ब्रह्मविद्याकार्यस्य ब्रह्मभावस्य स्तुत्यर्थमुच्यते—'अहमन्नमहमन्नमहमन्नम् । अहमन्नादोऽहमन्नादोऽहमन्नाद ' इत्यादि । अत भयादिदोषग न्धोऽपि अविद्यानिमित्त अविद्योच्छेदाद्ब्रह्मभूतस्य नास्तीति । अह विश्व समस्त भुवन भूतै सभजनीय ब्रह्मादिभिर्भव न्तीति वा अस्मिन् भूतानीति भुवनम् अभ्यभवाम् अभि-


भवाभि परेणेश्वरेण स्वरूपेण । सुवर्न ज्योती सुव आदित्य , नकार उपमार्थे , आदित्य इव सकृद्विभातमस्मदीय ज्योती ज्योति , प्रकाश इत्यर्थ । इति वल्लीद्वयविहिता उपनिषत् परमात्मज्ञानम् , तामेता यथोक्तामुपनिषत् शान्तो दान्त उपरतस्तितिक्षु समाहितो भूत्वा भृगुवत् तपो महदास्थाय य एव वेद, तस्येत्थ फल यथोक्तमोक्ष इति ॥

इति दशमानुवाकभाष्यम् ॥

स्नात श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवत कृता

तैत्तिरीयोपनिषद्भाष्य समाप्तम् ॥




ॐ
श नो मित्र श वरुण.। श
नो भवत्वर्यमा । श न इन्द्रो
बृहस्पति । श नो विष्णुरुरुक्-
म । नमो ब्रह्मणे। नमस्ते वा-
यो। त्वमेव प्रत्यक्ष ब्रह्मासि ।
त्वामेव प्रत्यक्ष ब्रह्मावादिषम् ।
ऋतमवादिषम् । सत्यमवादि-
षम् । तन्मामावीत् । तद्वक्तार-
मावीत् । आवीन्माम् । आवी-
द्वक्तारम् ॥
ॐ शान्ति शान्ति. शान्ति ॥



s ʊ ɯɪ ll

॥ श्री ॥

उपनिषन्मन्त्राणां

॥ वर्णानुक्रमणिका ॥

	पृष्ठम्		पृष्ठम्
अ		ऋत च स्वाध्यायप्रवचने	३६
अथाध्यात्मम्	१६	**ओ**	
अतेवास्युत्तररूपम्	१५	ओमिति ब्रह्म	३३
अन्न न निन्द्यात्	१३६	**क**	
अन्न न परिचक्षात	१३८	कुर्वाणा चीरमात्मन	१८
अन्न बहु कुर्वीत	१३९	**त**	
अन्न ब्रह्मेति यजानात्	१२९	तन्नम इत्युपासीत	१४३
अन्नाद्वै प्रजा प्रजायते	७३	**द**	
असद्वा इदमग्र आसीत्	१०१	देवपितृकार्याभ्या	४१
असन्नेव स भवति	८९	**न**	
अह वृक्षस्य रेरिवा	३९	न कचन वसतौ	१४०
अहमन्नमहमन्न	१४७	नो इतराणि	४१
आ		**प**	
आनन्दो ब्रह्मेति यजानात्	१३४	पृथिव्यन्तरिक्ष	३१
ऋ		प्राण देवा अनुप्राणन्ति	७७

	पृष्ठम्
प्राणो ब्रह्मेति यजानात्	१३१
ब	
ब्रह्मविदाप्नोति परम्	५८
भ	
भीषास्माद्वात पवते	१०६
भूर्भुव सुवरिति	२३
भृगुर्वै वारुणि	१२५
म	
मनो ब्रह्मेति यजानात्	१३२
मह इति ब्रह्म	२३
मह इत्यादित्य	२३
य	
य एव वेद	१४१
यतो वाचो निवर्त ते	८
,, ,, ,,	१२
यश पति पशुषु	१४२
यशो जनेऽसानि स्वाहा	१९
यश्छ दसामृषभो विश्वरूप	१८
ये तत्र ब्राह्मणा समर्शिन	४२
व	
वायु सधानम्	१५
विज्ञान ब्रह्मेति यजानात्	१३३
विज्ञान यश तनुते	८४
वेदमनूच्याचार्यो	४१
श	
श नो मित्र	११
,, ,, ,,	५४
शीक्षा व्याख्यास्याम	१३
श्रोत्रियस्य चाकामहतस्य	१ ७
,, ,,	१ ७
स	
स एको मनुष्यग धर्वा	१
स य एतमित्	१४९
स य एषोऽन्तर्हृदय	२७
स यश्चाय पुरुषे	१११
सह नाववतु	५७
सह नौ यश	१४
सुवरित्यादित्ये	२७

॥ ॐ ॥

छान्दोग्योपनिषद्भाष्यम्

श्रीमच्छंकरभगवत्पूज्यपादैः
विरचितम् ।



॥ श्री ॥

॥ विषयानुक्रमणिका ॥

	पृष्ठम्
प्रथमोऽध्याय	५—८०
उपोद्घात	७
ॐकारस्य रसतमत्वात्तिसमृद्धिगुणानामुक्ति	१०
प्राणदृष्ट्योंकारोपासनम्	१९
आदित्यदृष्ट्या प्राणादिदृष्ट्या च उद्गीथस्वरोपासनम्	२९
स्वरशब्दितोंकारोपासनम्	३७
वागादीना मुख्यप्राणस्य च रश्मीनामादित्यस्य च अभेददृष्ट्या उद्गीथोपासनस्य निदार्पूर्वक तेषा पुनर्भेददृष्ट्या उद्गीथोपासनम्	४१
शिलकदाल्भ्यजैवलिसवाद	९
दुर्भिक्षकाले उषस्तेर्देशान्तरगमन हस्तिपालोच्छिष्टभोजनादिप्रस्तावपूर्वकराजयज्ञदर्शनम् ऋत्विक्सवादश्च	९४
राजोषस्तिसवादपूर्वकम् आर्त्विज्यप्रस्तावेन देवताज्ञानम्	७०
कुक्कुरैरुद्गीथोपासनोपदेश	७५
भक्त्यवयवोपासनम्	७८

द्वितीयोऽध्याय ८१—१३६

साधुदृष्ट्या समस्तसामोपासना ८३

लोकदृष्ट्या हिकार प्रस्ताव उद्गीथ प्रतिहारो निधन-
मिति पञ्चविधसामोपासना ८६

वृष्टिदृष्ट्या पञ्चविधसामोपासना ८९

अन्नदृष्ट्या पञ्चविधसामोपासना ९०

ऋतुदृष्ट्या पञ्चविधसामोपासना ९१

पशुदृष्ट्या पञ्चविधसामोपासना ९२

प्राणादिदृष्ट्या पञ्चविधसामोपासना ९३

वाग्दृष्ट्या हिंकार प्रस्ताव आदिरुद्गीथ प्रतिहार उप
द्रवो निधनमिति सप्तविधसामोपासना ९५

आदित्यदृष्ट्या सप्तविधसामोपासना ९६

आदित्यजयेन सप्तविधसामोपासना १०१

प्राणेषु गायत्रसामोपासना १ ४

अग्नौ रथतरसामोपासना १०५

मिथुने वामदेव्यसामोपासना १०६

आदित्ये बृहत्सामोपासना १ ८

पर्जन्ये वैरूपसामोपासना १०९

ऋतुषु वैराजसामोपासना ११०

पृथिव्यादिदृष्ट्या शाक्करीसामोपासना १११


पशुदृष्ट्या रेवतीसामोपासना ११२


अङ्गदृष्ट्या यज्ञायज्ञीयसामोपासना ११३
देवतादृष्ट्या राजनसामोपासना ११४
त्रयीविद्यादिदृष्ट्या सामोपासना ११५
विनर्दिगुणविशिष्टसामोपासना ११७
घर्मस्क धेनोकारोपासना १२१
सामोपासनप्रसङ्गेन सामहोममन्त्रोत्थानानि, अज्ञातसा
महोमम त्रोत्थानस्य कर्मनिषेधश्च १३१

तृतीयोऽध्याय १३७—२००

आदित्यादौ म वादिदृष्टि १३९
दक्षिणदिक्स्थरश्म्यादौ मधुनाड्यादिदृष्टि १४३
पश्चिमदिक्स्थरश्म्यादौ मधुनाड्यादिदृष्टि १४४
उत्तरदिक्स्थरश्म्यादौ मधुनाड्यादिदृष्टि १४५
ऊर्ध्वदिक्स्थरश्म्यादौ मधुनाड्यादिदृष्टि १४६
प्रथमामृत यद्रोहितादिरूप वसूपजीवनभूत तस्योपासनम् १४८
द्वितीयामृत रुद्रोपजीवनभूत यत्तदुपासनम् १५१
तृतायामृतमादित्योपजीवनभूत यत्तदुपासनम् १५२
चतुर्थामृत मरुदुपजावनभूत यत्तदुपासनम् १५४
पञ्चमामृत साध्योपजीवनभूत यत्तदुपासनम् १५५
भोगक्षये आत्मनि सहृत सर्वमित्युपासनम् १५६
गायत्र्या ब्रह्मोपासनम् १५९
द्वारपालादिगौणोपासन हृदि मुख्यब्रह्मोपासनम् १६५

सवदृष्ट्या ब्रह्मोपासन मनोमयत्वाद्यारोपेण शाण्डिल्य विद्या च १७३
पुत्रदीर्घायुष्ट्वफला विराट्कोशोपासना १७९
आत्मनो दीर्घायुष्ट्वफलात्मयज्ञोपासना १८३
आत्मयज्ञोपासनाङ्गिरसन देवकीपुत्रायोक्ता अक्षयादि फला १८८
मनआदिदृष्ट्या अध्यात्माधिदैविकब्रह्मोपासना १९२
आदित्याण्डदृष्ट्या अध्यात्माधिदैविकब्रह्मोपासना १९६





ॐ

आप्यायन्तु ममाङ्गानि वा-
क्प्राणश्चक्षु श्रोत्रमथो बल-
मिन्द्रियाणि च सर्वाणि ।
सर्व ब्रह्मौपनिषद माह ब्रह्म
निराकुर्यां मा मा ब्रह्म नि-
राकरोदनिराकरणमस्त्वनि-
राकरण मेऽस्तु । तदात्मनि
निरते य उपनिषत्सु धर्मास्ते
मयि सन्तु ते मयि सन्तु ॥

ॐ शान्ति शान्ति शान्ति ॥


छान्दोग्योपनिषद्भाष्यम्
प्रथमोऽध्याय



॥ छान्दोग्योपनिषत् ॥

श्रीमच्छंकरभगवत्पादविरचितेन

भाष्येण सहिता ।



मित्येतदक्षरम्' इत्याद्यष्टाध्यायी छान्दोग्योपनिषत । तस्या सक्षेपत अर्थजिज्ञासुभ्य ऋजुविवरणमल्पग्र न्थमिदमारभ्यते । तत्र सबन्ध — समस्त कर्माधिगत प्राणादिदेवताविज्ञानसहितम् अर्चिरादिमार्गेण ब्रह्मप्रतिपत्तिकारणम्, केवल च कर्म धूमादिमार्गेण चन्द्रलोकप्रतिपत्तिकारणम्, स्वभाववृत्ताना च मार्गद्वयपरिभ्रष्टाना कष्टा अधोगतिरुक्ता, न

च उभयोर्मार्गयोरन्यतरस्मिन्नपि मार्गे आत्यन्तिकी पुरुषार्थसिद्धि – इत्यत कर्मनिरपेक्षम् अद्वैतात्मविज्ञान ससारगतिबीजहेतूपमर्देन वक्तव्यमिति उपनिषदारभ्यते । न च अद्वैतात्मविज्ञानादन्यत्र आत्यन्तिकी नि श्रेयसप्राप्ति । वक्ष्यति हि—'अथ येऽन्यथातो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति', विपर्यये च–'स स्वराड् भवति'—इति। तथा—द्वैतविषयानृताभिसधस्य बन्धनम्, तस्करस्यव तन्नपरशुग्रहणे बन्धदाहभाव, ससारदु खप्राप्तिश्च इत्युक्त्वा—अद्वैतात्मसत्याभिसधस्य, अतस्करस्येव तन्नपरशुग्रहण बन्धदाहाभाव, ससारदु खनिवृत्तिर्मोक्षश्च—इति ॥

अत एव न कर्मसहभावि अद्वैतात्मदर्शनम्, क्रियाकारकफलभेदोपमर्देन 'सत् एकमेवाद्वितीयम्' 'आत्मैवद सर्वम्' इत्येवमादिवाक्यजनितस्य बाधकप्रत्ययानुपपत्ते । कर्मविधिप्रत्यय इति चेत्, न, कर्तृभोक्तृस्वभावविज्ञानवत तज्ज्ञानतकर्मफलरागद्वेषादिदोषवतश्च कर्मविधानात् । अधिगतसकलवदार्थस्य कर्मविधानात् अद्वैतज्ञानवतोऽपि कर्मेति चेत्, न, कर्माधिकृतविषयस्य कर्तृभोक्त्रादिज्ञानस्य स्वाभाविकस्य 'सत् एकमेवाद्वितीयम्' 'आत्मैवेद सर्वम्' इत्यनेनापमर्दितत्वात् । तस्मात् अविद्यादि-

दोषवत एव कर्माणि विधीयन्ते, न अद्वैतज्ञानवत । अत एव हि वक्ष्यति—'सर्व एते पुण्यलोका भवन्ति, ब्रह्मसस्थोऽमृतत्वमेति' इति ॥

तत्रैतस्मिन्नद्वैतविद्याप्रकरणे अभ्युदयसाधनानि उपासनान्युच्यन्ते, कैवल्यसनिकृष्टफलानि च अद्वैतादीषद्विकृत ब्रह्मविषयाणि 'मनोमय प्राणशरीर' इत्यादीनि, कर्म समृद्धिफलानि च कर्माङ्गसबन्धीनि, रहस्यसामान्यात् मनोवृत्तिसामान्याच्च— यथा अद्वैतज्ञान मनोवृत्तिमात्रम्, तथा अन्यान्यप्युपासनानि मनोवृत्तिरूपाणि— इत्यस्ति हि सामान्यम् । कस्तर्हि अद्वैतज्ञानस्योपासनाना च विशष ? उच्यते— स्वाभाविकस्य आत्मन्यक्रियेऽध्यारोपितस्य कर्त्रादिकारकक्रियाफलभेदविज्ञानस्य निवर्तकमद्वैतविज्ञानम्, रज्ज्वादाविव सर्पाद्यध्यारोपलक्षणज्ञानस्य रज्ज्वादिस्वरूपनिश्चय प्रकाशनिमित्त, उपासन तु यथाशास्त्रसमर्थित किचिदालम्बनमुपादाय तस्मिन्समानचित्तवृत्तिसतानकरण तद्विलक्षणप्रत्ययानन्तरितम्— इति विशेष । तान्येतान्युपासनानि सत्त्वशुद्धिकरत्वेन वस्तुतत्त्वावभासकत्वात् अद्वैतज्ञानोपकारकाणि, आलम्बनविषयत्वात् सुखसाध्यानि च—इति पूर्वमुपन्यस्यन्ते । तत्र कर्माभ्यासस्य दृढीकृतत्वात् कर्मपरित्यागेनो-

पासन एव दु ख चेत समर्पण कर्तुमिति कर्माङ्गविषयमेव तावत् आदौ उपासनम् उपन्यस्यते ॥

ओमित्येतदक्षरमुद्गीथमुपासीत । ओमिति ह्युद्गायति तस्योपव्याख्यानम् ॥

ओमित्येतदक्षरमुद्गीथमुपासीत— ओमित्येतदक्षर परमात्मनोऽभिधान नेदिष्ठम्, तस्मिन्हि प्रयुज्यमाने स प्रसीदति, प्रियनामग्रहण इव लोक , तदिह इतिपर प्रयुक्तम् अभिधायकत्वाद्यावर्तित शब्दस्वरूपमात्र प्रतीयते , तथा च अर्चादिवत् परस्यात्मन प्रतीक सपद्यते, एव नामत्वेन प्रतीकत्वेन च परमात्मोपासनसाधन श्रेष्ठमिति सर्ववेदान्तेष्ववगतम, जपकर्मस्वाध्यायाद्यन्तेषु च बहुश प्रयोगात् प्रसिद्धमस्य श्रैष्ठ्यम, अत तदेतत्, अक्षर वर्णात्मकम्, उद्गीथभक्त्यवयवत्वादुद्गीथशब्दवाच्यम्, उपासीत— कर्माङ्गावयवभूते ॐकारे परमात्मप्रतीके दृढामैकाग्र्यलक्षणा मतिं सतनुयात् । स्वयमेव श्रुति ओंकारस्य उद्गीथशब्दवाच्यत्वे हेतुमाह— ओमिति ह्युद्गायति, ओमित्यारभ्य, हि यस्मात्, उद्गायति, अत उद्गीथ ओंकार इत्यथ ।

तस्य उपव्याख्यानम्— तस्य अक्षरस्य, उपव्याख्यानम्

एवमुपासनमेवविभूत्येवफलमित्यादिकथनम् उपव्याख्यानम्, प्रवर्तत इति वाक्यशेष —

एषा भूताना पृथिवी रस पृथिव्या आपो रस' । अपामोषधयो रस ओषधीना पुरुषो रस' पुरुषस्य वाग्रसो वाच ऋग्रस ऋच साम रस साम्न उद्गीथो रस ॥ २ ॥

एषा चराचराणा भूताना पृथिवी रस गति परायणमवष्टम्भ, पृथिव्या आप रस — अप्सु हि ओता च प्रोता च पृथिवी, अत ता रस पृथिव्या । अपाम् ओषधय रस, अप्परिणामत्वादोषधीनाम्, तासा पुरुषो रस, अन्नपरिणामत्वात्पुरुषस्य, तस्यापि पुरुषस्य वाक् रस — पुरुषावयवाना हि वाक् सारिष्ठा, अतो वाक् पुरुषस्य रस उच्यते, तस्या अपि वाच, ऋक् रस सारतरा, ऋच साम रस सारतरम्, तस्यापि साम्न उद्गीथ प्रकृतत्वादोंकार सारतर ॥

स एष रसाना२ रसतमः परम परार्ध्योऽष्टमो यदुद्गीथ ॥ ३ ॥

एवम्— स एष उद्गीथारय ॐकार , भूतादीनामुत्तरोत्त-ररसानाम् , अतिशयेन रस रसतम , परम , परमात्मप्र-तीकत्वात् , परार्ध्य — अर्ध स्थानम् , पर च तदर्ध च परार्धम् , तदर्हतीति परार्ध्य ,— परमात्मस्थानार्ह , परमात्मवदुपा स्यत्वादित्यभिप्राय , अष्टम — प्रथिव्यादिरससरयायाम् , यदुद्गीथ य उद्गीथ ॥

कतमा कतमर्क्कतमत्कतमत्साम कतम' कतम उद्गीथ इति विमृष्ट भवति ॥ ४ ॥

वाच ऋग्रस इत्युक्तम् , कतमा सा ऋक् ? कतमत्त त्साम ? कतमो वा स उद्गीथ ? कतमा ऋतमेति वीप्सा आदरा-र्था । ननु 'या बहूना जातिपरिप्रश्ने डतमच' इति डतमच्प्र-त्यय इष्ट , न हि अत्र ऋग्जातिबहुत्वम् , कथ डतमच्प्रयोग ? नैष दोष , जातौ परिप्रश्नो जातिपरिप्रश्न —इत्येतस्मिन्विग्रहे जातावृग्व्यक्तीना बहुत्वोपपत्ते , न तु जाते परिप्रश्न इति विग्रह्यते । ननु जात परिप्रश्न —इत्यस्मिन्विग्रहे 'कतम कठ' इत्याद्युदाहरणमुपपन्नम् , जातौ परिप्रश्न इत्यत्र तु न युज्यते— तत्रापि कठादिजातावेव व्यक्तिबहुत्वाभिप्रायेण परिप्रश्न इत्य-दोष । यदि जाते परिप्रश्न स्यात् , 'कतमा कतमर्क्' इत्या

दावुपसख्यान कर्तव्य स्यात । विमृष्ट भवति विमर्श कृतो भवति ॥

वागेवर्क्प्राण सामोमित्येतदक्षरमुद्गी-थ । तद्वा एतन्मिथुन यद्वाक्च प्राणश्च-र्क्च साम च ॥ ५ ॥

विमर्शे हि कृते सति, प्रतिवचनोक्तिरुपपन्ना— वागव ऋक् प्राण साम ओमित्येतदक्षरमुद्गीथ इति । वागृचोरेक-त्वेऽपि न अष्टमत्वव्याघात , पूर्वस्मात् वाक्यान्तरत्वात् , आ-प्रिगुणसिद्धये हि ओमित्येतदक्षरमुद्गीथ इति । वाक्प्राणौ ऋक्सामयोनी इति वागेव ऋक् प्राण साम इत्युच्यत , यथा-क्रमम ऋक्सामयोन्योर्वाक्प्राणयोग्रहणे हि सर्वासामृचा स-र्वेषा च साम्नामवरोध कृत स्यात्, सर्वर्क्सामावरोधे च ऋक्सामसाध्याना च सर्वकर्मणामवरोध कृत स्यात्, तद-वरोधे च सर्वे कामा अवरुद्धा स्यु । ओमित्येतदक्षरम् उद्गीथ इति भक्त्याशङ्का निवर्त्यते । तद्वा एतत् इति मिथुन निर्दिश्यते । कि तन्मिथुनमिति, आह— यद्वाक्च प्राणश्च सर्वर्क्सामकारणभूतौ मिथुनम्, ऋक्च साम चेति ऋक्सा मकारणौ ऋक्सामशब्दोक्तावित्यर्थ , न तु स्वातन्त्र्येण ऋक्च

साम च मिथुनम्। अन्यथा हि वाक्प्राणश्च इत्येक मिथुनम्, ऋक्साम च अपरम्, इति द्वे मिथुन स्याताम्, तथा च तद्वा एतन्मिथुनम् इत्येकवचननिर्देशोऽनुपपन्न स्यात्, तस्मात् ऋक्सामयोन्योर्वाक्प्राणयोरेव मिथुनत्वम् ॥

तदेतन्मिथुनमोमित्येतस्मिन्नक्षरे स॰ सृज्यते यदा वै मिथुनौ समागच्छत आपयतो वै तावन्योन्यस्य कामम् ॥ ६ ॥

तदेतत् एवलक्षण मिथुनम् ओमित्येतस्मिन्नक्षरे ससृज्यते, एव सर्वकामाप्तिगुणविशिष्ट मिथुनम् ओकारे ससृष्ट विद्यत इति ओंकारस्य सर्वकामाप्तिगुणवत्त्व सिद्धम्, वाङ्मयत्वम ओकारस्य प्राणनिष्पाद्यत्व च मिथुनेन ससृष्टत्वम। मिथुनस्य कामापयितृत्व प्रसिद्धमिति दृष्टान्त उच्यते— यथा लोके मिथुनौ मिथुनावयवौ स्त्रीपुसौ यदा समागच्छत ग्राम्यधर्मतया सयुज्येयाता तदा आपयत प्रापयत अन्योन्यस्य इतरेतरस्य तौ कामम्, तथा स्वात्मानुप्रविष्टेन मिथुनेन सर्वकामाप्तिगुणवत्त्वम् ओकारस्य सिद्धमित्यभिप्राय ॥

तदुपासकोऽप्युद्गाता तद्धर्मा भवतीत्याह—

आपयिता ह वै कामाना भवति य एतदेव विद्वानक्षरमुद्गीथमुपास्ते ॥ ७ ॥

आपयिता ह वै कामाना यजमानस्य भवति, य एतत अक्षरम् एवम् आग्निगुणवत् उद्गीथम् उपास्ते, तस्य एतद्यथोक्त फलमित्यथ, 'त यथा यथोपासते तदेव भवति' इति श्रुते ॥

तद्धा एतदनुज्ञाक्षर यद्धि किंचानुजानात्योमित्येव तदाहैषो एव समृद्धिर्यद नुज्ञा समर्धयिता ह वै कामाना भवति य एतदेव विद्वानक्षरमुद्गीथमुपास्ते ॥ ८ ॥

समृद्धिगुणवाश्च ओंकार, कथम्? तत् वै एतत् प्रकृतम्, अनुज्ञाक्षरम् अनुज्ञा च सा अक्षर च तत्, अनुज्ञा च अनुमति, ओंकार इत्यर्थ । कथमनुज्ञेति, आह श्रुतिरेव—यद्धि किंच यत्किंच लोके ज्ञान धन वा अनुजानाति विद्वान् धनी वा, तत्रानुमतिं कुर्वन् ओमित्येव तदाह, तथा च वेदे 'त्रयस्त्रिशदित्योमिति होवाच' इत्यादि, तथा च लोकेऽपि तवेद धन ग्रहाणि इत्युक्ते ओमित्येव आह। अत एषा उ एव एषैव हि समृद्धि यदनुज्ञा या अनुज्ञा सा समृद्धि, तन्मूलत्वादनु-

ज्ञाया , समृद्धो हि ओमित्यनुज्ञा ददाति, तस्मात् समृद्धि गुणवानोंकार इत्यर्थ । समृद्धिगुणोपासकत्वात् तद्धर्मा सन समर्धयिता ह वै कामाना यजमानस्य भवति, य एतदेव विद्वानक्षरमुद्गीथमुपास्ते इत्यादि पूर्ववत् ॥

तेनेय त्रयीविद्या वर्तते ओमित्याश्रावयत्योमिति शꣳसत्योमित्युद्गायत्येतस्यैवाक्षरस्यापचित्यै महिम्ना रसेन ॥ ९ ॥

अथ इदानीमक्षर स्तौति, उपास्यत्वात्, प्ररोचनार्थम्, कथम् ? तेन अक्षरेण प्रकृतेन इयम् ऋग्वेदादिलक्षणा त्रयीविद्या, त्रयीविद्याविहित कर्मेत्यर्थ — न हि त्रयीविद्यैव— आश्रावणादिभिर्वर्तते । कर्म तु तथा प्रवर्तत इति प्रसिद्धम्, कथम् ? ओमित्याश्रावयति ओमिति शसति ओमित्युद्गायति, लिङ्गाच्च सोमयाग इति गम्यते । तच्च कर्म एतस्यैव अक्षरस्य अपचित्यै पूजाथम्, परमात्मप्रतीक हि तत्, तदपचिति परमात्मन एव स्यात्, 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानव' इति स्मृते । किंच, एतस्यैवाक्षरस्य महिम्ना महत्त्वेन ऋत्विग्यजमानादिप्राणैरित्यर्थ , तथा एतस्यैवाक्षरस्य रसेन व्रीहियवादिरसनिर्वृत्तेन हविषेत्यर्थ ,

यागहोमादि अक्षरेण क्रियते, तच्च आदित्यमुपतिष्ठते, ततो वृष्ट्यादिक्रमेण प्राणोऽन्न च जायते, प्राणैरन्नेन च यज्ञस्तायते, अत उच्यते— अक्षरस्य महिम्ना रसेन इति ॥

तत्र अक्षरविज्ञानवत कर्म कर्तव्यमिति स्थितमाक्षिपति—

तेनोभौ कुरुतो यश्चैतदेव वेद यश्च न वेद । नाना तु विद्या चाविद्या च यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति खल्वेतस्यैवाक्षरस्योपव्याख्यान भवति ॥ १० ॥

इति प्रथमाध्यायस्य प्रथमः खण्ड' ॥

तेन अक्षरेण उभौ कुरुत , यश्च एतत् अक्षरम् एव यथा व्याख्यात वेद, यश्च कर्ममात्रवित् अक्षरयाथात्म्य न वेद, तावुभौ कुरुत कर्म, तयोश्च कर्मसामर्थ्यादेव फल स्यात्, किं तत्राक्षरयाथात्म्यविज्ञानेन इति, दृष्ट हि लोके हरीतकीं भक्षयतो तद्रसाभिज्ञेतरयो विरेचनम्—नैवम्, यस्मात् नाना तु विद्या च अविद्या च, भिन्ने हि विद्याविद्ये, तु शब्द

पक्षव्यावृत्त्यर्थं , न ओंकारस्य कर्माङ्गत्वमात्रविज्ञानमेव रसतमाप्तिसमृद्धिगुणवद्विज्ञानम्, किं तर्हि? ततोऽभ्यधिकम्, तस्मात् तदङ्गाधिक्यात् तत्फलाधिक्य युक्तमित्यभिप्राय , दृष्ट हि लोके वणिक्शबरयो पद्मरागादिमणिविक्रये वणिजो विज्ञानाधिक्यात् फलाधिक्यम्, तस्मात् यदेव विद्यया विज्ञानेन युक्त सन् करोति कर्म श्रद्धया श्रद्दधानश्च सन्, उपनिषदा योगेन युक्तश्चेत्यर्थ , तदेव कर्म वीर्यवत्तरम् अविद्वत्कर्मणोऽधिकफल भवतीति, विद्वत्कर्मणो वीर्यवत्तरत्ववचनादविदुषोऽपि कर्म वीर्यवदेव भवतीत्यभिप्राय । न च अविदुष कर्मण्यनधिकार , औषस्त्ये काण्डे अविदुषामप्यार्त्विज्यदर्शनात् । रसतमाप्तिसमृद्धिगुणवदक्षरमित्येकमुपासनम्, मध्ये प्रयत्नान्तरादर्शनात्, अनेकैर्हि विशेषणै अनेकधा उपास्यत्वात् खलु एतस्यैव प्रकृतस्य उद्गीथाख्यस्य अक्षरस्य उपव्याख्यान भवति ॥

इति प्रथमखण्डभाष्यम् ॥



द्वितीय खण्ड ॥

देवासुरा ह वै यत्र सयेतिरे उभये प्राजापत्यास्तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिभविष्याम इति ॥ १ ॥

देवासुरा देवाश्च असुराश्च, देवा दीव्यतेर्द्योतनार्थस्य शास्त्रोद्भासिता इन्द्रियवृत्तय , असुरा तद्विपरीता स्वेष्वेवासुषु विष्वग्विषयासु प्राणनक्रियासु रमणात् स्वाभाविक्य तमआत्मिका इन्द्रियवृत्तय एव, ह वै इति पूर्ववृत्तोद्भासकौ निपातौ, यत्र यस्मिन्निमित्ते इतरेतरविषयापहारलक्षणे सयेतिरे, सपूर्वस्य यतते सग्रामाथत्वमिति, सग्राम कृतवन्त इत्यर्थ । शास्त्रीयप्रकाशवृत्त्यभिभवनाय प्रवृत्ता स्वाभाविक्यस्तमोरूपा इन्द्रियवृत्तय असुरा, तथा तद्विपरीता शास्त्रार्थविषयविवेकज्योतिरात्मान देवा स्वाभाविकतमोरूपासुराभिभवनाय प्रवृत्ता इति अन्योन्याभिभवोद्भवरूप सग्राम इव, सर्वप्राणिषु प्रतिदेह देवासुरसग्रामा अनादिकालप्रवृत्त इत्यभिप्राय । स इह श्रुत्या आख्यायिकारूपेण धर्मा-

धर्मोत्पत्तिविवेकविज्ञानाय कथ्यते प्राणविशुद्धिविज्ञानविधिपरतया। अत उभयेऽपि देवासुरा, प्रजापतेरपत्यानीति प्राजापत्या — प्रजापति कर्मज्ञानाधिकृत पुरुष, 'पुरुष एवोक्थमयमेव महान्प्रजापति' इति श्रुत्यन्तरात्, तस्य हि शास्त्रीया स्वाभाविक्यश्च करणवृत्तयो विरुद्धा अपत्यानीव, तदुद्भवत्वात्। तत् तत्र उत्कर्षापकर्षलक्षणनिमित्ते ह देवा उद्गीथम् उद्गीथभक्त्युपलक्षितमौद्गात्र कर्म आजह्रु आहृतवन्त, तस्यापि केवलस्य आहरणासभवात् ज्योतिष्टोमाद्या हृतवन्त इत्यभिप्राय। तत्किमर्थमाजह्रुरिति, उच्यते—अनेन कर्मणा एनान् असुरान् अभिभविष्याम इति एवमभिप्राया सन्त ॥

यदा च तदुद्गीथ कर्म आजिहीर्षव, तदा—

ते ह नासिक्य प्राणमुद्गीथमुपासाचक्रिरे तꣳ हासुरा' पाप्मना विविधुस्तस्मात्तेनोभय जिघ्रति सुरभि च दुर्गन्धि च पाप्मना ह्येष विद्ध ॥ २ ॥

त ह देवा नासिक्य नासिकाया भव प्राण चेतनावन्त प्राणम् उद्गीथकर्तारम् उद्गातारम् उद्गीथभक्त्या उपासाचक्रिरे

उपासन कृतवन्त इत्यर्थ , नासिक्यप्राणदृष्ट्या उद्गीथारयम क्षरमोंकारम् उपासाचक्रिरे इत्यर्थ । एव हि प्रकृतार्थपरित्याग अप्रकृतार्थोपादान च न कृत स्यात्—'खल्वेतस्याक्षरस्य' इत्योंकारो हि उपास्यतया प्रकृत । ननु उद्गीथोपलक्षित कर्म आहृतवन्त इत्यवोच , इदानीमेव कथ नासिक्यप्राण-दृष्ट्या उद्गीथारयमक्षरमोकारम् उपासाचक्रिर इत्याथ ? नैष दोष , उद्गीथकर्मण्येव हि तत्कर्तृप्राणदेवतादृष्ट्या उ द्गीथभक्त्यवयवश्च ओंकार उपास्यत्वेन विवक्षित , न स्व तन्त्र , अत तादर्थ्येन कर्म आहृतवन्त इति युक्तमेवोक्तम् । तम् एव देवैर्वृतमुद्गातार ह असुरा स्वाभाविकतमआत्मान ज्योतीरूप नासिक्य प्राण देव स्वकीयेन पाप्मना अधर्मा सङ्गरूपेण विविधु विद्धवन्त , ससर्ग कृतवन्त इत्यर्थ । स हि नासिक्य प्राण कल्याणग धग्रहणाभिमानासङ्गा-भिभूतविवेकविज्ञानो बभूव , स तेन दोषेण पाप्मससर्गी बभूव तदिदमुक्तमसुरा पाप्मना विविधुरिति । यस्मादा-सुरेण पाप्मना विद्ध , तस्मात् तेन पाप्मना प्रेरित प्राण दुर्गन्धग्राहक प्राणिनाम् । अत तेन उभय जिघ्रति लोक सुरभि च दुर्गन्धि च, पाप्मना हि एष यस्मात् विद्ध । उभयग्रहणम् अविवक्षितम्—'यस्योभय हविरार्तिमार्च्छति'

इति यद्वत्, 'यदेवेदमप्रतिरूप जिघ्रति' इति समान-प्रकरणश्रुत ॥

अथ ह वाचमुद्गीथमुपासाचक्रिरे ताꣳ ह्यासुरा पाप्मना विविधुस्तस्मात्तयोभय वदति सत्य चानृत च पाप्मना ह्येषा विद्धा ॥ ३ ॥

अथ ह चक्षुरुद्गीथमुपासाचक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभय पश्यति दर्शनीय चादर्शनीय च पाप्मना ह्येतद्विद्धम् ॥ ४ ॥

अथ ह श्रोत्रमुद्गीथमुपासाचक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयꣳ शृणोति श्रवणीय चाश्रवणीय च पाप्मना ह्येतद्विद्धम् ॥ ५ ॥

अथ ह मन उद्गीथमुपासाचक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयꣳ

सकल्पते सकल्पनीय चासकल्पनीय च पाप्मना ह्येतद्विद्धम् ॥ ६ ॥

मुख्यप्राणस्य उपास्यत्वाय तद्विशुद्धत्वानुभवार्थं अय वि चार श्रुत्या प्रवर्तित । अत चक्षुरादिदेवता क्रमेण विचार्य आसुरेण पाप्मना विद्धा इत्यपोह्यन्ते । समानमन्यत् — अथ ह वाच चक्षु श्रोत्र मन इत्यादि । अनुक्ता अप्यन्या त्वग्रसनादिदेवता द्रष्टव्या , ' एवमु खल्वेता देवता पाप्मभि ' इति श्रुत्यन्तरात् ॥

अथ ह य एवाय मुख्य प्राणस्तमुद्गीथमुपासांचक्रिरे तꣳ हासुरा ऋत्वा विद्ध्वसुर्यथाऽश्मानमाखणमृत्वा विध्वꣳसेतैवम् ॥ ७ ॥

आसुरेण पाप्मना विद्धत्वात् प्राणादिदेवता अपोह्य, अथ अनन्तरम् , ह, य एवाय प्रसिद्ध , मुखे भव मुख्य प्राण , तम् उद्गीथम् उपासाचक्रिर, त ह असुरा पूर्ववत् ऋत्वा प्राप्य विदध्वसु विनष्टा , अभिप्रायमात्रेण, अकृत्वा किंचिदपि प्राणस्य , कथ विनष्टा इति, अत्र दृष्टान्तमाह—यथा लोके अश्मानम् आखणम्— न शक्यते खनितु कुदालादिभिरपि,

टङ्कैश्च छेत्तु न शक्य अखन , अखन एव आखण , तम्—कृत्वा—सामर्थ्यात् लोष्ट पासुपिण्ड , श्वभ्रान्तराच्च— अश्मनि क्षिप्त अश्मभेदनाभिप्रायेण, तस्य अश्मन किंचिदप्यकृत्वा स्वय विध्वसेत विदीर्येत— एव विदध्वसुरित्यर्थ । एव विशुद्ध असुरैरधर्षितत्वात् प्राण इति ॥

यथाश्मानमाखणमृत्वा विध्वꣳसत एवꣳ हैव स विध्वꣳसते य एवविदि पाप कामयते यश्चैनमभिदासति स एषोऽश्माखण ॥ ८ ॥

एवविद प्राणात्मभूतस्य इद फलमाह—यथाश्मानमिति । एष एव दृष्टान्त , एव हैव स विध्वसते विनश्यति , कोऽसाविति, आह— य एवविदि यथोक्तप्राणविदि पाप तदनर्ह कर्तु कामयते इच्छति यश्चापि एनम् अभिदासति हिनस्ति प्राणविद प्रति आक्राशताडनादि प्रयुङ्क्ते, सोऽप्येवमेव विध्वसत इत्यर्थ , यस्मात् स एष प्राणवित् प्राणभूतत्वात् अश्माखण इव अश्माखण अधर्षणीय इत्यथ । ननु नासिक्योऽपि प्राण वाय्वात्मा, यथा मुख्य , तत्र नासिक्य प्राण पाप्मना विद्ध—प्राण एव सन्, न मुख्य —कथम्? नैष दोष , नासिक्यस्तु

स्थानकरणवैगुण्यात् असुरै पाप्मना विद्ध , वाग्वात्मापि सन्, मुख्यस्तु तदसभवात् स्थानदेवताबलीयस्त्वात् न विद्ध इति श्लिष्टम्—यथा वास्यादय शिक्षावत्पुरुषाश्रया कार्यविशेष कुर्वन्ति, न अन्यहस्तगता , तद्वत् दोषवद्घ्राणसचिवत्वाद्विद्धा घ्राणदेवता, न मुख्य ॥

नैवैतेन सुरभि न दुर्गन्धि विजानात्यपहतपाप्मा ह्येष तेन यदश्नाति यत्पिबति तेनेतरान्प्राणानवति एतमु एवान्ततोऽविस्वोत्क्रामति व्याददात्येवान्तत इति ॥ ९ ॥

यस्मान्न विद्ध असुरै मुख्य , तस्मात् नैव एतेन सुरभि न दुर्गन्धि च विजानाति लोक , घ्राणेनैव तदुभय विजानाति, अतश्च पाप्मकार्यादर्शनात् अपहतपाप्मा अपहत विनाशित अपनीत पाप्मा यस्मात् सोऽयमपहतपाप्मा हि एष , विशुद्ध इत्यर्थ । यस्माच्च आत्मभरय कल्याणाद्यासङ्गवत्त्वात् घ्राणादय — न तथा आत्मभरिर्मुख्य , किं तर्हि ? सर्वार्थ , कथमिति, उच्यते—तेन मुख्येन यद श्नाति यत्पिबति लोक तेन अशितेन पीतेन च इतरान्

प्राणान् घ्राणादीन अवति पालयति, तन हि तेषा स्थिति-र्भवतीत्यर्थ, अत सर्वंभरि प्राण, अतो विशुद्ध । कथ पुनर्मुख्याशितपीताभ्या स्थिति इतरेषा गम्यत इति, उच्यते— एतमु एव मुख्य प्राण मुख्यप्राणस्य वृत्तिम्, अन्नपाने इत्यर्थ, अन्तत अन्ते मरणकाले अविच्त्वा अलब्ध्वा उत्क्रामति, घ्राणादिप्राणसमुदाय इत्यर्थ, अप्राणो हि न शक्नोत्यशितु पातु वा, तदा उत्क्रान्ति प्रसिद्धा घ्राणादिकलापस्य, दृश्यते हि उत्क्रान्तौ प्राणस्याशिशिषा, यत व्याददा-त्येव, आस्यविदारण करोतीत्यथ, तद्धि अन्नालाभे उत्का-न्तस्य लिङ्गम ॥

त ह्राङ्गिरा उद्गीथमुपासाचक्र एतमु एवाङ्गिरस मन्यन्तेऽङ्गाना यद्रस' ॥ १० ॥

त ह अङ्गिरा — त मुख्य प्राण ह अङ्गिरा इत्येवगुणम् उद्गीथम् उपासाचक्र उपासन कृतवान्, बको दाल्भ्य इति वक्ष्यमाणेन सबध्यते, तथा बृहस्पतिरिति, आयास्य इति च उपासाचक्रे बक इत्येव सब ध कृतवन्त केचित्, एतमु एवाङ्गिरस बृहस्पतिमायास्य प्राण मन्यन्ते— इति वचनात् । भवत्येव यथाश्रुतासभवे, सभवति तु यथाश्रुतम ऋषिचोदनायामपि—श्रुत्यन्तरवत्—' तस्माच्छतार्चिन इत्याच-

क्षते एतमेव सन्तम्' ऋषिमपि, तथा माध्यमा गृत्समदो विश्वा मित्रो वामदेवोऽत्रि इत्यादीन् ऋषीनेव प्राणमापादयति श्रुति, तथा तानपि ऋषीन् प्राणोपासकान् अङ्गिरोबृहस्पत्यायास्यान् प्राण करोत्यभेदविज्ञानाय— 'प्राणो ह पिता प्राणो माता' इत्यादिवच्च । तस्मात् ऋषि अङ्गिरा नाम, प्राण एव सन्, आत्मानमङ्गिरस प्राणमुद्गीथम् उपासाचक्रे इत्येतत्, यत् यस्मात् स अङ्गाना प्राण सन् रस, तेनासौ अङ्गिरस ॥

तेन त४ ह बृहस्पतिरुद्गीथमुपासाचक्र एतमु एव बृहस्पति मन्यन्ते वाग्घि बृहती तस्या एष पति' ॥ ११ ॥

तथा वाचो बृहत्या पति तेनासौ बृहस्पति ॥

तेन त४ हायास्य उद्गीथमुपासाचक्र एतमु एवायास्यं मन्यन्त आस्याद्ध्यते ॥

तथा यत् यस्मात् आस्यात् अयते निर्गच्छति तेन आयास्य ऋषि प्राण एव सन् इत्यर्थ । तथा अन्योऽप्युपासक आत्मानमेव आङ्गिरसादिगुण प्राणमुद्गीथमुपासीतेत्यर्थ ॥

तेन त४ ह बको दाल्भ्यो विदाचकार ।

स ह नैमिशीयानामुद्गाता बभूव स ह स्मैभ्य कामानागायति ॥ १३ ॥

न केवलमङ्गिर प्रभृतय उपासाचक्रिरे, त ह बको नाम दल्भस्यापत्य दाल्भ्य विदाचकार यथादर्शित प्राण विज्ञा तवान्, विदित्वा च स ह नैमिशीयाना सत्रिणाम् उद्गाता बभूव, स च प्राणविज्ञानसामर्थ्यात् एभ्य नैमिशीयेभ्य कामान् आगायति स्म ह आगीतवान्किलेत्यथ ॥

आगाता ह वै कामाना भवति य एतदेव विद्वानक्षरमुद्गीथमुपास्त इत्यध्यात्मम् ॥ १४ ॥

इति द्वितीय खण्ड ॥

तथा अन्योऽप्युद्गाता आगाता ह वै कामाना भवति, य एतत् एव विद्वान् यथोक्तगुण प्राणम् अक्षरमुद्गीथमुपास्ते, तस्य एतद्दृष्ट फलम् उक्तम्, प्राणात्मभावस्त्वदृष्टम्— 'देवो भूत्वा देवानप्येति' इति श्रुत्यन्तरात्सिद्धमेवेत्यभिप्राय । इत्यध्यात्मम्—एतत् आत्मविषयम् उद्गीथोपासनम् इति उक्तोपसहार, अधिदैवतोद्गीथोपासने वक्ष्यमाणे, बुद्धिसमाधानार्थ ॥

इति द्वितीयखण्डभाष्यम् ॥

तृतीय खण्ड ॥

अथाधिदैवत य एवासौ तपति तमुद्गीथमुपासीतोद्यन्वा एष प्रजाभ्य उद्गायति। उद्यꣳस्तमो भयमपहन्त्यपहन्ता ह वै भयस्य तमसो भवति य एव वेद॥ १ ॥

अथ अनन्तरम् अधिदैवत देवताविषयमुद्गीथोपासन प्रस्तुतमित्यर्थ, अनेकधा उपास्यत्वादुद्गीथस्य, य एवासौ आदित्य तपति, तम् उद्गीथमुपासीत आदित्यदृष्ट्या उद्गीथमुपासीतेत्यर्थ, तमुद्गीथम् इति उद्गीथशब्द अक्षरवाची सन् कथमादित्ये वर्तत इति, उच्यते— उद्यन् उद्गच्छन् वै एष प्रजाभ्य प्रजार्थम् उद्गायति प्रजानामन्नोत्पत्त्यर्थम्, न हि अनुद्यति तस्मिन्, व्रीह्यादे निष्पत्ति स्यात्, अत उद्गाय तीवोद्गायति— यथैवोद्गाता अन्नार्थम्, अत उद्गीथ सवितेत्यर्थ। किंच उद्यन् नैश तम तच्च भय प्राणिनाम् अपहन्ति, तमेवगुण सवितार य वेद, स अपहन्ता नाशयिता

ह वै भयस्य जन्ममरणादिलक्षणस्य आत्मन तमसश्च तत्कारणस्याज्ञानलक्षणस्य भवति ॥

यद्यपि स्थानभेदात्प्राणादित्यौ भिन्नाविव लक्ष्येते, तथापि न स तत्त्वभेदस्तयो । कथम्—

समान उ एवाय चासौ चोष्णोऽयमु ष्णोऽसौ स्वर इतीममाचक्षते स्वर इति प्रत्यास्वर इत्यमु तस्माद्वा एतमिममु चोद्गीथमुपासीत ॥ २ ॥

समान उ एव तुल्य एव प्राण सवित्रा गुणत , सविता च प्राणेन , यस्मात् उष्णोऽय प्राण उष्णश्चासौ सविता । किच स्वर इति इम प्राणमाचक्षते कथयन्ति, तथा स्वर इति प्रत्यास्वर इति च अमु सवितारम् , यस्मात् प्राण स्वरत्येव न पुनर्मृत प्रत्यागच्छति, सविता तु अस्तमित्वा पुनरप्यहन्यहनि प्रत्यागच्छति, अत प्रत्यास्वर , अस्मात् गुणतो नामतश्च समानावितरेतर प्राणादित्यौ । अत तत्त्वाभेदात् एत प्राणम् इमम् अमु च आदित्यम् उद्गीथमुपासीत ॥

अथ खलु व्यानमेवोद्गीथमुपासीत यद्वै प्राणिति स प्राणो यदपानिति सो

ऽपान । अथ य प्राणापानयो सधि स व्यानो यो व्यान सा वाक् । तस्मादप्राणन्ननपानन्वाचमभिव्याहरति ॥ ३ ॥

अथ खलु इति प्रकारान्तरेणोपासनमुद्गीथस्योच्यते, व्यानमेव वक्ष्यमाणलक्षण प्राणस्यैव वृत्तिविशेषम् उद्गीथम् उपासीत । अधुना तस्य तत्त्व निरूप्यते—यद्वै पुरुष प्राणिति मुखनासिकाभ्या वायु बहिर्नि सारयति, स प्राणाख्यो वायोर्वृत्तिविशेष , यदपानिति अपश्वसिति ताभ्या मेवान्तराकर्षति वायुम , स अपान अपानाख्या वृत्ति । तत किमिति, उच्यते—अथ य उक्तलक्षणयो प्राणापानयो सधि तयोरन्तरा वृत्तिविशेष , स व्यान , य साख्यादिशास्त्रप्रसिद्ध , श्रुत्या विशेषनिरूपणात्—नासौ व्यान इत्यभिप्राय । कस्मात्पुन प्राणापानौ हित्वा महता आयासेन व्यानस्यैवोपासनमुच्यते? वीर्यवत्कर्महेतुत्वात् । कथ वीर्यवत्कर्महेतुत्वमिति, आह—य व्यान सा वाक्, व्यानकार्यत्वाद्वाच । यस्माद्व्याननिर्वर्त्या वाक्, तस्मात् अप्राणन्ननपानन् प्राणापानव्यापारावकुर्वन् वाचमभिव्याहरति उच्चारयति लोक ॥

या वाक्सर्क्तस्मादप्राणन्ननपानन्नृचम

भिव्याहरति यर्क्तत्साम तस्मादप्राणन्नन पानन्साम गायति यत्साम स उद्गीथस्त स्मादप्राणन्नपानन्नुद्गायति ॥ ४ ॥

तथा वाग्विशेषामृचम्, ऋक्सस्थ च साम, सामावयव चोद्गीथम्, अप्राणन्ननपानन् व्यानेनैव निवर्तयतीत्यभिप्राय ॥

अतो यान्यन्यानि वीर्यवन्ति कर्माणि यथाग्नेर्मन्थनमाजे सरण दृढस्य धनुष आयमनमप्राणन्ननपान ऽस्तानि करोत्येत स्य हेतोर्व्यानमेवोद्गीथमुपासीत ॥ ५ ॥

न केवल वागाद्यभिव्याहरणमेव, अत अस्मात् अन्यान्यपि यानि वीर्यवन्ति कर्माणि प्रयत्नाधिक्यनिर्वर्त्यानि— यथा अग्नेर्मन्थनम्, आजे मर्यादाया सरण धावनम्, दृढस्य धनुष आयमनम् आकर्षणम्— अप्राणन्ननपानस्तानि करोति, अतो विशिष्ट व्यान प्राणादिवृत्तिभ्य । विशिष्टस्योपासन ज्याय, फलवत्त्वाद्राजोपासनवत् । एतस्य हेतो एतस्मात्कारणात् व्यानमेवोद्गीथमुपासीत, नान्यद्वृत्त्यन्तरम् । कर्मवीर्यवत्तरत्व फलम् ॥

अथ खलूद्गीथाक्षराण्युपासीतोद्गीथ इति प्राण एवोत्प्राणेन ह्युत्तिष्ठति वाग्गीर्वाचो ह गिर इत्याचक्षतेऽन्न थमन्ने हीद५ सर्व५ स्थितम् ॥ ६ ॥

अथ अधुना खलु उद्गीथाक्षराण्युपासीत भक्त्यक्षराणि मा भूवन्नित्यतो विशिनष्टि—उद्गीथ इति, उद्गीथनामाक्षराणीत्यर्थ —नामाक्षरोपासनेऽपि नामवत एवोपासन कृत भवेत् अमुकमिश्रा इति यद्वत् । प्राण एव उत्, उदित्यस्मिन्नक्षरे प्राणदृष्टि । कथ प्राणस्य उत्त्वमिति, आह—प्राणेन हि उत्तिष्ठति सर्व , अप्राणस्यावसाददर्शनात्, अतोऽस्त्युद प्राणस्य च सामान्यम् । वाक् गी , वाचो ह गिर इत्याचक्षते शिष्टा । तथा अन्न थम्, अन्ने हि इद सर्व स्थितम्, अत अस्त्यन्नस्य थाक्षरस्य च सामान्यम् ॥

त्रयाणा श्रुत्युक्तानि सामान्यानि, तानि तेनानुरूपेण शेषेष्वपि द्रष्टव्यानि—

द्यौरेवोदन्तरिक्ष गीः पृथिवी थमादित्य एवोद्वायुर्गीरग्निस्थ५ सामवेद एवोद्यजुर्वेदो गीर्ऋग्वेदस्थ दुग्धेऽस्मै वाग्दोह

यो वाचो दोहोऽन्नवानन्नादो भवति य एतान्येव विद्वानुद्गीथाक्षराण्युपास्त उद्गीथ इति ॥ ७ ॥

द्यौरेव उत् उच्चै स्थानात्, अन्तरिक्ष गी गिरणाल्लोकानाम्, पृथिवी थ प्राणिस्थानात्, आदित्य एव उत् ऊर्ध्वत्वात्, वायु गी अन्न्यादीना गिरणात्, अग्नि थ याज्ञीयकर्मावस्थानात्, सामवेद एव उत् स्वर्गसस्तुतत्वात्, यजुर्वेदो गी यजुषा प्रत्तस्य हविषो देवताना गिरणात्, ऋग्वेद थम् ऋन्यध्यूढत्वात्साम्न । उद्गीथाक्षरोपासनफलमधुनोच्यते—दुग्धे दोग्धि असौ साधकाय, का सा? वाक्, कम? दोहम, कोऽसौ दोह इति, आह— यो वाचो दोह, ऋग्वेदादिशब्दसाध्य फलमित्यभिप्राय, तत् वाचो दोह त स्वयमेव वाक् दोग्धि आत्मानमेव दोग्धि। किंच अन्नवान् प्रभूतान्न अन्नादश्च दीप्ताग्निर्भवति, य एतानि यथोक्तानि एव यथोक्तगुणानि उद्गीथाक्षराणि विद्वान्सन् उपास्ते उद्गीथ इति ॥

अथ खल्वाशी'समृद्धिरुपसरणानीत्युपासीत येन साम्ना स्तोष्यन्स्यात्तत्सामोपधावेत् ॥ ८ ॥

अथ खलु इदानीम्, आशी समृद्धि आशिष कामस्य समृद्धि यथा भवेत् तदुच्यत इति वाक्यशेष, उपसरणानि उपसर्तव्यान्युपगन्तव्यानि ध्येयानीत्यर्थ, कथम्[१] इत्युपासीत एवमुपासीत, तद्यथा— येन साम्ना येन सामविशेषेण स्तोष्यन् स्तुतिं करिष्यन् स्यात् भवेदुद्गाता तत्साम उपधावेत् उपसरेत् चिन्तयेदुत्पत्त्यादिभि ॥

यस्यामृचि तामृच यदार्षेय तमृषि या देवतामभिष्टोष्यन्स्यात्ता देवतामुप धावेत् ॥ ९ ॥

यस्यामृचि तत्साम ता च ऋचम् उपधावेत् देवतादिभि, यदार्षेय साम त च ऋषिम्, या देवतामभिष्टोष्यन्स्यात् ता देवतामुपधावेत् ॥

येन च्छन्दसा स्तोष्यन्स्यात्तच्छन्द उपधावेद्येन स्तोमेन स्तोष्यमाण स्यात्त[२] स्तोममुपधावेत् ॥ १० ॥

येन च्छन्दसा गायत्र्यादिना स्तोष्यन्स्यात् तच्छन्द उपधावेत्, येन स्तोमेन स्तोष्यमाण स्यात्, स्तोमाङ्गफलस्य कर्तृगामित्वादात्मनेपद स्तोष्यमाण इति, त स्तोममुपधावेत् ॥

या दिशमभिष्टोष्यन्स्यात्तां दिशमुप-
धावेत् ॥ ११ ॥

या दिशमभिष्टोष्यन्स्यात् तां दिशमुपधावेत् अधिष्ठात्रा-
दिभि ॥

आत्मानमन्तत उपसृत्य स्तुवीत काम
ध्यायन्नप्रमत्तोऽभ्याशो ह यदस्मै स का
म. समृध्येत यत्कामः स्तुवीतेति यत्का
म स्तुवीतेति ॥ १२ ॥

इति तृतीयः खण्ड ॥

आत्मानम् उद्गाता स्व रूप गोत्रनामादिभि — सामादीन्
क्रमेण स्व च आत्मानम्— अन्तत अन्ते उपसृत्य स्तुवीत,
काम ध्यायन् अप्रमत्त स्वरोष्मव्यञ्जनादिभ्य प्रमादमकुर्वन्।
तत अभ्याश क्षिप्रमेव ह यत् यत्र अस्मै एवविदे स काम
समृध्येत समृद्धिं गच्छेत्। कोऽसौ? यत्काम य काम
अस्य सोऽय यत्काम सन् स्तुवीतेति। द्विरुक्तिरादरार्था ॥

इति तृतीयखण्डभाष्यम् ॥



चतुर्थ खण्ड ॥

—*—

ओमित्येतदक्षरमुद्गीथमुपासीतोमिति ह्युद्गायति तस्योपव्याख्यानम् ॥ १ ॥

ओमित्येतत् इत्यादिप्रकृतस्याक्षरस्य पुनरुपादानम् उद्गीथाक्षराद्युपासनान्तरितत्वादन्यत्र प्रसङ्गो मा भूदित्येवमर्थम्, प्रकृतस्यैवाक्षरस्यामृताभयगुणविशेषस्योपासन विधातव्यमित्यारम्भ । ओमित्यादि व्याख्यातम् ॥

देवा वै मृत्योर्बिभ्यतस्त्रयीं विद्या प्राविशꣳस्ते छन्दोभिरच्छादयन्यदेभिरच्छादयꣳस्तच्छन्दसा छन्दस्त्वम् ॥ २ ॥

देवा वै मृत्यो मारकात् बिभ्यत किं कृतवन्त इति, उच्यत— त्रयीं विद्या त्रयीविहित कर्म प्राविशन् प्रविष्टवन्त, वैदिक कर्म प्रारब्धवन्त इत्यथ, तत् मृत्योस्त्राण मन्यमाना । किंच, ते कर्मण्यविनियुक्तै छन्दोभि मन्त्रै जपहोमादि कुर्वन्त आत्मान कमान्तरेष्वच्छादयन् छादितवन्त ।

यत् यस्मात् एभि मन्त्रै अच्छादयन्, तत् तस्मात् छन्दसा मन्त्राणा छादनात् छन्दस्त्व प्रसिद्धमेव ॥

तानु तत्र मृत्युर्यथा मत्स्यमुदके परिपश्येदेव पर्यपश्यदृचि साम्नि यजुषि । ते नु विदित्वोर्ध्वा ऋच. साम्नो यजुष. स्वरमेव प्राविशन् ॥ ३ ॥

तान् तत्र देवान्कर्मपरान् मृत्यु यथा लोके मत्स्यघातको मत्स्यमुदके नातिगम्भीरे परिपश्येत् बडिशोदकस्रावोपायसाध्य मन्यमान, एव पर्यपश्यत् दृष्टवान्, मृत्यु कर्मक्षयोपायेन साध्या देवान्मेने इत्यर्थ । कासौ देवान्ददर्शेति, उच्यते— ऋचि साम्नि यजुषि, ऋग्यजु सामसबन्धिकर्मणीत्यर्थ । ते नु देवा वैदिकेन कर्मणा सस्कृता शुद्धात्मान सन्त मृत्योश्चिकीर्षित विदितवन्त, विदित्वा च ते ऊर्ध्वा व्यावृत्ता कर्मभ्य ऋच साम्न यजुष ऋग्यजु सामसबद्धात्कर्मण अभ्युत्थायेत्यर्थ । तेन कर्मणा मृत्युभयापगम प्रति निराशा तदपाख अमृताभयगुणमक्षर स्वर स्वरशब्दित प्राविशन्नेव प्रविष्टवन्त, ओंकारोपासनपरा सवृत्ता, एव-शब्द अवधारणार्थ सन् समुच्चयप्रतिषेधार्थ, तदुपासनपरा सवृत्ता इत्यर्थ ॥

कथ पुन स्वरशब्दवाच्यत्वमक्षरस्येति, उच्यते—

यदा वा ऋचमाप्नोत्योमित्येवातिस्वर-त्येव ह सामैव यजुरेष उ स्वरो यदेतदक्ष-रमेतदमृतमभय तत्प्रविश्य देवा अमृता अभया अभवन् ॥ ४ ॥

यदा वै ऋचम् आप्नोति ओमित्येवातिस्वरति एव साम एव यजु , एष उ स्वर , कोऽसौ ? यदेतदक्षरम् एतदमृ-तम् अभयम्, तत्प्रविश्य यथागुणमेव अमृता अभयाश्च अभवन् देवा ॥


स य एतदेव विद्वानक्षर प्रणौत्येतदे-वाक्षर ह स्वरममृतमभय प्रविशति तत्प्र-विश्य यदमृता देवास्तदमृतो भवति ॥

इति चतुर्थ खण्ड ॥

स य अन्योऽपि देववदेव एतदक्षरम् एवम् अमृता-भयगुण विद्वान् प्रणौति स्तौति, उपासनमेवात्र स्तुति-रभिप्रेता, स तथैव एतदेवाक्षर स्वरममृतमभय प्रविशति, तत्प्रविश्य च—राजकुल प्रविष्टानामिव राज्ञोऽन्तरङ्गबहिरङ्ग-

तावत् न परस्य ब्रह्मणोऽन्तरङ्गबहिरङ्गताविशेष —किं तर्हि ? यदमृता देवा येनामृतत्वेन यदमृता अभूवन्, तेनैवामृतत्वेन विशिष्ट तदमृतो भवति, न न्यूनता नाप्यधिकता अमृतत्वे इत्यर्थ ॥

इति चतुर्थखण्डभाष्यम् ॥



पञ्चम खण्ड ॥

—※—

प्राणादित्यदृष्टिविशिष्टस्योद्गीथस्योपासनमुक्तमेवानूद्य प्रण वोद्गीथयोरेकत्व कृत्वा तस्मिन्प्राणरश्मिभेदगुणविशिष्टदृष्ट्या अक्षरस्योपासनमनेकपुत्रफलमिदानीं वक्तव्यमित्यारभ्यते—

अथ खलु य उद्गीथ स प्रणवो य प्रणव स उद्गीथ इत्यसौ वा आदित्य उद्गी थ एष प्रणव ओमिति ह्येष स्वरन्नेति ॥

अथ खलु य उद्गीथ स प्रणव बह्वृचानाम्, यश्च प्रणव तेषा स एव च्छान्दोग्ये उद्गीथशब्दवाच्य । असौ वा आदित्य उद्गीथ एष प्रणव, प्रणवशब्दवाच्योऽपि स एव बह्वृचानाम्, नान्य । उद्गीथ आदित्य कथम्? उद्गी थाख्यमक्षरम् ओमिति एतत् एष हि यस्मात् स्वरन् उचा रयन्, अनेकार्थत्वाद्धातूनाम्, अथवा स्वरन् गच्छन् एति । अत असावुद्गीथ सविता ॥

एतमु एवाहमभ्यगासिष तस्मान्मम

त्वमेकोऽसीति ह कौषीतकिं पुत्रमुवाच रश्मीꣳस्त्व पर्यावर्तयाद्बह्वो वै ते भविष्यन्तीत्यधिदैवतम् ॥ २ ॥

तम् एतम् उ एव अहम् अभ्यगासिषम् आभिमुख्येन गीतवानस्मि, आदित्यरश्म्यभेद कृत्वा ध्यान कृतवानस्मीत्यथ । तेन तस्मात्कारणात् मम त्वमेकोऽसि पुत्र इति ह कौषीतकि कुषीतकस्यापत्य कौषीतकि पुत्रमुवाच उक्तवान् । अत रश्मीनादित्य च भेदेन त्व पर्यावर्तयात् पर्यावर्तये त्यर्थ, त्वयोगात् । एव बह्वो वै ते तव पुत्रा भविष्यन्ती त्यधिदैवतम् ॥

अथाध्यात्म य एवाय मुख्यः प्राणस्तमुद्गीथमुपासीतोमिति ह्येष स्वरन्नेति ॥

अथ अनन्तरम् अध्यात्मम् उच्यत । य एवाय मुख्य प्राणस्तमुद्गीथमुपासीतेत्यादि पूर्ववत् । तथा ओमिति ह्येष प्राणोऽपि स्वरन्नेति ओमिति ह्यनुज्ञा कुर्वन्निव वागादिप्रवृत्त्यर्थमेतीत्यर्थ । न हि मरणकाले मुमूर्षो समीपस्था प्राणस्योंकरण शृण्वन्तीति । एतत्सामान्यादादित्येऽप्योकरणम नुज्ञामात्र द्रष्टव्यम् ॥

एतमु एवाहमभ्यगासिष तस्मान्मम त्वमेकोऽसीति ह कौषीतकि पुत्रमुवाच प्राणाꣳस्त्व भूमानमभिगायताद्बहवो वै मे भविष्यन्तीति ॥ ४ ॥

एतमु एवाहमभ्यगासिषमित्यादि पूववदेव । अतो वागादीन्मुख्य च प्राण भेदगुणविशिष्टमुद्गीथ पश्यन् भूमान मनसा अभिगायतात्, पूर्ववदावर्तयेत्यर्थ , बहवो वै मे मम पुत्रा भविष्य-तीत्येवमभिप्राय सन्नित्यर्थ । प्राणादित्यैकत्वोद्गीथ दृष्टे एकपुत्रत्वफलदोषणापादितत्वात् रश्मिप्राणभेददृष्टे कर्तव्यता चोद्यते अस्मि खण्ड बहुपुत्रफलत्वार्थम् ॥


अथ खलु य उद्गीथ स प्रणवो य. प्रणव स उद्गीथ इति होतृषदनाद्वैवापि दुरुद्गीतमनुसमाहरतीत्यनुसमाहरतीति ॥

इति पञ्चम' खण्ड ॥

अथ खलु य उद्गीथ इत्यादि प्रणवोद्गीथैकत्वदर्शनमुक्तम्, तस्यैतत्फलमुच्यते— होतृषदनात् होता यत्रस्थ शसति तत्स्थान होतृषदनम्, हौत्रात्कर्मण सम्यक्प्रयुक्तादित्यर्थ ।

न हि देशमात्रात्फलमाहर्तुं शक्यम् । किं तत्? ह एवापि दुरुद्गीत दुष्टमुद्गीतम् उद्गान कृतम् उद्गात्रा स्वकर्मणि क्षत कृतमित्यर्थ , तदनुसमाहरति अनुसधत्त इत्यर्थ —चिकित्स येव धातुवैषम्यसमीकरणमिति ॥

इति पञ्चमखण्डभाष्यम् ॥



षष्ठ खण्ड ॥

अथेदानी सर्वफलसपत्त्यर्थम् उद्गीथस्य उपासनान्तर विधित्स्यते—

इयमेवर्गग्निः साम तदेतदेतस्यामृच्य-ध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयत इयमेव साग्निरमस्तत्साम ॥ १ ॥

इयमेव पृथिवी ऋक्, ऋचि पृथिवीदृष्टि कार्या। तथा अग्नि साम, साग्नि अग्निदृष्टि। कथ पृथिव्यग्न्यो ऋक्सामत्वमिति, उच्यते— तदेतत् अग्न्याख्य साम एतस्या पृथिव्याम् ऋचि अध्यूढम् अधिगतम् उपरिभावेन स्थित मित्यथ, ऋचीव साम, तस्मात् अत एव कारणात् ऋच्यध्यूढमेव साम गीयते इदानीमपि सामगै। यथा च ऋक्सामनी नात्यन्त भिन्ने अन्योन्यम्, तथैतौ पृथिव्यग्नी, कथम्? इयमेव पृथिवी सा सामनामार्धशब्दवाच्या, इतरार्धशब्दवाच्य अग्नि अम, तत् एतत्पृथिव्यग्निद्वय सामैकशब्दाभिधेयत्वमापन्न साम, तस्मान्नान्योन्य भिन्न पृथिव्यग्निद्वय नित्यसश्लिष्टमृक्सामनी इव। तस्माच्च पृथिव्यग्न्योर्ऋक्सामत्वमित्यर्थ। सामाक्षरयो पृथिव्यग्निदृष्टिविधानार्थमियमेव सा अग्निरम इति केचित् ॥

अन्तरिक्षमेवर्ग्वायु. साम तदेतदेत-स्यामृच्यध्यूढ५ साम तस्मादृच्यध्यूढ५ साम गीयतेऽन्तरिक्षमेव सा वायु-रमस्तत्साम ॥ २ ॥

अन्तरिक्षमेव ऋक् वायु साम इत्यादि पूर्ववत् ॥

द्यौरेवर्गादित्य साम तदेतदेतस्यामृ-च्यध्यूढ५ साम तस्मादृच्यध्यूढ५ साम गीयते द्यौरेव सादित्योऽमस्तत्साम ॥ ३ ॥

नक्षत्राण्येवर्क्चन्द्रमा साम तदेतदेत स्यामृच्यध्यूढ५ साम तस्मादृच्यध्यूढ५ साम गीयते नक्षत्राण्येव सा चन्द्रमा अमस्तत्साम ॥ ४ ॥

नक्षत्राणामधिपतिश्चन्द्रमा अत स साम ॥

अथ यदेतदादित्यस्य शुक्ल भा' सैव र्गथ यन्नील पर कृष्ण तत्साम तदेतदे-तस्यामृच्यध्यूढ५ साम तस्मादृच्यध्यूढ५ साम गीयते ॥ ५ ॥

अथ यदेतदादित्यस्य शुक्ल भा शुक्ला दीप्ति सैव ऋक् । अथ यदादित्ये नील पर कृष्ण परोऽतिशयेन कार्ष्ण्य तत्साम । तद्धेकान्तसमाहितदृष्टेर्दृश्यते ॥

अथ यदेवैतदादित्यस्य शुक्ल भा सैव साथ यन्नील पर कृष्ण तदमस्तत्सामाथ य एषोऽन्तरादित्ये हिरण्मय पुरुषो दृ श्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखा त्सर्व एव सुवर्ण ॥ ६ ॥

ते एवैते भासौ शुक्लकृष्णत्वे सा च अमश्च साम । अथ य एष अन्तरादित्ये आदित्यस्यान्त मध्ये हिरण्मय हिरण्मय इव हिरण्मय । न हि सुवर्णविकारत्व देवस्य सभवति, ऋक्सामगेष्णत्वापहतपाप्मत्वासभवात्, न हि सौवर्णेऽचेतने पाप्मादिप्राप्तिरस्ति, येन प्रतिषिध्येत, चाक्षुषे च अग्रहणात्, अत लुप्तोपम एव हिरण्मयशब्द, ज्योतिर्मय इत्यथ । उत्तरेष्वपि समाना योजना । पुरुष पुरि शयनात् पूरयति वा स्वेन आत्मना जगदिति, दृश्यते निवृत्तचक्षुर्भि समाहितचेतोभिब्रह्मचर्यादिसाधनापेक्षै । तेजस्विनोऽपि श्म श्रुकेशादय कृष्णा स्युरित्यतो विशिनष्टि— हिरण्यश्मश्रुर्हि-

रण्यकेश इति, ज्योतिर्मयान्येवास्य श्मश्रूणि केशाश्चेत्यर्थ । आप्रणखात् प्रणख नखाग्र नखाग्रेण सह सर्व सुवर्ण इव भारूप इत्यर्थ ॥

तस्य यथा कप्यास पुण्डरीकमेवमक्षि-णी तस्योदिति नाम स एष सर्वेभ्य पा-प्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्म भ्यो य एव वेद ॥ ७ ॥

तस्य एव सवत सुवर्णवणस्याप्यक्ष्णोर्विशष । कथम्? तस्य यथा कपे मर्कटस्य आस कप्यास, आसेरुपवेशनार्थस्य करण घञ्, कपिपृष्ठान्त येनोपविशति, कप्यास इव पुण्डरीकम् अत्यन्ततेजस्वि एवम् दवस्य अक्षिणी, उपमितोपमानत्वात् न हीनोपमा । तस्य एवगुणविशिष्टस्य गौणमिद नाम उदिति, कथ गौणत्वम्? स एष देव सर्वेभ्य पाप्मभ्य पाप्मना सह तत्कार्येभ्य इत्यर्थ, 'य आत्मापहतपाप्मा' इत्यादि वक्ष्यति, उदित उत् इत, उद्गत इत्यथ । अत असौ उन्नामा । तम् एवगुणसपन्नमुन्नामान यथोक्तन प्रकारेण यो वेद सोऽप्येवमेव उदेति उद्गच्छति सर्वेभ्य पाप्मभ्य — ह वै इत्यवधारणार्थौ निपातौ— उदेत्येवेत्यर्थ ॥

तस्यर्क्च साम च गेष्णौ तस्मादुद्गीथ-

तस्मात्त्वेवोद्गातैतस्य हि गाता स एष ये चामुष्मात्पराञ्चो लोकास्तेषा चेष्टे देव-कामाना चेत्यधिदैवतम् ॥ ८ ॥

इति षष्ठ खण्ड ॥

तस्योद्गीथत्व देवस्य आदित्यादीनामिव विवक्षित्वा आह— तस्य ऋक्च साम च गेष्णौ पृथिव्याद्युक्तलक्षणे पर्वणी । सर्वात्मा हि देव । परापरलोककामेशितृत्वादुपपद्यते पृथिव्यग्न्याद्यृक्सामगेष्णत्वम्, सर्वयोनित्वाच्च । यत एवमुन्नामा च असौ ऋक्सामगेष्णश्च तस्मादृक्सामगेष्णत्वे प्राप्ते उद्गीथत्वमुच्यते परोक्षेण, परोक्षप्रियत्वादेवस्य, तस्मादुद्गीथ इति । तस्मात्त्वेव हेतो उद गायतीत्युद्गाता । यस्माद्धि एतस्य यथोक्तस्योन्नाम्न गाता असौ अतो युक्ता उद्गातेति नामप्रसिद्धि उद्गातु । स एष दव उन्नामा ये च अमुष्मात् आदित्यात् पराञ्च परागञ्चनात् ऊर्ध्वा लोका तेषा लोकाना च ईष्टे न केवलमीशितृत्वमेव, च शब्दाद्धारयति च, 'स दाधार पृथिवीं द्यामुतेमाम्' इत्यादिमन्त्रवर्णात् । किंच, देवकामानामीष्टे इति एतत् अधिदैवत देवताविषय देवस्योद्गीथस्य स्वरूपमुक्तम् ॥

इति षष्ठखण्डभाष्यम् ॥

सप्तमः खण्डः ॥

अथाध्यात्म वागेवर्क्प्राणः साम तदे-तदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्य-ध्यूढꣳ साम गीयते । वागेव सा प्राणो ऽमस्तत्साम ॥ १ ॥

अथ अधुना अध्यात्ममुच्यते—वागेव ऋक् प्राण साम, अधरोपरिस्थानत्वसामान्यात् । प्राणो घ्राणमुच्यते सह वायुना । वागेव सा प्राणोऽम इत्यादि पूर्ववत् ॥

चक्षुरेवर्गात्मा साम तदेतदेतस्यामृ-च्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते । चक्षुरेव सात्मामस्तत्साम ॥ २ ॥

चक्षुरेव ऋक् आत्मा साम । आत्मेति च्छायात्मा, तत्स्थत्वात्साम ॥

श्रोत्रमेवर्ङ्मन साम तदेतदेतस्यामृ-च्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते । श्रोत्रमेव सा मनोऽमस्तत्साम ॥

श्रोत्रमेव ऋक् मन साम, श्रोत्रस्याधिष्ठातृत्वान्मनस सामत्वम् ॥

अथ यदेतदक्ष्णः शुक्ल भा' सैवर्गथ यन्नील परः कृष्ण तत्साम तदेतदेतस्या-मृच्यध्यूढ५ साम तस्मादृच्यध्यूढ५ साम गीयते । अथ यदेवैतदक्ष्ण' शुक्ल भाः सैव साथ यन्नील पर कृष्ण तदमस्त-त्साम ॥ ४ ॥

अथ यदेतदक्ष्ण शुक्ल भा सैव ऋक् । अथ यन्नील पर कृष्णमादित्य इव दृक्शक्त्यधिष्ठान तत्साम ॥

अथ य एषोऽन्तरक्षिणि पुरुषो दृश्य ते सैवर्क्तत्साम तदुक्थ तद्यजुस्तद्ब्रह्म त स्यैतस्य तदेव रूप यदमुष्य रूप यावमु ष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नाम ॥

अथ य एषोऽ तरक्षिणि पुरुषो दृश्यते, पूर्ववत् । सैव ऋक् अध्यात्म वागाद्या, पृथिव्याद्या च अधिदैवतम्, प्र-सिद्धा च ऋक् पादबद्धाक्षरात्मिका, तथा साम, उक्थ-साहचर्याद्वा स्तोत्र साम ऋक शस्त्रम् उक्थाद्यत् तथा

यजु स्वाहास्वधावषडादि सर्वमेव वाग्यजु तत्स एव। सर्वात्मकत्वात्सर्वयोनित्वाच्चेति ह्यवोचाम। ऋगादिप्रकरणात् तद्ब्रह्मेति त्रयो वेदा। तस्यैतस्य चाक्षुषस्य पुरुषस्य तदेव रूपमतिदिश्यते। किं तत्? यदमुष्य आदित्यपुरुषस्य— हिरण्मय इत्यादि यदधिदैवतमुक्तम्, यावमुष्य गेष्णौ पर्वणी, तावेवास्यापि चाक्षुषस्य गेष्णौ, यच्चामुष्य नाम उदित्यु-द्गीथ इति च तदेवास्य नाम। स्थानभेदात् रूपगुणनामाति देशात् ईशितृत्वविषयभेदव्यपदेशाच्च आदित्यचाक्षुषयोर्भेद इति चेत्, न, 'अमुना' 'अनेनैव' इत्येकस्योभयात्मत्वप्रा प्त्यनुपपत्ते। द्विधाभावेनोपपद्यत इति चेत्— वक्ष्यति हि 'स एकधा भवति त्रिधा भवति' इत्यादि, न, चेतनस्यैकस्य निरवयवत्वाद्विधाभावानुपपत्ते। तस्मादध्यात्माधिदैवतयोरेक त्वमेव। यत्तु रूपाद्यतिदेशो भेदकारणमवोच, न तद्भेदा वगमाय, किं तर्हि, स्थानभेदाद्भेदाशङ्का मा भूदित्येवमर्थम्॥

स एष ये चैतस्मादर्वाञ्चो लोकास्तेषा चेष्टे मनुष्यकामाना चेति तद्य इमे वी णाया गायन्त्येत ते गायन्ति तस्मात्ते धनसनय॰॥ ६॥

स एष चाक्षुष पुरुष ये च एतस्मात् आध्यात्मिका

दात्मन अर्वाञ्च अर्वाग्गता लोका तेषा चेष्टे मनुष्य सबन्धिना च कामानाम्। तत् तस्मात् य इमे वीणाया गायन्ति गायका त एतमेव गायन्ति । यस्मादीश्वर गायन्ति तस्मात्ते धनसनय धनलाभयुक्ता , धनवन्त इत्यर्थ ॥

अथ य एतदेव विद्वान्साम गायत्युभौ स गायति सोऽमुनैव स एष ये चामुष्मात्पराञ्चो लोकास्ता२श्चाप्नोति देवकामा२श्च ॥ ७ ॥

अथ य एतदेव विद्वान् यथोक्त देवमुद्गीथ विद्वान् साम गायति उभौ स गायति चाक्षुषमादित्य च । तस्यैवविद फलमुच्यते— सोऽमुनैव आदित्येन स एष ये च अमुष्मात्पराञ्च लोका ताश्च आप्नोति, आदित्यान्तर्गतदेवो भूत्व त्यर्थ , देवकामाश्च ॥

अथानेनैव ये चैतस्मादर्वाञ्चो लोकास्ता२श्चाप्नोति मनुष्यकामा२श्च तस्मादु हैवविदुद्गाता ब्रूयात् ॥ ८ ॥

क ते काममागायानीत्येष ह्येव काम-

गानस्येष्टे य एव विद्वान्साम गायति साम गायति ॥ ९ ॥

इति सप्तम खण्ड ॥

अथ अनेनैव चाक्षुषेणैव ये च एतस्मादर्वाञ्चो लोका ताश्च आप्नोति, मनुष्यकामाश्च—चाक्षुषो भूत्वेत्यर्थ । तस्मादु ह एववित् उद्गाता ब्रूयात् यजमानम्— कम् इष्ट ते तव काममागायानीति । एष हि यस्मादुद्गाता कामागानस्य उद्गानेन काम सपादयितुमीष्टे समथ इत्यथ । कोऽसौ ? य एव विद्वान् साम गायति । द्विरुक्तिरुपासनसमाप्त्यर्था ॥

इति सप्तमखण्डभाष्यम् ॥



अष्टम. खण्ड ॥

त्रयो होद्गीथे कुशला बभूवुः शिलकः शालावत्यश्चैकितायनो दाल्भ्यः प्रवाहणो जैवलिरिति ते होचुरुद्गीथे वै कुशला स्मो हन्तोद्गीथे कथा वदाम इति ॥ १ ॥

अनेकधोपास्यत्वात् अक्षरस्य प्रकारान्तरेण परोवरीय स्त्वगुणफलमुपासनान्तरमानिनाय । इतिहासस्तु सुखावबोधनार्थं । त्रय त्रिसंख्याका, ह इत्यैतिह्यार्थं, उद्गीथे उद्गीथज्ञान प्रति, कुशला निपुणा बभूवु, कस्मिंश्चिद्देशे काले च निमित्ते वा समेतानामित्यभिप्राय । न हि सर्वस्मिञ्जगति त्रयाणामेव कौशलमुद्गीथादिविज्ञाने । श्रूयंते हि उषस्तिजानश्रुतिकैकेयप्रभृतय सर्वज्ञकल्पा । के ते त्रय इति, आह—शिलक नामत, शलावताऽपत्य शालावत्य, चिकितायनस्यापत्य चैकितायन, दल्भगोत्रो दाल्भ्य, अमुष्यायणो वा, प्रवाहणो नामत, जीवलस्यापत्य जैवलि इत्येते त्रय —ते होचु अन्योन्यम्—उद्गीथे वै कुशला निपुणा इति प्रसिद्धा स्म । अतो हन्त यद्यनुमतिर्भवताम् उद्गीथे उद्गीथज्ञाननिमित्ता कथा विचारणा पक्षप्रतिपक्षोपन्यासेन

वदाम वाद कुर्म इत्यर्थ । तथा च तद्विद्यसवादे विपरीत ग्रहणनाशोऽपूर्वविज्ञानोपजन सशयनिवृत्तिश्चेति । अत त-द्विद्यसयोग कर्तव्य इति च इतिहासप्रयोजनम् । दृश्यते हि शिलकादीनाम् ॥

तथेति ह समुपविविशु स ह प्रवा हणो जैवलिरुवाच भगवन्तावग्रे वदता ब्राह्मणयोर्वदतोर्वाच५ श्रोष्यामीति ॥ २ ॥

तथेत्युक्त्वा ते समुपविविशु ह उपविष्टवन्त किल । तत्र राज्ञ प्रागल्भ्योपपत्ते स ह प्रवाहणो जैवलिरुवाच इत रौ— भगवन्तौ पूजावन्तौ अग्रे पूर्व वदताम्, ब्राह्मणयोरिति लिङ्गाद्राजा असौ, युवयोर्ब्राह्मणयो वदतो वाच श्रोष्यामि, अर्थरहितामित्यपरे, वाचमिति विशेषणात् ॥

स ह शिलक शालावत्यश्चैकितायन दाल्भ्यमुवाच हन्त त्वा पृच्छानीति पृ-च्छेति होवाच ॥ ३ ॥

उक्तयो स ह शिलक शालावत्य चैकितायन दाल्भ्य मुवाच— हन्त यद्यनुमन्यसे त्वा त्वा पृच्छानि इत्युक्त इतर पृच्छेति होवाच ॥

का साम्नो गतिरिति स्वर इति होवाच स्वरस्य का गतिरिति प्राण इति होवाच प्राणस्य का गतिरित्यन्नमिति होवाचान्नस्य का गतिरित्याप इति होवाच ॥ ४ ॥

लब्धानुमतिराह— का साम्न — प्रकृतत्वादुद्गीथस्य, उद्गीथो हि अत्र उपास्यत्वेन प्रकृत, 'परोवरीयासमुद्गीथम्' इति च वक्ष्यति— गति आश्रय, परायणमित्येतत् । एव पृष्टो दाल्भ्य उवाच— स्वर इति, स्वरात्मकत्वात्साम्न । यो यदात्मक स तद्गतिस्तदाश्रयश्च भवतीति युक्तम्, मृदाश्रय इव घटादि । स्वरस्य का गतिरिति, प्राण इति होवाच, प्राणनिष्पाद्यो हि स्वर, तस्मात्स्वरस्य प्राणो गति । प्राणस्य का गतिरिति, अन्नमिति होवाच, अन्नावष्टम्भो हि प्राण, 'शुष्यति वै प्राण ऋतेऽन्नात्' इति श्रुते, 'अन्नदाम' इति च । अन्नस्य का गतिरिति, आप इति होवाच, अप्सभवत्वादन्नस्य ॥

अपा का गतिरित्यसौ लोक इति होवाचामुष्य लोकस्य का गतिरिति न स्वर्ग लोकमति नयेदिति होवाच स्वर्ग वय लो-

कꣳसामाभिसस्थापयाम स्वर्गसꣳस्तावꣳ हि सामेति ॥ ५ ॥

अपा का गतिरिति, असौ लोक इति होवाच, अमुष्माद्धि लोकाद्दृष्टि सभवति। अमुष्य लोकस्य का गतिरिति पृष्ट दाल्भ्य उवाच— स्वर्गममु लोकमतीत्य आश्रयान्तर साम न नयत्कश्चित् इति होवाच आह। अतो वयमपि स्वर्गं लोक साम अभिसस्थापयाम, स्वर्गलोकप्रतिष्ठ साम जानीम इत्यर्थ। स्वर्गसस्ताव स्वर्गत्वेन सस्तवन सस्तावो यस्य तत्साम स्वर्गसस्तावम्, हि यस्मात् स्वर्गो वै लोक साम वेद इति श्रुति ॥

तꣳह शिलकः शालावत्यश्चैकितायन दाल्भ्यमुवाचाप्रतिष्ठित वै किल ते दाल्भ्य साम यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतिष्यतीति मूर्धा ते विपनेदिति ॥ ६ ॥

तम् इतर शिलक शालावत्य चैकितायन दाल्भ्यमुवाच — अप्रतिष्ठितम् असस्थितम्, परोवरीयस्त्वेनासमाप्तगति सामेत्यर्थ, वै इत्यागम स्मारयति किलेति च, दाल्भ्य ते तव साम। यस्तु असहिष्णु सामवित् एतर्हि एतस्मिन्काल ब्रूयात् कश्चिद्विपरीतविज्ञानम्— अप्रतिष्ठित साम प्रतिष्ठित

मिति– एववादापराधिनो मूर्धा शिर ते विपतिष्यति वि स्पष्ट पतिष्यतीति । एवमुक्त्वापराधिन तथैव तद्विपतेत् न सशय , न त्वह ब्रवीमीत्यभिप्राय । ननु मूर्धपातार्हं चेद-पराध कृतवान् , अत परेणानुक्तस्यापि पतेन्मूर्धा, न चेदप-राधी उक्तस्यापि नैव पतति, अन्यथा अकृताभ्यागम कृत-नाशश्च स्याताम् । नैष दोष , कृतस्य कर्मण शुभाशुभस्य फलप्राप्तेर्देशकालनिमित्तापेक्षत्वात् । तत्रैव सति मूर्धपातनि मित्तस्याप्यज्ञानस्य पराभिव्याहारनिमित्तापेक्षत्वमिति ॥

हन्ताहमेतद्भगवत्तो वेदानीनि विद्धी ति होवाचामुष्य लोकस्य का गतिरि त्यय लोक इति होवाचास्य लोकस्य का गतिरिति न प्रतिष्ठा लोकमति नयेदिति होवाच प्रतिष्ठा वय लोक꣡ सामाभिस ꣡स्थापयामः प्रतिष्ठास꣡स्ताव꣡ हि सा मेति ॥ ७ ॥

एवमुक्तो दाल्भ्य आह—हन्ताहमेतद्भगवत्त भगवत वे-दानि यत्प्रतिष्ठ साम इत्युक्त प्रत्युवाच शालावत्य – विद्धीति होवाच । अमुष्य लोकस्य का गतिरिति पृष्ट दाल्भ्येन

शालावत्य अय लोक इति होवाच, अय हि लोको याग दानहोमादिभिरमु लोक पुष्यतीति, 'अत प्रदान देवा उपजीवन्ति' इति हि श्रुतय, प्रत्यक्ष हि सर्वभूताना धरणी प्रतिष्ठेति, अत साम्नोऽप्यय लाक प्रतिष्ठैवेति युक्तम्। अस्य लोकस्य का गतिरित्युक्त आह शालावत्य — न प्रतिष्ठाम् इम लोकमतीत्य नयेत् साम कश्चित्। अतो वय प्रतिष्ठा लोक साम अभिसस्थापयाम, यस्मात्प्रतिष्ठा सस्ताव हि, प्रतिष्ठात्वेन सस्तुत सामेत्यर्थ, 'इय वै रथ तरम्' इति च श्रुति ॥

त ह प्रवाहणो जैवलिरुवाचान्तवद्वै किल ते शालावत्य साम यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतिष्यतीति मूर्धा ते विपतेदिति हन्ताहमेतद्भगवत्तो वेदानीति विद्धीति होवाच ॥ ८ ॥

इति अष्टम' खण्ड ॥

तमेवमुक्तवन्त ह प्रवाहणो जैवलिरुवाच अन्तवद्वै किल ते शालावत्य सामेत्यादि पूर्ववत्। तत शालावत्य आह— हन्ताहमेतद्भगवत्तो वेदानीति, विद्धीति होवाच इतर ॥

इति अष्टमखण्डभाष्यम् ॥

नवम खण्ड ॥

अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाश प्रत्यस्तमयन्त्याकाशो ह्येवैभ्यो ज्यायानाकाश' परायणम् ॥ १ ॥

अनुज्ञात आह— अस्य लोकस्य का गतिरिति, आकाश इति होवाच प्रवाहण , आकाश इति च पर आत्मा, 'आकाशो वै नाम' इति श्रुते तस्य हि कम सवभूतोत्पादकत्वम्, तस्मिन्नेव हि भूतप्रलय – 'तत्तेजोऽसृजत' 'तेज परस्या दवतायाम्' इति हि वक्ष्यति, सवाणि ह वै इमानि भूतानि स्थावरजङ्गमानि आकाशादेव समुत्पद्यन्ते तेजोबन्नादिक्रमेण, सामर्थ्यात्, आकाश प्रति अस्त यन्ति प्रलयकाले तेनैव विपरीतक्रमेण, हि यस्मादाकाश एवैभ्य सर्वेभ्यो भूतेभ्य ज्यायान् महत्तर , अत स सर्वेषा भूताना परमयन परायण प्रतिष्ठा त्रिष्वपि कालेष्वित्यर्थ ॥

स एष परोवरीयानुद्गीथ स एषोऽनन्त परोवरीयो ह्यस्य भवति परोवरीयसो ह लोकाञ्जयति य एतदेव विद्वान्परोवरीयाꣳसमुद्गीथमुपास्ते ॥ २ ॥

यस्मात् पर पर वरीय वरीयसाऽप्येष वर परश्च वरीयाश्च परोवरीयान् उद्गीथ परमात्मा सपन्न इत्यर्थ, अत एव स एष अनन्त अविद्यमानान्त । तमत परोवरीयास परमात्मभूतमनन्तम् एव विद्वान परोवरीयासमुद्गीथमुपास्ते । तस्यैतत्फलमाह—परोवरीय पर पर वरीयो विशिष्टतर जीवन ह अस्य विदुषो भवति दृष्ट फलम्, अदृष्ट च परोवरीयस उत्तरोत्तरविशिष्टतरानव ब्रह्माकाशान्तान् लोकान् जयति— य एतदव विद्वानुद्गीथमुपास्ते ॥

तꣳ हैतमतिधन्वा शौनक उदरशाण्डिल्यायोक्त्वोवाच यावत्त एन प्रजायामुद्गीथ वेदिष्यन्ते परोवरीयो हैभ्यस्तावदस्मिँल्लोके जीवन भविष्यति ॥ ३ ॥

किं च तमेतमुद्गीथ विद्वान् अतिधन्वा नामत, शुनक-

स्यापत्य शौनक , उदरशाण्डिल्याय शिष्याय एतम् उद्गीथ दर्शनम् उक्त्वा उवाच— यावत् ते तव प्रजायाम् , प्रजास तताविति अर्थ , एनम् उद्गीथ त्वत्सततिजा वेदिष्यन्ते ज्ञास्य न्ति, तावन्त काल परोवरीयो हैभ्य प्रसिद्धेभ्यो लौकिक जीवनेभ्य उत्तरोत्तरविशिष्टतर जीवन तेभ्यो भविष्यति ॥

तथामुष्मिँल्लोके लोक इति स य एतमेव विद्वानुपास्ते परोवरीय एव ह्यस्या स्मिँल्लोके जीवन भवति तथामुष्मिँल्लोके लोक इति लोके लोक इति ॥ ४ ॥

इति नवम खण्ड ॥

तथा अदृष्टेऽपि परलोके अमुष्मिन परोवरीयाँल्लोको भविष्यतीत्युक्तवान् शाण्डिल्याय अतिधन्वा शौनक । स्यादे-तत्फल पूर्वेषा महाभाग्यानाम् , नैदयुगीनानाम्— इत्याश ङ्कानिवृत्तये आह— स य कश्चित् एतमेव विद्वान् उद्गी थम् एतर्हि उपास्ते, तस्याप्येवमेव परोवरीय एव ह अस्य अस्मिँल्लोकें जीवन भवति तथा अमुष्मिँल्लोके लोक इति ॥

इति नवमखण्डभाष्यम् ॥

दशम खण्ड. ॥

मटचीहतेषु कुरुष्वाटिक्या सह जाय-योषस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राणक उवास ॥ १ ॥

उद्गीथोपासनप्रसङ्गेन प्रस्तावप्रतिहारविषयमप्युपासन वक्तव्यमितीदमारभ्यते, आख्यायिका तु सुखावबोधार्था । मटचीहतेषु मटन्य अशनय ताभिर्हतेषु नाशितेषु कुरुषु कुरुसस्येष्वित्यर्थ । ततो दुर्भिक्षे जाते आटिक्या अनुपजातपयोधरादिस्त्रीव्यञ्जनया सह जायया उषस्तिर्ह नामत, चक्रस्यापत्य चाक्रायण, इभो हस्ती तमर्हतीति इभ्य ईश्वर, हस्त्यारोहो वा, तस्य ग्राम इभ्यग्राम तस्मिन, प्रद्राणक अन्नालाभात, 'द्रा कुत्साया गतौ', कुत्सिता गतिं गत, अन्त्यावस्था प्राप्त इत्यर्थ, उवास उषितवान् कस्यचिद्गृहमाश्रित्य ॥

स हेभ्य कुल्माषान्खादन्त बिभिक्षे त४ होवाच । नेतोऽन्ये विद्यन्ते यच्च ये म इम उपनिहिता इति ॥ २ ॥

स अन्नार्थमटन् इभ्य कुल्माषान् कुत्सितान्माषान् खाद-

न्त भक्षयन्त यदृच्छयोपलभ्य बिभिक्षे याचितवान् । तम् उषस्ति ह उवाच इभ्य — न इत , अस्मान्मया भक्ष्यमा णादुच्छिष्टराशे कुल्माषा अन्ये न विद्यन्ते , यच्च ये राशौ मे मम उपनिहिता प्रक्षिप्ता इमे भाजने, किं करोमि , इत्युक्त प्रत्युवाच उषस्ति —

एतेषा मे देहीति होवाच तानस्मै प्रददौ हन्तानुपानमित्युच्छिष्ट वै मे पीत स्यादिति होवाच ॥ ३ ॥

एतेषाम् एतानित्यर्थ , मे मह्य देहीति ह उवाच , तान् स इभ्य अस्मै उषस्तये प्रददौ प्रदत्तवान् । पानाय समीपस्थमुदक च गृहीत्वा उवाच—ह त गृहाणानुपानम् , इत्युक्त प्रत्युवाच— उच्छिष्ट वै मे मम इदमुदक पीत स्यात् , यदि पास्यामि , इत्युक्तवन्त प्रत्युवाच इतर —

न स्विदेतेऽप्युच्छिष्टा इति न वा अजीविष्यमिमानखादन्निति होवाच कामो म उदपानमिति ॥ ४ ॥

किं न स्विदते कुल्माषा अप्युच्छिष्टा , इत्युक्त आह उषस्ति — न वै अजीविष्य नैव जीविष्यामि इमान् कुल्मा

षान् अखादन् अभक्षयन् इति होवाच । काम इच्छात मे मम उदकपान लभ्यत इत्यर्थ । अतश्चैतामवस्था प्राप्तस्य विद्याधर्मयशोवत स्वात्मपरोपकारसमर्थस्यैतदपि कर्म कुर्वतो न अघस्पर्श इत्यभिप्राय । तस्यापि जीवित प्रति उपाया न्तरेऽजुगुप्सिते सति जुगुप्सितमेतत्कर्म दोषाय, ज्ञानाव लेपन कुर्वतो नरकपात स्यादवेत्यभिप्राय, प्रद्राणकशब्द श्रवणात् ॥

स ह खादित्वातिशेषाञ्जायाया आज-हार साग्र एव सुभिक्षा बभूव तान्प्रति-गृह्य निदधौ ॥ ५ ॥

ताश्च स खादित्वा अतिशषान अतिशिष्टान् जायायै कारुण्यादाजहार, सा आटिकी अग्र एव कुल्माषप्राप्ते सुभिक्षा शोभनभिक्षा, लब्धान्नेत्येतत्, बभूव सवृत्ता, तथापि स्त्रीस्वाभाव्यादनवज्ञाय तान्कुल्माषान पत्युर्हस्तात्प्र तिगृह्य निदधौ निक्षिप्तवती ॥

स ह प्रात सजिहान उवाच यद्वता न्नस्य लभेमहि लभेमहि धनमात्रा२ रा जासौ यक्ष्यते स मा सर्वैरार्त्विज्यैर्वृणी-तेति ॥ ६ ॥

स तस्या कर्म जानन् प्रात उष काले सजिहान शयन निद्रा वा परित्यजन उवाच पत्न्या शृण्वन्त्या —यत् यदि बतेति खिद्यमान अन्नस्य स्तोक लभेमहि, तद्भुक्त्वान्न समर्थो गत्वा लभेमहि धनमात्रा धनस्याल्पम्, तत अस्माक जीवन भविष्यतीति । धनलाभे च कारणमाह— राजामौ नातिदूरे स्थाने यक्ष्यते, यजमानत्वात्तस्य आत्म नेपदम्, स च राजा मा मा पात्रमुपलभ्य सर्वैरार्त्विज्यै ऋत्विक्कर्मभि ऋत्विक्कर्मप्रयोजनायेत्यर्थ वृणीतेति ॥

त जायोवाच हन्त पत इम एव कुल्माषा इति तान्खादित्वामु यज्ञ वितत मेयाय ॥ ७ ॥

एवमुक्तवन्त जायोवाच— हन्त गृहाण हे पते इम एव ये मद्धस्ते विनिक्षिप्तास्त्वया कुल्माषा इति । तान्खादित्वा अमु यज्ञ राज्ञो वितत विस्तारितमृत्विग्भि एयाय ॥

तत्रोद्गातृनास्तावे स्तोष्यमाणानुपोप विवेश स ह प्रस्तोतारमुवाच ॥ ८ ॥

तत्र च गत्वा, उद्गातृन् उद्गातृपुरुषानागत्य, आ स्तुवन्त्यस्मिन्निति आस्ताव तस्मिन्नास्तावे स्तोष्यमाणान् उपोपविवेश

समीपे उपविष्टस्तेषामित्यर्थ । उपविश्य च स ह प्रस्तोतारमुवाच ॥

प्रस्तोतर्यां देवता प्रस्तावमन्वायत्ता ता चेदविद्वान्प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति ॥ ९ ॥

हे प्रस्तोत इत्यामन्त्र्य अभिमुखीकरणाय, या देवता प्रस्ताव प्रस्तावभक्तिम् अनुगता अन्वायत्ता, ता चत् देवता प्रस्तावभक्ते अविद्वान्सन प्रस्तोष्यसि, विदुषो मम समीपे— तत्परोक्षेऽपि चत् विपतेत्तस्य मूर्धा, कर्ममात्रविदामनधिकार एव कर्मणि स्यात्, तच्चानिष्टम्, अविदुषामपि कर्मदर्शनात् दक्षिणमार्गश्रुतेश्च, अनधिकारे च अविदुषामुत्तर एवैको मार्ग श्रूयेत, न च स्मार्तकर्मनिमित्त एव दक्षिण पन्था, 'यज्ञेन दानेन' इत्यादिश्रुते, 'तथोक्तस्य मया' इति च विशेषणाद्विद्वत्समक्षमेव कर्मण्यनधिकार, न सवत्राग्निहोत्रस्मार्तकर्माध्ययनादिषु च, अनुज्ञायास्तत्र तत्र दर्शनात्, कर्ममात्रविदामप्यधिकार सिद्ध कर्मणीति— मूर्धा त विपतिष्यतीति ॥

एवमेवोद्गातारमुवाचोद्गातर्यां देवतोद्गीथमन्वायत्ता ता चेदविद्वानुद्गास्यसि

मूर्धा ते विपतिष्यतीति ॥ १० ॥

एवमेव प्रतिहर्तारमुवाच प्रतिहर्तर्या देवता प्रतिहारमन्वायत्ता ता चेदविद्वान्प्रतिहरिष्यसि मूर्धा ते विपतिष्यतीति ते ह समारतास्तूष्णीमासांचक्रिरे ॥११॥

इति दशम खण्ड ॥

एवमेवोद्गातार प्रतिहर्तारमुवाचेत्यादि समानमन्यत् । ते प्रस्तोत्रादय कर्मण्य समारता उपरता सन्त मूर्धपातभयात् तूष्णीमासाचक्रिर अन्यच्चाकुर्वन्त , अर्थित्वात् ॥

इति दशमखण्डभाष्यम् ॥



एकादश खण्ड ॥

अथ हैन यजमान उवाच भगवन्त वा अह विविदिषाणीत्युषस्तिरस्मि चाक्रायण इति होवाच ॥ १ ॥

अथ अनन्तर ह एनम् उषस्ति यजमान राजा उवाच भगवन्त पूजावन्तम् वै अह विविदिषाणि वेदितुमिच्छामि, इत्युक्त उषस्ति अस्मि चाक्रायण तवापि श्रोत्रपथमागतो यदि— इति ह उवाच उक्तवान ॥

स होवाच भगवन्त वा अहमेभि स वैरार्त्विज्यै पर्यैषिष भगवतो वा अहमवित्त्यान्यानवृषि ॥ २ ॥

स ह यजमान उवाच—सत्यमेवमह भगवन्त बहुगुणम श्रौषम्, सर्वैश्च ऋत्विक्कर्मभि आत्विज्यै पर्यैषिष पर्येषण कृतवानस्मि, अन्विष्य भगवतो वा अहम् अवित्त्या अलाभेन अन्यानिमान् अवृषि वृतवानस्मि ॥

भगवाꣳस्त्वेव मे सर्वैरार्त्विज्यैरिति तथेत्यथ तर्ह्येत एव समतिसृष्टाः स्तुवता

यावत्त्वेभ्यो धन दद्यास्तावन्मम दद्या इति तथेति ह यजमान उवाच ॥ ३ ॥

अद्यापि भगवास्त्वेव मे मम सर्वैरार्त्विज्यै ऋत्विक्कर्मार्थम् अस्तु, इत्युक्त तथेत्याह उषस्ति , किं तु अथैव तर्हि एते एव त्वया पूर्व वृता मया समतिसृष्टा मया सम्यक्प्रसन्नेनानुज्ञाता सन्त स्तुवताम् , त्वया त्वेतत्कार्यम्— यावत्त्वेभ्य प्रस्तोत्रादिभ्य सर्वेभ्यो धन दद्या प्रयच्छसि, तावन्मम दद्या , इत्युक्त तथति ह यजमान उवाच ॥

अथ हैन प्रस्तोतोपससाद प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता ता चेदविद्वान्प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत्कतमा सा देवतेति ॥ ४ ॥

अथ ह एनम् औषस्त्य वच श्रुत्वा प्रस्तोता उपससाद उषस्ति विनयेनोपजगाम । प्रस्तोतर्या देवतेत्यादि मा मा भगवानवोचत्पूर्वम्— कतमा सा देवता या प्रस्तावभक्तिमन्वायत्तेति ॥

प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसविशन्ति

प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रास्तोष्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेति ॥ ५ ॥

पृष्ट प्राण इति ह उवाच, युक्त प्रस्तावस्य प्राणो देव तेति । कथम् ? सर्वाणि स्थावरजङ्गमानि भूतानि प्राणमेव अभिसविशन्ति प्रलयकाले, प्राणमभि लक्षयित्वा प्राणात्मनैवो ज्जिहते प्राणादेवोद्गच्छन्तीत्यथ उत्पत्तिकाले, अत सैषा देवता प्रस्तावमन्वायत्ता, ता चेदविद्वान् त्व प्रास्तोष्य प्रस्तवन प्रस्तावभक्तिं कृतवानसि यदि, मूर्धा शिर ते व्यपतिष्यत् विपतितमभविष्यत् तथोक्तस्य मया तत्काले मूर्धा ते विपतिष्यतीति । अतस्त्वया साधु कृतम, मया निषिद्ध कर्मणा यदुपरममकार्षीरित्यभिप्राय ॥

अथ हैनमुद्गातोपससादोद्गातर्या देवतोद्गीथमन्वायत्ता ता चेदविद्वानुद्गास्यसि मूर्धा ते विपतिष्यतीति सा भगवानवोचत्कतमा सा देवतेति ॥ ६ ॥

तथोद्गाता पप्रच्छ कतमा सा उद्गीथभक्तिमनुगता अन्वायत्ता देवतेति ॥

आदित्य इति होवाच सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चै' सन्त गायन्ति सैषा देवतोद्गीथमन्वायत्ता ता चेदविद्वा नुदगास्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेति ॥ ७ ॥

पृष्ट आदित्य इति होवाच । सर्वाणि ह वा इमानि भूतानि आदित्यम उच्चै ऊर्ध्वं सन्त गायन्ति शब्दयन्ति, स्तुवन्तीत्यभिप्राय , उच्छब्दसामान्यात् , प्रशब्दसामान्यादिव प्राण । अत सैषा देवतेत्यादि पूर्ववत् ॥

अथ हैन प्रतिहर्तोपससाद प्रतिहर्तर्या देवता प्रतिहारमन्वायत्ता ता चेदविद्वा न्प्रतिहरिष्यमि मूर्धा ते विपतिष्यतीति मा भगवानवोचत्कतमा सा देवतेति ॥

एवमेवाथ ह एन प्रतिहता उपससाद कतमा सा देवता प्रतिहारमन्वायत्तेति ॥

अन्नमिति होवाच सर्वाणि ह वा इमा नि भूतान्यन्नमेव प्रतिहरमाणानि जीव

न्ति सैषा देवता प्रतिहारमन्वायत्ता ता चेदविद्वान्प्रत्यहरिष्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेति तथोक्तस्य मयेति ॥

इति एकादश खण्ड ॥

पृष्ट अन्नमिति होवाच । सर्वाणि ह वा इमानि भूतान्यन्नमेव आत्मान प्रति सर्वत प्रतिहरमाणानि जीवन्ति । सैषा देवता प्रतिशब्दसामान्यात्प्रतिहारभक्तिमनुगता । समानमन्यत्तथोक्तस्य मयेति । प्रस्तावोद्गीथप्रतिहारभक्ती प्राणादित्यान्नदृष्टयोपासीतेति समुदायार्थ । प्राणाद्यापत्ति कर्मसमृद्धिर्वा फलमिति ॥

इति एकादशखण्डभाष्यम् ॥



द्वादश खण्ड ॥

अथात शौव उद्गीथस्तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेय स्वाध्यायमुद्गत्राज ॥ १ ॥

अतीते खण्डेऽन्नाप्राप्तिनिमित्ता कष्टावस्थोक्ता उच्छिष्टोच्छिष्टपर्युषितभक्षणलक्षणा, सा मा भूदित्यन्नलाभाय अथ अनन्तर शौव श्वभिर्दृष्ट उद्गीथ उद्गान साम अत प्रस्तूयते। तत् तत्र ह किल बको नामत, दल्भस्यापत्य दाल्भ्य, ग्लावो वा नामत, मित्रायाश्चापत्य मैत्रेय, वा शब्दश्चार्थे, आमुष्यायणो ह्यसौ, वस्तुविषय क्रियास्विव विकल्पानुपपत्ते, द्विनामा द्विगोत्र इत्यादि हि स्मृति, दृश्यते च उभयत पिण्डभाक्त्वम्, उद्गीथे बद्धचित्तत्वात् ऋषावनादराद्वा। वा शब्द स्वाध्यायार्थ। स्वाध्याय कर्तुं ग्रामाद्बहि उद्गत्राज उद्गतवान्विविक्तदेशस्थोदकाभ्याशम्। 'उद्गत्राज' 'प्रतिपालयाचकार' इति च एकवचनालिङ्गात् एकोऽसौ ऋषि। श्वोद्गीथकालप्रतिपालनात् ऋषे स्वाध्यायकरणमन्नकामनयेति लक्ष्यत इत्यभिप्रायत ॥

तस्मै श्वा श्वेत प्रादुर्बभूव तमन्ये

श्वान उपसमेत्योचुरन्न नो भगवानागाय-त्वशनायामवा इति ॥ २ ॥

स्वाध्यायेन तोषिता देवता ऋषिर्वा श्वरूप गृहीत्वा श्वा श्वेत सन् तस्मै ऋषये तदनुग्रहार्थं प्रादुबभूव प्रादुश्चकार। तमन्ये शुक्ल श्वान क्षुल्लका श्वान उपसमेत्य ऊचु उक्तवन्त — अन्न न अस्मभ्य भगवान् आगायतु आगानेन निष्पादयत्वित्यथ । मुख्यप्राणवागादयो वा प्राणमन्वन्नभुज स्वाध्यायपरितोषिता सन्त अनुगृह्णीयुरेन श्वरूपमादायेति युक्तमेव प्रतिपत्तुम्। अशनायाम वै बुभुक्षिता स्मो वै इति ॥

तान्होवाचेहैव मा प्रातरुपसमीयातेति तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेय' प्रतिपालयाचकार ॥ ३ ॥

एवमुक्ते श्वा श्वेत उवाच तान् क्षुल्लकान् शुन, इहैव अस्मिन्नेव देशे मा मा प्रात प्रात काले उपसमीयातेति। दैर्घ्यं छान्दसम्, समीयातेति प्रमादपाठो वा। प्रात कालकरण तत्काल एव कतव्यार्थम्, अन्नदस्य वा सवितुरपरालेऽनाभिमुख्यात्। तत् तत्रैव ह बको दाल्भ्यो ग्लावो वा मैत्रेय ऋषि प्रतिपालयाचकार प्रतीक्षण कृतवानित्यर्थ ॥

ते ह यथैवेद बर्हिष्पवमानेन स्तोष्य माणा सꣳरब्धा सर्पन्तीत्येवमाससृपु स्ते ह समुपविश्य हि चक्रु' ॥ ४ ॥

ते श्वान तत्रैव आगत्य ऋषे समक्ष यथैवेह कर्मणि बर्हिष्पवमानेन स्तोत्रेण स्तोष्यमाणा उद्गातृपुरुषा सरब्धा सल ग्ना अन्योन्यमेव सर्पन्ति, एव मुखेनान्योन्यस्य पुच्छ गृहीत्वा आससृपु आसृप्तवन्त , परिभ्रमण कृतवन्त इत्यर्थ , त एव स-सृप्य समुपविश्य उपविष्टा सन्त हि चक्रु हिंकार कृतवन्त ॥

ओ३मदा३मो३ पिबा३मो३ देवो वरुण प्रजापतिः सविता२न्नमिहा२हरदन्नपते३ ऽन्नमिहा२हरा२हरो३मिति ॥ ५ ॥

ओमदामों पिबामों देव , द्योतनात्, वरुण वर्षणाज्ज गत , प्रजापति , पालनात्प्रजानाम्, सविता प्रसवितृत्वा त्सर्वस्य आदित्य उच्यते । एतै पर्यायै स एवभूत आ दित्य अन्नम् अस्मभ्यम् इह आहरत् आहरत्विति । ते एव हिं कृत्वा पुनरप्यूचु — स त्व हे अन्नपते, स हि सर्वस्या न्नस्य प्रसवितृत्वात्पति , न हि तत्पाकेन विना प्रसूतमन्न-मणुमात्रमपि जायते प्राणिनाम्, अतोऽन्नपति । ह अन्नपते, अन्नमस्मभ्यमिहाहराहरेति, अभ्यास आदरार्थ । ओमिति ॥

इति द्वादशखण्डभाष्यम् ॥

त्रयोदश खण्ड ॥

भक्तिविषयोपासन सामावयवसबद्धमित्यत सामावयवा न्तरस्तोभाक्षरविषयाण्युपासनान्तराणि सहतान्युपदिश्यन्ते ऽनन्तरम्, तेषा सामावयवसबद्धत्वाविशेषात—

अय वाव लोको हाउकारो वायुर्हाइ कारश्चन्द्रमा अथकार । आत्मेहकारो-ऽग्निरीकार ॥ १ ॥

अय वाव अयमेव लोक हाउकार स्तोभो रथतरे साग्नि प्रसिद्ध —'इय वै रथतरम्' इत्यस्मात्सबन्धसामान्यात् हाउकारस्तोभोऽय लोक इत्येवमुपासीत । वायुर्हाइकार, वामदेव्ये सामनि हाइकार प्रसिद्ध, वाग्वप्सबन्धश्च वामदेव्यस्य साम्नो योनि इत्यस्मात्सामान्यात् हाइकार वायुदृष्ट्योपासीत । चन्द्रमा अथकार, चन्द्रदृष्ट्या अथकारमुपासीत, अन्ने हीद स्थितम्, अन्नात्मा चन्द्र, थकाराकारसामान्याच्च । आत्मा इहकार, इहेति स्तोभ, प्रत्यक्षो ह्यात्मा इहेति व्यपदिश्यते, इहेति च स्तोभ, तत्सामान्यात् । अग्निरीकार, ईनिधनानि च आग्नेयानि सर्वाणि सामानीत्यतस्तत्सामान्यात् ॥

आदित्य ऊकारो निहव एकारो विश्वे देवा औहोयिकार प्रजापतिर्हिंकार. प्राण' स्वरोऽन्न या वाग्विराट् ॥ २ ॥

आदित्य ऊकार , उच्चैरूर्ध्व सन्तमादित्य गायन्तीति ऊकारश्चाय स्तोभ , आदित्यदैवत्ये साग्नि स्तोभ इति आदित्य ऊकार । निहव इत्याह्वानम् , एकार स्तोभ , एहीति च आह्वयन्तीति तत्सामान्यात् । विश्वदेवा औहोयिकार , वैश्वदेव्ये साग्नि स्तोभस्य दर्शनात् । प्रजापतिर्हिंकार , आनिरुक्त्यात् , हिंकारस्य च अव्यक्तत्वात् । प्राण स्वर , स्वर इति स्तोभ , प्राणस्य च स्वरहेतुत्वसामान्यात् । अन्न या या इति स्तोभ अन्नम् , अन्नेन हीद यातीत्यतस्तत्सामान्यात् । वागिति स्तोभो विराट् अन्न देवताविशेषो वा, वैराजे साग्नि स्तोभदर्शनात् ॥

अनिरुक्तस्त्रयोदश' स्तोभ' सचरो हुकार ॥ ३ ॥

अनिरुक्त अव्यक्तत्वादिद चेद चेति निर्वक्तु न शक्यत इत्यत सचर विकल्प्यमानस्वरूप इत्यर्थ । कोऽसाविति, आह— त्रयोदश स्तोभ हुकार । अव्यक्तो ह्ययम् , अतोऽनिरुक्तविशेष एवोपास्य इत्यभिप्राय ॥

स्तोभाक्षरोपासनाफलमाह—

दुग्धेऽस्मै वाग्दोह यो वाचो दोहोऽन्नवानन्नादो भवति य एतामेवꣳ साम्नामुपनिषद वेदोपनिषद् वेदेति ॥ ४ ॥

इति त्रयोदश खण्डः ॥

दुग्धेऽस्मै वाग्दोहमित्याद्युक्तार्थम् । य एतामेव यथोक्तलक्षणा साम्ना सामावयवस्तोभाक्षरविषयाम् उपनिषद दर्शन वेद, तस्य एतद्यथोक्त फलमित्यर्थ । द्विरभ्यास अध्यायपरिसमाप्त्यर्थ । सामावयवविषयोपासनाविशेषपरिसमाप्त्यर्थ इति-शब्द इति ॥

इति त्रयोदशखण्डभाष्यम् ॥

इति श्रीमत्परमहसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छकरभगवत कृतौ

छान्दोग्योपनिषद्भाष्ये प्रथमोऽध्याय

समाप्त ॥




छान्दोग्योपनिषद्भाष्यम्
द्वितीयोऽध्याय

॥ द्वितीयोऽध्यायः ॥



'ओमित्येतदक्षरम्' इत्यादिना सामावयवविषयमुपासनमनेकफलमुपदिष्टम्। अनन्तरं च स्तोभाक्षरविषयमुपासनमुक्तम्— सर्वथापि सामैकदेशसबद्धमेव तदिति। अथेदानीं समस्ते साम्नि समस्तसामविषयाण्युपासनानि वक्ष्यामीत्यारभते श्रुति। युक्त हि एकदेशोपासनानन्तरमेकदेशिविषयमुपासनमुच्यत इति॥

समस्तस्य खलु साम्न उपासनꣳ साधु यत्खलु साधु तत्सामेत्याचक्षते यदसाधु तदसामेति॥ १॥

समस्तस्य सर्वावयवविशिष्टस्य पाञ्चभक्तिकस्य साम्नभक्तिकस्य च इत्यर्थ। खल्विति वाक्यालकारार्थ। साम्न उपासन साधु। समस्ते साम्नि साधुदृष्टिविधिपरत्वान्न पूर्वोपासननिन्दार्थत्व साधुशब्दस्य। ननु पूर्वत्राविद्यमान साधुत्व

समस्ते साम्न्यभिधीयते । न, 'साधु सामेत्युपास्ते' इत्युपसहारात् । साधुशब्द शोभनवाची । कथमवगम्यत इति, आह—यत्खलु लोके साधु शोभनमनवद्य प्रसिद्धम्, तत्सामेत्याचक्षते कुशला । यदसाधु विपरीतम्, तदसामेति ॥

तदुताप्याहु. साम्नैनमुपागादिति साधुनैनमुपागादित्येव तदाहुरसाम्नैनमुपागादित्यसाधुनैनमुपागादित्येव तदाहु ॥ २ ॥

तत् तत्रैव साध्वसाधुविवेककरणे उताप्याहु —साम्ना एन राजान सामन्त च उपागात् उपगतवान्, कोऽसौ? यत असाधुत्वप्राप्त्याशङ्का स इत्यभिप्राय, शोभनाभिप्रायेण साधुना एनमुपागात् इत्येव तत् तत्र आहु लौकिका बन्धनाद्यसाधुकार्यमपश्यन्त । यत्र पुनर्विपर्ययेण बन्धनाद्यसाधुकार्यं पश्यन्ति, तत्र असाम्ना एनमुपागादिति असाधुनैनमुपागादित्येव तदाहु ॥

अथोताप्याहु साम नो बतेति यत्साधु भवति साधु बतेत्येव तदाहुरसाम नो बतेति यदसाधु भवत्यसाधु बतेत्येव तदाहुः ॥ ३ ॥

अथोताप्याहु स्वसवेद्य साम न अस्माक बतेति अनुकम्पयन्त सवृत्तमित्याहु , एतत्तैरुक्त भवति, यत्साधु भवति साधु बतेत्येव तदाहु , विपर्यये जाते असाम नो बतेति, यदसाधु भवति असाधु बतेत्येव तदाहु , तस्मात्सामसाधु शब्दयोरेकार्थत्व सिद्धम् ॥

स य एतदेव विद्वान्साधु सामेत्युपास्तेऽभ्याशो ह यदेनꣳ साधवो धर्मा आ च गच्छेयुरुप च नमेयु ॥ ४ ॥

इति प्रथम खण्ड ॥

अत स य कश्चित्साधु सामेति साधुगुणवत्सामेत्युपास्ते समस्त साम साधुगुणवद्विद्वान् , तस्यैतत्फलम् अभ्याशो ह क्षिप्र ह, यत् इति क्रियाविशेषणार्थम् , एनम् उपासक साधव शोभना धर्मा श्रुतिस्मृत्यविरुद्धा आ च गच्छेयु आगच्छेयुश्च , न केवलमागच्छेयु , उप च नमेयु उपनमेयुश्च, भोग्यत्वेनोपतिष्ठयुरित्यर्थ ॥

इति प्रथमखण्डभाष्यम् ॥



द्वितीय खण्ड ॥

लोकेषु पञ्चविध५ सामोपासीत पृथिवी हिंकारः । अग्निः प्रस्तावोऽन्तरिक्षमुद्गीथ आदित्य प्रतिहारो द्यौर्निधनमित्यूर्ध्वेषु ॥ १ ॥

कानि पुनस्तानि साधुदृष्टिविशिष्टानि, समस्तानि सामान्युपास्यानीति, इमानि ता युज्यन्ते— लोकेषु पञ्चविधम् इत्यादीनि । ननु लोकादिदृष्ट्या तान्युपास्यानि साधुदृष्ट्या च इति विरुद्धम्, न, साध्वर्थस्य लोकादिकार्येषु कारणस्यानुगतत्वात्— मृदादिवद्घटादिविकारेषु । साधुशब्दवाच्योऽर्थो धर्मो ब्रह्म वा सवथापि लोकादिकार्येष्वनुगतम् । अत यथा यत्र घटादिदृष्टि मृदादिदृष्टयनुगतैव सा, तथा साधुदृष्टयनुगतैव लोकादिदृष्टि — धर्मादिकार्यत्वाल्लोकादीनाम् । यद्यपि कारणत्वमविशिष्ट ब्रह्मधर्मयो , तथापि धर्म एव साधुशब्दवाच्य इति युक्तम् , साधुकारी साधुर्भवति इति धर्मविषय साधुशब्दप्रयोगात् । ननु लोकादिकार्येषु कारणस्यानुगतत्वादर्थप्राप्तैव तदृष्टिरिति 'साधु सामेत्युपास्ते' इति न वक्तव्यम् ,

न, शास्त्रगम्यत्वात्तदृष्टे , सर्वत्र हि शास्त्रप्रापिता एव धर्मा उपास्या , न विद्यमाना अन्यशास्त्रीया ॥

लोकेषु पृथिव्यादिषु पञ्चविध पञ्चभक्तिभेदेन पञ्चप्र कार साधु समस्त सामोपासीत । कथम् ? पृथिवी हिंकार । लोकेष्विति या सप्तमी, ता प्रथमात्वेन विपरिणमय्य पृथिवी-दृष्ट्या हिंकारे पृथिवी हिंकार इत्युपासीत । व्यत्यस्य वा सप्तमीश्रुतिं लोकविषया हिंकारादिषु पृथिव्यादिदृष्टिं कृत्वो-पासीत । तत्र पृथिवी हिंकार , प्राथम्यसामान्यात् । अग्नि प्रस्ताव । अग्नौ हि कर्माणि प्रस्तूयन्ते । प्रस्तावश्च भक्ति । अन्तरिक्षमुद्गीथ । अन्तरिक्ष हि गगनम् । गकारविशिष्ट-श्चोद्गीथ । आदित्य प्रतिहार , प्रतिप्राण्यभिमुखत्वान्मा प्रति मा प्रतीति । द्यौर्निधनम् । दिवि निधीयन्ते हि इतो गता इत्यूर्ध्वेषूर्ध्वगतेषु लोकदृष्ट्या सामोपासनम् ॥

अथावृत्तेषु द्यौर्हिंकार आदित्य प्रस्ता वोऽन्तरिक्षमुद्गीथोऽग्नि प्रतिहार पृथिवी निधनम् ॥ २ ॥

अथ आवृत्तेषु अवाङ्मुखेषु पञ्चविधमुच्यते सामोपा सनम् । गत्यागतिविशिष्टा हि लोका । यथा ते, तथादृ-

ष्ठयैव सामोपासन विधीयते यत, अत आवृत्तेषु लोकेषु। द्यौर्हिंकार, प्राथम्यात्। आदित्य प्रस्ताव, उदिते ह्यादित्ये प्रस्तूयन्ते कर्माणि प्राणिनाम्। अन्तरिक्षमुद्गीथ पूर्ववत्। अग्नि प्रतिहार, प्राणिभि प्रतिहरणादग्ने। पृथिवी निधनम्, तत आगतानामिह निधनात्॥

कल्पन्ते हास्मै लोका ऊर्ध्वाश्चावृत्ताश्च य एतदेव विद्वाँल्लोकेषु पञ्चविध सामोपास्ते॥ ३॥

इति द्वितीय खण्ड॥

उपासनफल— कल्पन्ते समर्था भवन्ति ह अस्मै लोका ऊर्ध्वाश्च आवृत्ताश्च, गत्यागतिविशिष्टा भोग्यत्वेन व्यवतिष्ठन्त इत्यर्थ। य एतदेव विद्वान लोकेषु पञ्चविध समस्त साधु सामेत्युपास्ते इति सर्वत्र योजना पञ्चविधे सप्तविधे च॥

इति द्वितीयखण्डभाष्यम्॥



तृतीय खण्ड ॥

वृष्टौ पञ्चविधꣳ सामोपासीत पुरोवा तो हिंकारो मेघो जायते स प्रस्तावो वर्ष ति स उद्गीथो विद्योतते स्तनयति स प्र तिहार उद्गृह्णाति तन्निधनम् ॥ १ ॥

वृष्टौ पञ्चविध साम उपासीत । लोकस्थिते वृष्टिनि मित्तत्वादानन्तर्यम् । पुरोवातो हिंकार । पुरोवाताद्युद्गृह्णान्ता हि वृष्टि , यथा साम हिंकारादिनिधनान्तम् , अत पुरोवातो हिंकार , प्राथम्यात् । मेघो जायते स प्रस्ताव , प्रावृषि मेघजनने वृष्टे प्रस्ताव इति हि प्रसिद्धि , वर्षति स उद्गीथ , श्रैष्ठ्यात् , विद्योतते स्तनयति स प्रतिहार , प्रतिहृतत्वात् , उद्गृह्णाति तत् निधनम् , समाप्तिसामान्यात् ॥

वर्षति हास्मै वर्षयति ह य एतदेव विद्वान्वृष्टौ पञ्चविधꣳ सामोपास्ते ॥ २ ॥

इति तृतीय खण्ड. ॥

फलमुपासनस्य— वर्षति ह अस्मै इच्छात । तथा वर्षयति ह असत्यामपि वृष्टौ । य एतदित्यादि पूर्ववत् ॥

इति तृतीयखण्डभाष्यम् ॥

चतुर्थ खण्ड ॥

सर्वास्वप्सु पञ्चविधꣳसामोपासीत मेघो यत्सम्प्लवते स हिंकारो यद्वर्षति स प्रस्ताव' या' प्राच्य स्यन्दन्ते स उद्गीथो या' प्रतीच्य स प्रतिहार' समुद्रो निधनम् ॥

सर्वास्वप्सु पञ्चविध साम उपासीत । वृष्टिपूर्वकत्वात्सर्वासामपामानन्तर्यम् । मेघो यत्सम्प्लवते एकीभावेनेतरतर घनीभवति मेघ यदा उन्नत, तदा सम्प्लवते इत्युच्यते, तदा अपामारम्भ स हिंकार, यद्वर्षति स प्रस्ताव, आप सर्वतो व्याप्तु प्रस्तुता । या प्राच्य स्यन्दन्ते स उद्गीथ, श्रैष्ठ्यात्, या प्रतीच्य स प्रतिहार, प्रतिशब्दसामान्यात्, समुद्रो निधनम्, तन्निधनत्वादपाम् ॥

न ह्याप्सु प्रैत्यप्सुमान्भवति य एतदेव विद्वान्सर्वास्वप्सु पञ्चविधꣳ सामोपास्ते ॥

इति चतुर्थ खण्ड ॥

न ह अप्सु प्रैति । नेच्छति चेत् । अप्सुमान् अस्मान्भवति फलम् ॥

इति चतुर्थखण्डभाष्यम् ॥

पञ्चम खण्ड ॥

ऋतुषु पञ्चविधꣳ सामोपासीत वसन्तो हिकारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथ शरत्प्रतिहारो हेमन्तो निधनम् ॥१॥

ऋतुषु पञ्चविध साम उपासीत । ऋतुव्यवस्थाया यथोक्ताम्बुनिमित्तत्वादानन्तयम् । वसन्तो हिकार, प्राथम्यात्, ग्रीष्म प्रस्ताव, यवादिसग्रह प्रस्तूयते हि प्रावृडर्थम्, वर्षा उद्गीथ, प्राधान्यात्, शरत् प्रतिहार, रोगिणा मृताना च प्रतिहरणात्, हेमन्तो निधनम्, निवाते निधनात्प्राणिनाम् ॥

कल्पन्ते हास्मा ऋतव ऋतुमान्भवति य एतदेव विद्वानृतुषु पञ्चविधꣳ सामोपास्ते ॥ २ ॥

इति पञ्चम खण्ड ॥

फलम्—कल्पन्ते ह ऋतुव्यवस्थानुरूप भोग्यत्वेनास्मै उपासकाय ऋतव । ऋतुमान् आर्तवैर्भोगैश्च सपन्नो भवतीत्यर्थ ॥

इति पञ्चमखण्डभाष्यम् ॥

षष्ठः खण्डः ॥

पशुषु पञ्चविधꣳ सामोपासीताजा हिङ्कारोऽवयः प्रस्तावो गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो निधनम् ॥ १ ॥

पशुषु पञ्चविध साम उपासीत । सम्यग्वृत्तेष्वृतुषु पशव्य काल इत्यानन्तर्यम् । अजा हिंकार , प्राधान्यात् , प्राथम्याद्वा— 'अज पशूना प्रथम ' इति श्रुते , अवय प्रस्ताव , साहचर्यदर्शनादजावीनाम् , गाव उद्गीथ , श्रैष्ठ्यात् , अश्वा प्रतिहार , प्रतिहरणात्पुरुषाणाम् , पुरुषो निधनम् , पुरुषाश्रयत्वात्पशूनाम् ॥

भवन्ति ह्यस्य पशवः पशुमान्भवति य एतदेव विद्वान्पशुषु पञ्चविधꣳ सामोपास्ते ॥ २ ॥

इति षष्ठः खण्डः ॥

फलम्— भवन्ति ह अस्य पशव पशुमान्भवति, पशुफलैश्च भोगत्यागादिभिर्युज्यत इत्यर्थ ॥

इति षष्ठखण्डभाष्यम् ॥

सप्तम खण्ड ॥

प्राणेषु पञ्चविध परोवरीय' सामोपासीत प्राणो हिंकारो वाक्प्रस्तावश्चक्षुरुद्गीथ' श्रोत्र प्रतिहारो मनो निधन परोवरीयाᳬसि वा एतानि ॥ १ ॥

प्राणेषु पञ्चविध परोवरीय साम उपासीत, पर पर वरीयस्त्वगुणवत्प्राणदृष्टिविशिष्ट सामोपासीतेत्यर्थ । प्राणो हिंकार, उत्तरोत्तरवरीयसा प्राथम्यात्, वाक् प्रस्ताव, वाचा हि प्रस्तूयते सर्वम्, वाग्वरीयसी प्राणात्— अप्राप्तमप्युच्यते वाचा, प्राप्तस्यैव तु गन्धस्य ग्राहक प्राण, चक्षुरुद्गीथ, वाचो बहुतरविषय प्रकाशयति चक्षु, अता वरीया वाच उद्गीथ, श्रैष्ठ्यात्, श्रोत्र प्रतिहार, प्रतिहृतत्वात्, वरीय-श्चक्षुष, सर्वत श्रवणात्, मनो निधनम्, मनसि हि निधीयन्ते पुरुषस्य भोग्यत्वेन सर्वेन्द्रियाहृता विषया, वरीयस्त्व च श्रोत्रान्मनस, सर्वेन्द्रियविषयव्यापकत्वात्, अतीन्द्रियविषयोऽपि मनसो गोचर एवेति । यथोक्तहेतुभ्य परोवरीयासि प्राणादीनि वै एतानि ॥

परोवरीयो ह्यस्य भवति परोवरीयसो ह लोकाञ्जयति य एतदेव विद्वान्प्राणेषु पञ्चविध परोवरीय सामोपास्त इति तु पञ्चविधस्य ॥ २ ॥

इति सप्तम खण्ड ॥

एतद्दृष्ट्या विशिष्ट य परोवरीय साम उपास्ते, परावरीयो ह अस्य जीवन भवतीत्युक्तार्थम । इति तु पञ्चविधस्य साम्न उपासनमुक्तमिति सप्तविधे वक्ष्यमाणविषये बुद्धिसमाधानार्थम । निरपेक्षो हि पञ्चविधे, वक्ष्यमाणे बुद्धिं समाधित्सति ॥

इति सप्तमखण्डभाष्यम् ॥



अष्टम. खण्ड ॥

अथ सप्तविधस्य वाचि सप्तविधꣳ सा मोपासीत यत्किच वाचो हुमिति स हिंकारो यत्प्रेति स प्रस्तावो यदेति स आदि. ॥

अथ अनन्तर सप्तविधस्य समस्तस्य साम्न उपासन साध्विदमारभ्यते । वाचि इति सप्तमी पूर्ववत्, वाग्दृष्टि-विशिष्ट सप्तविध सामोपासीतेत्यर्थ । यत्किच वाच शब्दस्य हुमिति यो विशेष स हिंकार, हकारसामान्यात् । यत्प्रेति शब्दरूप स प्रस्ताव, प्र सामान्यात् । यत् आ इति स आदि, आकारसामान्यात् । आदिरित्योंकार, सर्वादित्वात् ॥

यदुदिति स उद्गीथो यत्प्रतीति स प्रतिहारो यदुपेति स उपद्रवो यन्नीति तन्निधनम् ॥

यदुदिति स उद्गीथ, उत्पूर्वत्वादुद्गीथस्य, यत्प्रतीति स प्रतिहार, प्रतिसामान्यात्, यदुपेति स उपद्रव, उपोपक्रमत्वादुपद्रवस्य, यन्नीति तन्निधनम्, नि शब्दसामान्यात् ॥

दुग्धेऽस्मै वाग्दोह यो वाचो दोहोऽन्नवानन्नादो भवति य एतदेव विद्वान्वाचि सप्तविधꣳ सामोपास्ते ॥ ३ ॥

दुग्धेऽस्मै इत्याद्युक्तार्थम् ॥

इति अष्टमखण्डभाष्यम् ॥

नवम खण्ड ॥

अथ खल्वमुमादित्यꣳ सप्तविधꣳ सामोपासीत सर्वदा समस्तेन साम मा प्रति मा प्रतीति सर्वेण समस्तेन साम ॥

अवयवमात्रे साम्न्यादित्यदृष्टि पञ्चविधेषूक्ता प्रथमे चाध्याये । अथ इदानीं खलु अमुमादित्य समस्ते साम्न्यवयवविभागशोऽध्यस्य सप्तविध सामोपासीत । कथ पुन सामत्वमादित्यस्येति, उच्यते— उद्गीथत्वे हेतुवदादित्यस्य सामत्वे हेतु । कोऽसौ[१] सर्वदा सम वृद्धिक्षयाभावात्, तेन हेतुना साम आदित्य । मा प्रति मा प्रतीति तुल्या बुद्धि मुत्पादयति, अत सर्वेण सम , अत साम, समत्वादित्यर्थ । उद्गीथभक्तिसामान्यवचनादेव लोकादिषूक्तसामान्यात् हिंकारादित्व गम्यत इति हिंकारादित्वे कारण नोक्तम् । सामत्वे पुन सवितुरनुक्त कारण न सुबोधमिति समत्वमुक्तम् ॥

तस्मिन्निमानि सर्वाणि भूतान्यन्वायत्तानीति विद्यात्तस्य यत्पुरोदयात्स हिं-

कारस्तदस्य पशवोऽन्वायत्तास्तस्मात्ते हि कुर्वन्ति हिंकारभाजिनो ह्येतस्य साम्नः ॥

तस्मिन् आदित्ये अवयवविभागश इमानि वक्ष्यमाणानि सर्वाणि भूतानि अन्वायत्तानि अनुगतान्यादित्यमुपजीव्यत्वेन इति विद्यात् । कथम् ? तस्य आदित्यस्य यत्पुरोदयात् धर्मरूपम्, स हिंकार भक्ति , तत्रेद सामान्यम्, यत्तस्य हिंकारभक्तिरूपम् । तदस्यादित्यस्य साम्न पशव गवादय अन्वायत्ता अनुगता तद्भक्तिरूपमुपजीवन्तीत्यर्थ । यस्मादेवम्, तस्मात्ते हिं कुर्वन्ति पशव प्रागुदयात् । तस्माद्धिंकारभाजिनो हि एतस्य आदित्याख्यस्य साम्न , तद्भक्तिभजनशीलत्वाद्धि त एव वर्तन्ते ॥

अथ यत्प्रथमोदिते स प्रस्तावस्तदस्य मनुष्या अन्वायत्तास्तस्मात्ते प्रस्तुतिकामा प्रशꣳसाकामा प्रस्तावभाजिनो ह्येतस्य साम्न ॥ ३ ॥

अथ यत्प्रथमोदिते सवितृरूपम्, तदस्य आदित्याख्यस्य साम्न स प्रस्ताव , तदस्य मनुष्या अन्वायत्ता पूर्ववत् । त

स्मात्ते प्रस्तुतिं प्रशसा कामयन्ते, यस्मात्प्रस्तावभाजिनो हि एतस्य साम्न ॥

अथ यत्सगववेलाया२ स आदिस्त दस्य वया२स्यन्वायत्तानि तस्मात्तान्यन्तरिक्षेऽनारम्बणान्यादायात्मान परिप तन्त्यादिभाजीनि ह्येतस्य साम्न ॥ ४ ॥

अथ यत् सगववेलाया गवा रश्मीना सगमन सगवो यस्या वेलायाम्, गवा वा वत्सै सह, सा सगववेला तस्मिन्काले यत्सावित्र रूपम्, स आदि भक्तिविशेष ओकार । तदस्य वयासि पक्षिणोऽन्वायत्तानि । यत एवम्, तस्मात् तानि वयासि अन्तरिक्षे अनारम्बणानि अनालम्बनानि, आत्मानमादाय आत्मानमेव आलम्बनत्वेन गृहीत्वा, परिपतन्ति गच्छन्ति, अत आकारसामान्यादादिभक्तिभाजीनि हि एतस्य साम्न ॥

अथ यत्सप्रतिमध्यदिने स उद्गीथस्तदस्य देवा अन्वायत्तास्तस्मात्ते सत्तमा' प्राजापत्यानामुद्गीथभाजिनो ह्येतस्य साम्नः ॥ ५ ॥

अथ यत् सप्रतिमध्यदिने ऋजुमध्यदिने इत्यर्थ, स उद्गीथभक्ति, तदस्य देवा अन्वायत्ता, द्योतनातिशयात्तत्काले । तस्मात्ते सत्तमा विशिष्टतमा प्राजापत्याना प्रजापत्यपत्यानाम्, उद्गीथभाजिनो हि एतस्य साम्न ॥

अथ यदूर्ध्व मध्यदिनात्प्रागपराह्णात्स प्रतिहारस्तदस्य गर्भा अन्वायत्तास्तस्मात्ते प्रतिहृतानावपद्यन्ते प्रतिहारभाजिनो ह्येतस्य साम्न ॥ ६ ॥

अथ यदूर्ध्व मध्यदिनात् प्रागपराह्णात यद्रूप सवितु, स प्रतिहार, तदस्य गर्भा अन्वायत्ता । अत ते सवितु प्रतिहारभक्तिरूपेणोर्ध्व प्रतिहृता सन्त नावपद्यन्ते नाध पतन्ति, तद्वारे सत्यपीत्यर्थ । यत प्रतिहारभाजिना हि एतस्य साम्नो गर्भा ॥

अथ यदूर्ध्वमपराह्णात्प्रागस्तमयात्स-उपद्रवस्तदस्यारण्या अन्वायत्तास्तस्मात्ते पुरुष दृष्ट्वा कक्षꣳश्वभ्रमित्युपद्रवन्त्युपद्रवभाजिनो ह्येतस्य साम्न. ॥ ७ ॥

अथ यदूर्ध्वमपराह्णात् प्रागस्तमयात् स उपद्रव , तदस्य आरण्या पशव अन्वायत्ता । तस्मात्ते पुरुष दृष्ट्वा भीता कक्षम् अरण्य श्वभ्र भयशून्यमिति उपद्रवन्ति उपगच्छन्ति , दृष्ट्वोपद्रवणात् उपद्रवभाजिनो हि एतस्य साम्न ॥

अथ यत्प्रथमास्तमिते तन्निधन तदस्य पितरोऽन्वायत्तास्तस्मात्तान्निदधति निधनभाजिनो ह्येतस्य साम्न एव खल्वमुमादित्य५ सप्तविध५ सामोपास्ते ॥ ८ ॥

इति नवम खण्ड' ॥

अथ यत् प्रथमास्तमितेऽदर्शन जिगमिषति सवितरि, तन्निधनम , तदस्य पितर अन्वायत्ता , तस्मात्तान्निदधति—पितृपितामहप्रपितामहरूपेण दर्भेषु निक्षिपन्ति तान , तदर्थं पिण्डान्वा स्थापयन्ति । निधनसबन्धान्निधनभाजिनो हि एतस्य साम्न पितर । एवमवयवश सप्तधा विभक्त खलु अमुमादित्य सप्तविध सामोपास्ते य , तस्य तदापत्ति फलमिति वाक्यशष ॥

इति नवमखण्डभाष्यम् ॥

दशम खण्ड ॥

मृत्यु आदित्य, अहोरात्रादिकालेन जगत प्रमापयितृत्वात्। तस्य अतितरणाय इद सामोपासनमुपदिश्यते—

अथ खल्वात्मसमितमतिमृत्यु सप्तविधꣳ सामोपासीत हिंकार इति त्र्यक्षर प्रस्ताव इति त्र्यक्षर तत्समम् ॥ १ ॥

अथ खलु अनन्तरम्, आदित्यमृत्युविषयसामोपासनस्य, आत्मसमित स्वावयवतुल्यतया मितम्, परमात्मतुल्यतया वा समितम्, अतिमृत्यु, मृत्युजयहेतुत्वात्, यथा प्रथमेऽध्याये उद्गीथभक्तिनामाक्षराणि उद्गीथ इत्युपास्यत्वेनोक्तानि, तथेह सान्न सप्तविधभक्तिनामाक्षराणि समाहृत्य त्रिभिस्त्रिभि समतया सामत्व परिकल्प्य उपास्यत्वेन उन्यन्ते। तदुपासन मृत्युगोचराक्षरसख्यासामान्येन मृत्यु प्राप्य, तदतिरिक्ताक्षरेण तस्य आदित्यस्य मृत्योरतिक्रमणायैव सक्रमण कल्पयति। अतिमृत्यु सप्तविध साम उपासीत, मृत्युमतिक्रान्तमतिरिक्ताक्षरसख्यया इत्यतिमृत्यु साम। तस्य प्रथमभक्तिनामाक्षराणि हिंकार इति, एतत् त्र्यक्षर भक्तिनाम। प्रस्ताव इति च भक्तेस्त्र्यक्षरमव नाम, तत् पूर्वेण समम् ॥

आदिरिति द्व्यक्षर प्रतिहार इति चतु-

परिग्रहण सं
ग्रन्थालय, क उ ति शि संस्थान
सारनाथ, वाराणसी

रक्षर तत इहैक तत्सममु ॥ २ ॥

आदिरिति त्र्यक्षरम, सप्तविधस्य साम्न सख्यापूरणे ओकार आदिरित्युच्यते। प्रतिहार इति चतुरक्षरम्। तत इहैकमक्षरमवच्छिद्य आद्यक्षरयो प्रक्षिप्यते, तेन तत् सममेव भवति ॥

उद्गीथ इति त्र्यक्षरमुपद्रव इति चतुरक्षर त्रिभिस्त्रिभि सम भवत्यक्षरमतिशिष्यते त्र्यक्षर तत्सममु ॥ ३ ॥

उद्गीथ इति त्र्यक्षरम् उपद्रव इति चतुरक्षर त्रिभिस्त्रिभि सम भवति। अक्षरमतिशिष्यत अतिरिच्यत। तेन वैषम्ये प्राप्ते, साम्न समत्वकरणाय आह— तदकमपि सदक्षरमिति त्र्यक्षरमेव भवति। अत तत् सममु ॥

निधनमिति त्र्यक्षर तत्सममेव भवति तानि ह वा एतानि द्वाविꣳशतिरक्षराणि ॥

निधनमिति त्र्यक्षर तत्सममेव भवति। एव त्र्यक्षरसमतया सामत्व सपाद्य यथाप्राप्तान्येवाक्षराणि सख्यायन्ते —तानि ह वा एतानि सप्तभक्तिनामाक्षराणि द्वाविंशति ॥

एकविꣳशत्यादित्यमाप्नोत्येकविꣳशो वा इतोऽसावादित्यो द्वाविꣳशेन परमादित्याज्जयति तन्नाक तद्विशोकम् ॥ ५ ॥

तत्रैकविंशत्यक्षरसरयया आदित्यमाप्नोति मृत्युम् । यस्मा देकविंश इत अस्माल्लोकात् असावादित्य सख्यया । 'द्वादश मासा पञ्चर्तवस्त्रय इमे लोका असावादित्य एक विꣳश ' इति श्रुते , अतिशिष्टेन द्वाविंशेनाक्षरेण पर मृत्यो आदित्यात् जयति आप्नोतीत्यथ । यच्च तदादित्यात्परम , किं तत् ? नाकम् , कमिति सुख तस्य प्रतिषेधोऽक तन्न भवतीति नाकम् , कमेवेत्यर्थ , अमृत्युविषयत्वात् । विशोक च तत् विगतशोक मानसदु खरहितमित्यर्थ — तदाप्नोतीति ॥

आप्नोति ह्यादित्यस्य जय परो ह्यस्या दित्यजयाज्जयो भवति य एतदेव विद्वा नात्मसम्मितमतिमृत्यु ससविधꣳ सामोपास्ते सामोपास्ते ॥ ६ ॥

इति दशम खण्ड ॥

उक्तस्यैव पिण्डिताथमाह—एकविंशतिसख्यया आदित्यस्य जयमनु, परा ह, अस्य एवविद आदित्यजयात् मृत्युगोचरात् परो जयो भवति, द्वाविंशत्यक्षरसरययेत्यर्थ । य एत देव विद्वानित्याद्युक्ताथम , तस्यैतद्यथोक्त फलमिति। द्विरभ्यास साप्तविध्यसमाप्त्यथ ॥

इति दशमखण्डभाष्यम् ॥

एकादश खण्ड ॥

मनो हिंकारो वाक्प्रस्तावश्चक्षुरुद्गीथ श्रोत्र प्रतिहारः प्राणो निधनमेतद्गायत्र प्राणेषु प्रोतम् ॥ १ ॥

विना नामग्रहण पञ्चविधस्य सप्तविधस्य च साम्न उपासनमुक्तम् । अथेदानीं गायत्रादिनामग्रहणपूर्वक विशिष्टफलानि सामोपासनान्तराण्युच्यन्ते । यथाक्रम गायत्रादीना कर्मणि प्रयोग , तथैव मनो हिंकार , मनस सर्वकरणवृत्तीना प्राथम्यात् । तदानन्तर्यात् वाक् प्रस्ताव , चक्षु उद्गीथ , श्रैष्ठ्यात् । श्रात्र प्रतिहार , प्रतिहृतत्वात् । प्राणो निधनम् , यथाक्ताना प्राणे निधनात्स्वापकाल । एतद्गायत्र साम प्राणेषु प्रातम् , गायन्या प्राणसस्तुतत्वात् ॥

स एवमेतद्गायत्र प्राणेषु प्रोत वेद प्राणी भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या महामना स्यात्तद्व्रतम् ॥ २ ॥

स , य एवमेतद्गायत्र प्राणेषु प्रोत वेद, प्राणी भवति , अविकलकरणो भवतीत्येतत् । सर्वमायुरेति, शत वर्षाणि सवमायु पुरुषस्य इति श्रुते । ज्योक् उज्ज्वल सन् जीवति । महान् भवति प्रजादिभि । महाश्च कीर्त्या । गायत्रोपासकस्य एतत् व्रत भवति, यत् महामना अक्षुद्रचित्त स्यादित्यर्थ ॥

इति एकादशखण्डभाष्यम् ॥

द्वादश खण्ड ॥

अभिमन्थति स हिंकारो धूमो जायते स प्रस्तावो ज्वलति स उद्गीथोऽङ्गारा भवन्ति स प्रतिहार उपशाम्यति तन्निधनꣳ सꣳशाम्यति तन्निधनमेतद्रथतरमग्नौ प्रोतम् ॥ १ ॥

अभिमन्थति स हिंकार, प्राथम्यात्। अग्नेर्धूमो जायते स प्रस्ताव, आनन्तर्यात्। ज्वलति स उद्गीथ, हवि सबन्धाच्छ्लैष्ठ्य ज्वलनस्य। अङ्गारा भवन्ति स प्रतिहार, अङ्गाराणा प्रतिहृतत्वात्। उपशाम, सावशेषत्वादग्ने, सशम नि शेषोपशम, समाप्तिसामान्यान्निधनम्। एतद्रथतरम् अग्नौ प्रोतम्। मन्थने हि अग्निर्गीयत ॥

स य एवमेतद्रथतरमग्नौ प्रोत वेद ब्रह्म वर्चस्यन्नादो भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या न प्रत्यङ्ङग्निमाचामेन्न निष्ठीवेत्तद्व्रतम् ॥

स य इत्यादि पूर्ववत्। ब्रह्मवर्चसी वृत्तस्वाध्यायनिमित्त तेजो ब्रह्मवर्चसम्। तेजस्तु केवल त्विड्भाव। अन्नादो दीप्ताग्नि। न प्रत्यक्, अग्नेरभिमुखो न आचामेत् न भक्षयेत्किंचित्, न निष्ठीवेत् श्लेष्मनिरसन च न कुर्यात्, तद्व्रतम् ॥

इति द्वादशखण्डभाष्यम् ॥

त्रयोदश खण्ड ॥

उपमन्त्रयते स हिंकारो ज्ञपयते स प्रस्ताव. स्त्रिया सह शेते स उद्गीथ. प्रति स्त्री सह शेते स प्रतिहारः काल गच्छति तन्निधन पार गच्छति तन्निधनमेतद्वामदेव्य मिथुने प्रोतम् ॥ १ ॥

उपमन्त्रयते सकेत करोति, प्राथम्यात् स हिंकार । ज्ञपयते तोषयति, स प्रस्ताव । सहशयनम् एकपर्यङ्कगमनम्, स उद्गीथ, श्रैष्ठ्यात् । प्रति स्त्रीं शयन स्त्रिया अभिमुखीभाव, स प्रतिहार । काल गच्छति मैथुनेन, पार समाप्तिं गच्छति तन्निधनम्, एतद्वामदेव्य मिथुने प्रोतम्, वाग्वम्बुमिथुनसबन्धात् ॥


स य एवमेतद्वामदेव्य मिथुने प्रोत वेद मिथुनी भवति मिथुनान्मिथुनात्प्रजायते सर्वमायुरेति ज्योग्जीवति महान्प्र-

जया पशुभिर्भवति महान्कीर्त्या न का चन परिहरेत्तद्व्रतम् ॥ २ ॥

इति त्रयोदश खण्ड ॥

स य इत्यादि पूर्ववत् । मिथुनीभवति अविधुरो भवतीत्यर्थ । मिथुनान्मिथुनात्प्रजायते इति अमोघरेतस्त्वमुच्यते । न काचन, काचिदपि स्त्रिय स्वात्मतत्प्राप्ता न परिहरेत् समागमार्थिनीम्, वामदेव्यसामोपासनाङ्गत्वेन विधानात् । एतस्मादन्यत्र प्रतिषेधस्मृतय । वचनप्रामाण्याच्च धर्मावगतेर्न प्रतिषेधशास्त्रेणास्य विरोध ॥

इति त्रयोदशखण्डभाष्यम् ॥



चतुर्दश खण्ड. ॥

उद्यन्हिकार उदित' प्रस्तावो मध्य-
दिन उद्गीथोऽपराह्ण. प्रतिहारोऽस्त यन्नि
धनमेतद्बृहदादित्ये प्रोतम् ॥ १ ॥

उद्यन्सविता स हिंकार, प्राथम्याद्दर्शनस्य । उदित प्रस्ताव, प्रस्तवनहेतुत्वात्कर्मणाम् । मध्यदिन उद्गीथ, श्रैष्ठ्यात् । अपराह्ण प्रतिहार, पश्वादीना गृहान्प्रति हरणात् । यदस्त यस्तन्निधनम्, रात्रौ गृहे निधानात्प्राणिनाम्। एतद्बृहत् आदित्ये प्रोतम्, बृहत आदित्यदैवत्यत्वात् ॥

स य एवमेतद्बृहदादित्ये प्रोत वेद ते
जस्व्यन्नादो भवति सर्वमायुरेति ज्यो
ग्जीवति महान्प्रजया पशुभिर्भवति म
हान्कीर्त्या तपन्तं न निन्देत्तद्व्रतम् ॥ २ ॥

इति चतुर्दश खण्डः ॥

स य इत्यादि पूर्ववत् । तपन्त न निन्देत्, तद्व्रतम् ॥

इति चतुर्दशखण्डभाष्यम् ॥

पञ्चदश खण्ड ॥

अभ्राणि सम्भवन्ते स हिंकारो मेघो जायते स प्रस्तावो वर्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहार उद्गृह्णाति तन्निधनमेतद्वैरूप पर्जन्ये प्रोतम् ॥ १ ॥

अभ्राणि अभ्भरणात् । मेघ उदकसेक्तृत्वात् । उक्तार्थमन्यत् । एतद्वैरूप नाम साम पर्जन्ये प्रोतम् । अनेकरूपत्वात् अभ्रादिभि पर्जन्यस्य, वैरूप्यम् ॥

स य एवमेतद्वैरूप पर्जन्ये प्रोत वेद विरूपाश्च सुरूपाश्च पशूनवरुन्धे सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या वर्षन्त न निन्देत्तद्व्रतम् ॥ २ ॥

इति पञ्चदश खण्ड ॥

विरूपाश्च सुरूपाश्चाजाविप्रभृतीन्पशूनवरुन्धे प्राप्नोतीत्यर्थ । वर्षन्त न निन्देत् तद्व्रतम् ॥

इति पञ्चदशखण्डभाष्यम् ॥

षोडश. खण्ड. ॥

वसन्तो हिंकारो ग्रीष्मः प्रस्तावो व
र्षा उद्गीथः शरत्प्रतिहारो हेमन्तो निध-
नमेतद्वैराजमृतुषु प्रोतम् ॥ १ ॥

वसन्तो हिंकार, प्राथम्यात् । ग्रीष्म प्रस्ताव इत्यादि पूर्ववत् ॥

स य एवमेतद्वैराजमृतुषु प्रोत वेद
विराजति प्रजया पशुभिर्ब्रह्मवर्चसेन स
र्वमायुरेति ज्योग्जीवति महान्प्रजया प
शुभिर्भवति महान्कीर्त्यर्तून्न निन्देत्तद्व्र
तम् ॥ २ ॥

इति षोडश. खण्डः ॥

एतद्वैराजमृतुषु प्रोत वेद, विराजति ऋतुवत्— यथा ऋतव आर्तवैर्धर्मैर्विराजन्ते, एव प्रजादिभिर्विद्वानिति। उक्त-मन्यत् । ऋतून्न निन्देत्, तद्व्रतम् ॥

इति षोडशखण्डभाष्यम् ॥

सप्तदश खण्ड. ॥

पृथिवी हिंकारोऽन्तरिक्ष प्रस्तावो द्यौरुद्गीथो दिश प्रतिहारः समुद्रो निधनमेता' शक्वर्यो लोकेषु प्रोता' ॥ १ ॥

पृथिवी हिंकार इत्यादि पूर्ववत् । शक्वय इति नित्य बहुवचन रेवत्य इव । लोकेषु प्रोता ॥

स य एवमेता शक्वर्यो लोकेषु प्रोता वेद लोकी भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या लोकान्न निन्देत्तद्व्रतम् ॥ २ ॥

इति सप्तदश खण्ड ॥

लोकी भवति लोकफलेन युज्यत इत्यर्थ । लोकान्न निन्देत्, तद्व्रतम् ॥

इति सप्तदशखण्डभाष्यम् ॥



अष्टादश खण्ड ॥

—*—

अजा हिकारोऽवय प्रस्तावो गाव उद्गीथोऽश्वा प्रतिहार पुरुषो निधनमेता रेवत्य पशुषु प्रोता. ॥ १ ॥

अजा हिंकार इत्यादि पूर्ववत् । पशुषु प्राता ॥

स य एवमेता रेवत्य. पशुषु प्रोता वेद पशुमान्भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या पशून्न निन्देत्तद्व्रतम् ॥ २ ॥

इति अष्टादश. खण्ड ॥

पशून न निन्दत्, तद्व्रतम् ॥

इति अष्टादशखण्डभाष्यम् ॥



एकोनविंश खण्ड ॥



लोम हिकारस्त्वक्प्रस्तावो मा᳖समु-
द्गीथोऽस्थि प्रतिहारो मज्जा निधनमेतद्य
ज्ञायज्ञीयमङ्गेषु प्रोतम् ॥ १ ॥

लोम हिकार, देहावयवाना प्राथम्यात् । त्वक् प्रस्ताव, आनन्तर्यात् । मासम् उद्गीथ, श्रैष्ठ्यात् । अस्थि प्रतिहार, प्रतिहृतत्वात् । मज्जा निधनम्, आन्त्यात् । एतद्यज्ञाय-ज्ञीय नाम साम देहावयवेषु प्रोतम् ॥

स य एवमेतद्यज्ञायज्ञीयमङ्गेषु प्रोत
वेदाङ्गी भवति नाङ्गेन विहूर्छति सर्वमा
युरेति ज्योग्जीवति महान्प्रजया पशु
भिर्भवति महान्कीर्त्या सवत्सर मज्ज्ञो
नाश्नीयात्तद्व्रत मज्ज्ञो नाश्नीयादिति वा ॥

अङ्गी भवति समग्राङ्गो भवतीत्यथ । नाङ्गेन हस्तपादा-दिना विहूर्छति न कुटिलीभवति, पङ्गु कुणी वा इत्यर्थ । सवत्सर सवत्सरमात्र मज्ज्ञो मासानि नाश्नीयात् न भक्ष-येत् । बहुवचन मत्स्योपलक्षणार्थम् । मज्ज्ञो नाश्नीयात् सवदैव नाश्नीयादिति वा, तद्व्रतम् ॥

इति एकोनविंशखण्डभाष्यम् ॥

विंश खण्डः ॥

अग्निर्हिंकारो वायुः प्रस्ताव आदित्य उद्गीथो नक्षत्राणि प्रतिहारश्चन्द्रमा निधनमेतद्राजन देवतासु प्रोतम् ॥ १ ॥

अग्नि हिंकार, प्रथमस्थानत्वात्। वायु प्रस्ताव, आनन्तर्यसामान्यात्। आदित्य उद्गीथ, श्रैष्ठ्यात्। नक्षत्राणि प्रतिहार, प्रतिहृतत्वात्। चन्द्रमा निधनम्, कर्मिणा तन्निधनात्। एतद्राजन देवतासु प्रोतम्, देवताना दीप्तिमत्त्वात् ॥

स य एवमेतद्राजन देवतासु प्रोत वेदैतासामेव देवतानाꣳ सलोकताꣳ सार्ष्टिताꣳ सायुज्य गच्छति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या ब्राह्मणान्न निन्देत्तद्व्रतम् ॥

विद्वत्फलम्—एतासामेवाग्न्यादीना देवताना सलोकता समानलोकता सार्ष्टिता समानर्द्धित्व सायुज्य सयुग्भावम् एकदेहदेहित्वमित्येतत्, वा शब्दोऽत्र लुप्तो द्रष्टव्य, सलोकता वा इत्यादि, भावनाविशेषत फलविशेषोपपत्ते। गच्छति प्राप्नोति, समुच्चयानुपपत्तेश्च। ब्राह्मणान् न निन्देत्, तद्व्रतम्। 'एते वै देवा प्रत्यक्ष यद्ब्राह्मणा' इति श्रुते ब्राह्मणनिन्दा देवतानिन्दैवेति ॥

इति विंशखण्डभाष्यम् ॥

एकविंश. खण्ड. ॥

त्रयी विद्या हिंकारश्चय इमे लोकाः स प्रस्तावोऽग्निर्वायुरादित्यः स उद्गीथो नक्षत्राणि वयाꣳसि मरीचय. स प्रतिहार. सर्पा गन्धर्वा पितरस्तन्निधनमेतत्साम सर्वस्मिन्प्रोतम् ॥ १ ॥

त्रयी विद्या हिंकार । अग्न्यादिसाम्न आनन्तर्यं त्रयी विद्याया अग्न्यादिकार्यत्वश्रुते । हिंकार प्राथम्यात्सर्वकर्तव्यानाम् । त्रय इमे लोकास्तत्कार्यत्वादनन्तरा इति प्रस्ताव । अग्न्यादीनामुद्गीथत्व श्रैष्ठ्यात् । नक्षत्रादीना प्रतिहृतत्वात्प्रतिहारत्वम् । सर्पादीना धकारसामान्यान्निधनत्वम् । एतत्साम नामविशेषाभावात्सामसमुदाय सामशब्द सर्वस्मिन् प्रोतम् । त्रयीविद्यादि हि सर्वम् । त्रयीविद्यादिदृष्ट्या हिंकारादिसामभक्त्य उपास्या । अतीतेष्वपि सामोपासनेषु येषु येषु प्रोत यद्यत्साम, तदृष्ट्या तदुपास्यमिति । कर्माङ्गाना दृष्टिविशेषेणेवाऽयस्य सस्कार्यत्वात् ॥

स य एवमेतत्साम सर्वस्मिन्प्रोत वेद सर्वꣳ ह भवति ॥ २ ॥

सर्वविषयसामविद फलम्—सर्वं ह भवति सर्वेश्वरो भवतीत्यर्थ । निरुपचरितसर्वभावे हि दिक्स्थेभ्यो बलिप्राप्त्यनुपपत्ति ॥

तदेष श्लोको यानि पञ्चधा त्रीणि त्रीणि तेभ्यो न ज्याय परमन्यदस्ति ॥

तत् एतस्मिन्नर्थे एष श्लोक मन्त्रोऽप्यस्ति । यानि पञ्चधा पञ्चप्रकारेण हिंकारादिविभागै प्रोक्तानि त्रीणि त्रीणि त्रयीविद्यादीनि, तेभ्य पञ्चत्रिकेभ्य ज्याय महत्तर पर च व्यतिरिक्तम् अन्यत् वस्त्वन्तर नास्ति न विद्यत इत्यर्थ । तत्रैव हि सर्वस्यान्तर्भाव ॥

यस्तद्वेद स वेद सर्वꣳ सर्वा दिशो बलिमस्मै हरन्ति सर्वमस्मीत्युपासीत तद्व्रत तद्व्रतम् ॥ ४ ॥

इति एकविंशः खण्डः ॥

य तत् यथोक्त सवात्मक साम वेद, स वेद सर्व स सर्वज्ञो भवतीत्यर्थ । सर्वा दिश सर्वदिक्स्था अस्मै एवविदे बलिं भोग हरन्ति प्रापयन्तीत्यर्थ । सर्वम् अस्मि भवामि इति एवम् एतत्साम उपासीत, तस्य एतदेव व्रतम्। द्विरुक्ति सामोपासनसमाप्त्यर्था ॥

इति एकविंशखण्डभाष्यम् ॥

द्वाविंश खण्ड ॥

विनर्दि साम्नो वृणे पशव्यमित्यग्नेरुद्गीथोऽनिरुक्त. प्रजापतेर्निरुक्त सोमस्य मृदु श्लक्ष्ण वायो श्लक्ष्ण बलवदिन्द्रस्य क्रौञ्च बृहस्पतेरपध्वान्त वरुणस्य तान्सर्वानेवोपसेवेत वारुण त्वेव वर्जयेत् ॥ १ ॥

सामोपासनप्रसङ्गेन गानविशेषादिसपत् उद्गातुरुपदिश्यते, फलविशेषसबन्धात् । विनर्दि विशिष्टो नर्द स्वरविशेष ऋषभकूजितसमोऽस्यास्तीति विनर्दि गानमिति वाक्यशेष । तच्च साम्न सबन्धि पशुभ्यो हित पशव्यम् अग्ने अग्निदेवत्य च उद्गीथ उद्गानम् । तदहमेवविशिष्ट वृणे प्रार्थये इति कश्चिद्यजमान उद्गाता वा मन्यते । अनिरुक्त अमुकसम इत्यविशेषित प्रजापते प्रजापतिदेवत्य स गानविशेष , आ निरुक्त्यात्प्रजापते । निरुक्त स्पष्ट । सोमस्य सोमदेवत्य स उद्गीथ इत्यथ । मृदु श्लक्ष्ण च गान वायो वायुदेवत्य तत् । श्लक्ष्ण बलवच्च प्रयत्नाधिक्योपेत च इन्द्रस्य ऐन्द्र तद्गानम् । क्रौञ्च क्रौञ्चपक्षिनिनादसम बृहस्पते बार्हस्पत्य तत् । अप-

ध्वान्त भिन्नकास्यस्वरसम वरुणस्य एतद्वानम् । तान्सर्वानेवोपसेवेत प्रयुञ्जीत वारुण त्वेवैक वर्जयेत् ॥

अमृतत्व देवेभ्य आगायानीत्यागायेत्स्वधां पितृभ्य आशा मनुष्येभ्यस्तृणोदक पशुभ्य स्वर्ग लोक यजमानायान्नमात्मन आगायानीत्येतानि मनसा ध्यायन्नप्रमत्त स्तुवीत ॥ २ ॥

अमृतत्व देवेभ्य आगायानि साधयानि, स्वधा पितृभ्य आगायानि, आशा मनुष्येभ्य, आशा प्रार्थना प्रार्थितमित्येतत्, तृणोदक पशुभ्य, स्वर्ग लोक यजमानाय, अन्नम् आत्मने मह्यम् आगायानि, इत्येतानि मनसा चिन्तयन् ध्यायन् अप्रमत्त स्वरोष्मव्यञ्जनादिभ्य स्तुवीत ॥

सर्वे स्वरा इन्द्रस्यात्मान, सर्व ऊष्माण प्रजापतेरात्मानः सर्वे स्पर्शा मृत्योरात्मानस्त यदि स्वरेषूपालभेतेन्द्र २ शरण प्रपन्नोऽभूव स त्वा प्रति वक्ष्यतीत्येन ब्रूयात् ॥ ३ ॥

सर्वे स्वरा अकारादय इन्द्रस्य बलकर्मण प्राणस्य आत्मान देहावयवस्थानीया । सर्वे ऊष्माण शषसहादय प्रजापतेर्विराज कश्यपस्य वा आत्मान । सर्वे स्पर्शा कादयो व्यञ्जनानि मृत्योरात्मान । तमेवविदमुद्गातार यदि कश्चित् स्वरेषूपालभेत– स्वरस्त्वया दुष्ट प्रयुक्त इति, एवमु पालब्ध इन्द्र प्राणमीश्वर शरणम् आश्रय प्रपन्नोऽभूव स्वरान्प्रयुञ्जानोऽहम्, स इन्द्र यत्तव वक्तव्य त्वा त्वा प्रति वक्ष्यति स एव देव उत्तर दास्यतीत्येन ब्रूयात् ॥

अथ यद्येनमूष्मसूपालभेत प्रजापतिꣳ शरण प्रपन्नोऽभूव स त्वा प्रति पेक्ष्यती-त्येन ब्रूयादथ यद्येनꣳ स्पर्शेषूपालभेत मृत्युꣳ शरण प्रपन्नोऽभूव स त्वा प्रति धक्ष्यतीत्येन ब्रूयात् ॥ ४ ॥

अथ यद्येनमूष्मसु तथैवोपालभेत, प्रजापतिं शरण प्रप-न्नोऽभूवम्, स त्वा प्रति पेक्ष्यति सचूर्णयिष्यतीत्येन ब्रूयात् । अथ यद्येन स्पर्शेषूपालभेत, मृत्यु शरण प्रपन्नोऽभूवम्, स त्वा प्रति धक्ष्यति भस्मीकरिष्यतीत्येन ब्रूयात् ॥

सर्वे स्वरा घोषवन्तो बलवन्तो वक्त

व्या इन्द्रे बल ददानीति सर्वे ऊष्माणो ऽग्रस्ता अनिरस्ता विवृता वक्तव्या' प्रजापतेरात्मान परिददानीति सर्वे स्पर्शा लेशेनानभिनिहिता वक्तव्या मृत्योरात्मान परिहराणीति ॥ ५ ॥

इति द्वाविंशः खण्ड ॥

यत इन्द्राद्यात्मान स्वरादय , अत सर्वे स्वरा घोषवन्त बलवन्तो वक्तव्या । तथा अहमिन्द्रे बल ददानि बलमादधानीति । तथा सर्वे ऊष्माण अग्रस्ता अन्तरप्रवेशिता अनिरस्ता बाहरप्राक्षिप्ता विवृता विवृतप्रयत्नोपेता । प्रजापतेरात्मान परिददानि प्रयच्छानीति । सर्वे स्पर्शा लेशेन शनकै अनभिनिहिता अनभिनिक्षिप्ता वक्तव्या । मृत्यो रात्मान बालानिव शनकै परिहरन् मृत्योरात्मान परिहराणीति ॥

इति द्वाविंशखण्डभाष्यम् ॥



त्रयोविंश. खण्ड ॥

त्रयो धर्मस्कन्धा यज्ञोऽध्ययन दान-
मिति प्रथमस्तप एव द्वितीयो ब्रह्मचा-
र्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मा-
नमाचार्यकुलेऽवसादयन्सर्व एते पुण्य-
लोका भवन्ति ब्रह्मसंस्थोऽमृतत्व-
मेति ॥ १ ॥

ओंकारस्योपासनविध्यर्थं त्रयो धमस्कन्धा इत्याद्यार
भ्यते । नैव मन्तव्य सामावयवभूतस्यैवोद्गीथादिलक्षणस्यो
कारस्योपासनात्फल प्राप्यत इति, कि तर्हि, यत्सर्वैरपि
सामोपासनै कर्मभिश्चाप्राप्य तत्फलममृतत्व केवलादोंकारो
पासनात्प्राप्यत इति । तत्स्तुत्यर्थं सामप्रकरणे तदुपन्यास ।
त्रय त्रिसख्याका धर्मस्य स्कन्धा धर्मस्कन्धा धर्मप्रवि-
भागा इत्यर्थ , के ते इति, आह— यज्ञ अग्निहोत्रादि ,
अध्ययन सनियमस्य ऋगादेरभ्यास , दान बहिर्वेदि यथा-
शक्ति द्रव्यसविभागो भिक्षमाणेभ्य , इति एष प्रथम धर्म

स्कन्ध गृहस्थसमवेतत्वात् तन्निर्वर्तकेन गृहस्थेन निर्दिश्यते, प्रथम एक इत्यर्थ, द्वितीयतृतीयश्रवणात् न आद्यार्थ । तप एव द्वितीय, तप इति कृच्छ्रचान्द्रायणादि तद्वान् तापस परिव्राड्वा, न ब्रह्मसस्थ आश्रमधर्ममात्रसस्थ, ब्रह्म सस्थस्य तु अमृतत्वश्रवणात्, द्वितीय धर्मस्कन्ध । ब्रह्मचारी आचार्यकुले वस्तु शीलमस्येत्याचार्यकुलवासी । अत्यन्त यावज्जीवम् आत्मान नियमै आचार्यकुले अवसादयन् क्षपयन् देह तृतीय धर्मस्कन्ध । अत्यन्तमित्यादिविशेषणान्नैष्ठिक इति गम्यते । उपकुर्वाणस्य स्वाध्यायग्रहणार्थत्वात् न पुण्यलोकत्व ब्रह्मचर्यण । सर्व एते त्रयोऽप्याश्रमिण यथोक्तैर्धर्मै पुण्यलोका भवन्ति, पुण्यो लोको येषा त इमे पुण्यलोका आश्रमिणो भवन्ति । अवशिष्टस्त्वनुक्त परिव्राट् तुरीय ब्रह्मसस्थ ब्रह्मणि सम्यक्स्थित, सोऽमृतत्व पुण्यलोकविलक्षणममरणभावमात्यन्तिकम् एति, न आपेक्षिकम्, देवाद्यमृतत्ववत्, पुण्यलोकात्पृथक् अमृतत्वस्य विभागकरणात् ॥

यदि च पुण्यलोकातिशयमात्रममृतत्वमभविष्यत्, तत पुण्यलोकत्वाद्विभक्त नावक्ष्यत् । विभक्तोपदेशाच्च आत्यन्तिकममृतत्वमिति गम्यते । अत्र च आश्रमधर्मफलोपन्यास

प्रणवसेवास्तुत्यर्थं , न तत्फलविध्यर्थं , स्तुतये च प्रणवसेवाया , आश्रमधर्मफलविधये च, इति हि भिद्येत वाक्यम् । तस्मात्स्मृतिप्रसिद्धाश्रमफलानुवादेन प्रणवसेवाफलममृतत्व ब्रुवन् प्रणवसेवा स्तौति । यथा पूणवर्मण सेवा भक्तपरिधानमात्रफला, राजवर्मणस्तु सेवा राज्यतुल्यफलेति— तद्वत् । प्रणवश्च तत्सत्य पर ब्रह्म तत्प्रतीकत्वात् । 'एतद्धयेवाक्षर ब्रह्म एतद्ध्येवाक्षर परम्' इत्याद्याम्नानात्काठके, युक्त तत्सेवातोऽमृतत्वम् ॥

अत्र आहु केचित्— चतुर्णामाश्रमिणामविशेषेण स्वधर्मानुष्ठानात्पुण्यलोकता इहोक्ता ज्ञानवर्जितानाम् 'सव एते पुण्यलोका भवन्ति' इति। नात्र परिव्राडवशेषित , परिव्राजकस्यापि ज्ञान यमा नियमाश्च तप एवेति , तप एव द्वितीय इत्यत्र तप शब्देन परिव्राट्तापसौ गृहीतौ । अतस्तेषामेव चतुर्णा यो ब्रह्मसस्थ प्रणवसेवक सोऽमृतत्वमेतीति चतुर्णामधिकृतत्वाविशेषात्, ब्रह्मसस्थत्वेऽप्रतिषेधाच्च, स्वकर्मच्छिद्रे च ब्रह्मसस्थताया सामर्थ्योपपत्ते । न च यववराहादिशब्दवत् ब्रह्मसस्थशब्द परिव्राजके रूढ , ब्रह्मणि सस्थितिनिमित्तमुपादाय प्रवृत्तत्वात् । न हि रूढिशब्दा निमित्तमुपाददते । सर्वेषा च ब्रह्मणि स्थितिरुपपद्यते । यत्र यत्र निमित्तमस्ति

ब्रह्मणि सस्थिति, तस्य तस्य निमित्तवतो वाचक सन्त ब्रह्मसस्थशब्द परिव्राडेकविषये सकोचे कारणाभावात् निरो द्धुमयुक्तम्। न च पारिव्राज्याश्रमधर्ममात्रेणामृतत्वम्, ज्ञा नानर्थक्यप्रसङ्गात्। पारिव्राज्यधर्मयुक्तमेव ज्ञानममृतत्वसाध नमिति चेत्, न, आश्रमधमत्वाविशेषात्। धर्मो वा ज्ञान-विशिष्टोऽमृतत्वसाधनमित्येतदपि सर्वाश्रमधर्माणामविशिष्टम्। न च वचनमस्ति परिव्राजकस्यैव ब्रह्मसस्थस्य मोक्ष, नान्येषाम् इति। ज्ञानान्मोक्ष इति च सर्वोपनिषदा सिद्धा न्त। तस्माद्य एव ब्रह्मसस्थ स्वाश्रमविहितधर्मवताम्, सोऽमृतत्वमेतीति॥

न, कर्मनिमित्तविद्याप्रत्यययोर्विरोधात्। कर्त्रादिकारकक्रि याफलभेदप्रत्ययवत्त्व हि निमित्तमुपादाय इद कुरु इद मा कार्षी इति कर्मविधय प्रवृत्ता। तच्च निमित्त न शास्त्रकृ तम्, सर्वप्राणिषु दर्शनात्। 'सत् एकमेवाद्वितीयम्' 'आत्मैवेद सवम्' 'ब्रह्मैवेद सर्वम्' इति शास्त्रजन्य प्रत्य-यो विद्यारूप स्वाभाविक क्रियाकारकफलभेदप्रत्यय कमवि-धिनिमित्तमनुपमृद्य न जायते, भेदाभेदप्रत्ययोर्विरोधात्। न हि तैमिरिकद्विचन्द्रादिभेदप्रत्ययमनुपमृद्य तिमिरापगमे चन्द्राद्येकत्वप्रत्यय उपजायते, विद्याविद्याप्रत्ययोर्विरोधात्।

तत्रैव सति य भेदप्रत्ययमुपादाय कर्मविधय प्रवृत्ता, स यस्योपमर्दित 'सत् एकमेवाद्वितीयम्' 'तत्सत्यम्' 'विकारभेदोऽनृतम्' इत्येतद्वाक्यप्रमाणजनितनैकत्वप्रत्ययेन, स सर्वकर्मभ्यो निवृत्त, निमित्तनिवृत्ते, स च निवृत्तकर्मा ब्रह्मसस्थ उच्यते, स च परिव्राडेव, अन्यस्यासभवात्, अन्यो हि अनिवृत्तभेदप्रत्यय सोऽन्यत्पश्यञ्शृण्वन्मन्वानो विजानान्निद कृत्वेद प्राप्नुयामिति हि मन्यते। तस्यैव कुर्वतो न ब्रह्मसस्थता, वाचारम्भणमात्रविकारानृताभिसधिप्रत्ययवत्त्वात्। न च असत्यमित्युपमर्दिते भदप्रत्यये सत्यमिदमनन कर्तव्य मयेति प्रमाणप्रमेयबुद्धिरुपपद्यते—आकाश इव तलमलबुद्धिर्विवकिन। उपमर्दितेऽपि भेदप्रत्यये कर्मभ्यो न निवर्तते चेत्, प्रागिव भेदप्रत्ययानुपमर्दनादेकत्वप्रत्ययविधायक वाक्यमप्रमाणीकृत स्यात्। अभक्ष्यभक्षणादिप्रतिषधवाक्याना प्रामाण्यवत् युक्तमेकत्ववाक्यस्यापि प्रामाण्यम्, सर्वोपनिषदा तत्परत्वात्। कर्मविधीनामप्रामाण्यप्रसङ्ग इति चेत्, न, अनुपमर्दितभेदप्रत्ययवत्पुरुषविषये प्रामाण्योपपत्ते स्वप्नादिप्रत्यय इव प्राक्प्रबोधात्। विवेकिनामकरणात् कर्मविधिप्रामाण्यो च्छद इति चेत्, न, काम्यविध्यनुच्छेददर्शनात्। न हि,

कामात्मता न प्रशस्तेत्येव विज्ञानवद्भि काम्यानि कर्माणि नानुष्ठीयन्त इति, काम्यकर्मविधय उच्छिद्यन्ते, अनुष्ठीयन्त एव कामिभिरिति, तथा ब्रह्मसस्थैब्रह्मविद्भिर्नानुष्ठीयन्ते कर्माणीति न तद्विधय उच्छिद्यन्ते, अब्रह्मविद्भिरनुष्ठीयन्त एवेति । परिव्राजकाना भिक्षाचरणादिवत् उत्पन्नैकत्वप्रत्ययानामपि गृहस्थादीनामग्निहोत्रादिकर्मानिवृत्तिरिति चेत्, न, प्रामाण्यचिन्ताया पुरुषप्रवृत्तेरदृष्टान्तत्वात्— न हि, नाभिचरेदिति प्रतिषिद्धमप्यभिचरण कश्चित्कुर्वन्दृष्ट इति, शास्त्रौ द्वेषरहितेनापि विवेकिना अभिचरण क्रियते । न च कर्मविधिप्रवृत्तिनिमित्ते भेदप्रत्यये बाधिते अग्निहोत्रादौ प्रवर्तक निमित्तमस्ति, परिव्राजकस्येव भिक्षाचरणादौ बुभुक्षादि प्रवर्तकम् । इहाप्यकरणे प्रत्यवायभय प्रवर्तकमिति चेत्, न, भेदप्रत्ययवतोऽधिकृतत्वात् । भेदप्रत्ययवान् अनुपमर्दितभेदबुद्धिर्विद्यया य, स कर्मण्यधिकृत इत्यवोचाम, यो हि अधिकृत कर्मणि, तस्य तदकरणे प्रत्यवाय, न निवृत्ताधिकारस्य, गृहस्थस्येव, ब्रह्मचारिणो विशेषधर्मानुष्ठाने । एव तर्हि सर्व स्वाश्रमस्थ उत्पन्नैकत्वप्रत्यय परिव्राडिति चेत्, न, स्वस्वामित्वभेदबुद्धयनिवृत्ते, कर्मार्थत्वाच्च इतराश्रमाणाम्— 'अथ कर्म कुर्वीय' इति श्रुते । तस्मात् स्वस्वा-

मित्वाभावात् भिक्षुरेक एव परिव्राट्, न गृहस्थादि । एकत्वप्रत्ययविधिजनितन प्रत्ययेन विधिनिमित्तभेदप्रत्ययस्योपमर्दितत्वात् यमनियमाद्यनुपपत्ति परिव्राजकस्येति चेत्, न, बुभुक्षादिना एकत्वप्रत्ययात्प्रच्यावितस्योपपत्ते, निवृत्त्यर्थत्वात् । न च प्रतिषिद्धसेवाप्राप्ति, एकत्वप्रत्ययात्पत्ते प्रागेव प्रतिषिद्धत्वात् । न हि रात्रौ कूपे कण्टके वा पतित उदितेऽपि सवितरि पतति तस्मिन्नेव । तस्मात् सिद्ध निवृत्तकर्मा भिक्षुक एव ब्रह्मसस्थ इति । यत्पुनरुक्त सर्वेषा ज्ञानवर्जिताना पुण्यलोकतेति—सत्यमेतत् । यच्चोक्त तप शब्देन परिव्राडप्युक्त इति—एतदसत् । कस्मात्? परिव्राजकस्यैव निवृत्तभेदप्रत्ययस्य ब्रह्मसस्थतासभवात् । स एव हि अवशेषित इत्यवाचाम । एकत्वविज्ञानवतोऽग्निहोत्रादिवत्तत्पोनिवृत्तेश्च । भेदबुद्धिमत एव हि तप कर्तव्यता स्यात् । एतेन कमन्छिद्रे ब्रह्मसस्थतासामर्थ्यम्, अप्रतिषेधश्च प्रत्युक्त । तथा ज्ञानवानेव निवृत्तकर्मा परिव्राडिति ज्ञानवैयर्थ्यं प्रत्युक्तम् । यत्पुनरुक्त यववराहादिशब्दवत्परिव्राजके न रूढो ब्रह्मसस्थशब्द इति, तत्परिहृतम्, तस्यैव ब्रह्मसस्थतासभवान्नान्यस्येति । यत्पुनरुक्त रूढशब्दा निमित्त नोपाददत इति, तन्न, गृहस्थतक्षपरिव्राजकादिशब्द-

दशनात्। गृहस्थितिपारिव्राज्यतक्षणादिनिमित्तोपादाना अपि, गृहस्थपरिव्राजकावाश्रमिविशेषे, विशिष्टजातिमति च तक्षेति, रूढा दृश्यन्त शब्दा । न यत्र यत्र निमित्तानि तत्र तत्र वर्तन्ते, प्रसिद्ध्यभावात्। तथा इहापि ब्रह्मसस्थशब्दो निवृत्तसर्वकर्मतत्साधनपरिव्राडेकविषयऽत्याश्रमिणि परमहंसारये वृत्त इह भवितुमर्हति, मुख्यामृतत्वफलश्रवणात्। अतश्चदमेवैक वेदोक्त पारिव्राज्यम्, न यज्ञोपवीतत्रिदण्डकमण्डल्वादिपरिग्रह इति, 'मुण्डोऽपरिग्रहोऽसङ्ग' इति च। श्रुति 'अत्याश्रमिभ्य परम पवित्रम्' इत्यादि च श्वेताश्वतरीये, 'निस्तुतिर्निर्नमस्कार' इत्यादिस्मृतभ्यश्च, 'तस्मात्कर्म न कुर्वान्त यतय पारदर्शिन । तस्मादलिङ्गा धर्मज्ञोऽव्यक्तलिङ्ग' इत्यादिस्मृतिभ्यश्च ॥

यत्तु सारये कर्मत्यागोऽभ्युपगम्यते, क्रियाकारकफलभेदबुद्धे सत्यत्वाभ्युपगमात्, तन्मृषा। यच्च बौद्धै शून्यताभ्युपगमात् अकर्तृत्वमभ्युपगम्यते, तदप्यसत्, तदभ्युपगन्तु सत्त्वाभ्युपगमात्। यच्च अक्षैरलसतया अकर्तृत्वाभ्युपगम, सोऽप्यसत्, कारकबुद्धेरनिवर्तितत्वात्प्रमाणेन। तस्मात् वेदान्तप्रमाणजनितैकत्वप्रत्ययवत एव कर्मनिवृत्तिलक्षण पारिव्राज्य ब्रह्मसस्थत्व चेति सिद्धम्। एतेन गृहस्थस्यैकत्वावि-

ज्ञाने सति पारिव्राज्यमर्थसिद्धम् ॥

ननु अग्न्युत्सादनदोषभाक्स्यात् परिव्रजन्— 'वीरहा वा एष देवाना योऽग्निमुद्वासयते' इति श्रुते , न, दैवोत्सादितत्वात्, उत्सन्न एव हि स एकत्वदर्शने जाते— 'अपागादग्नेरग्नित्वम्' इति श्रुते । अतो न दोषभाक् गृहस्थ परिव्रजन्निति ॥

यत्सस्थ अमृतत्वमेति, तन्निरूपणार्थमाह—

प्रजापतिर्लोकानभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रयी विद्या सम्प्रास्रवत्तामभ्यतपत्तस्या अभितप्ताया एतान्यक्षराणि सम्प्रास्रवन्त भूर्भुव स्वरिति ॥ २ ॥

प्रजापति विराट् कश्यपो वा, लोकान् उद्दिश्य तेषु सारजिघृक्षया अभ्यतपत् अभिताप कृतवान् ध्यान तप कृतवानित्यर्थ , तेभ्य अभितप्तेभ्य सारभूता त्रयी विद्या सम्प्रास्रवत् प्रजापतेर्मनसि प्रत्यभादित्यथ । तामभ्यतपत्— पूर्ववत् । तस्या अभितप्ताया एतान्यक्षराणि सम्प्रास्रवन्त भूर्भुव स्वरिति व्याहृतय ॥

तान्यभ्यतपत्तेभ्योऽभितप्तेभ्य ॐकार सप्रास्रवत्तद्यथा शङ्कुना सर्वाणि पर्णानि सतृण्णान्येवमोंकारेण सर्वा वाक्स तृण्णोंकार एवेदꣳ सर्वमोकार एवेदꣳ सर्वम् ॥ ३ ॥

इति त्रयोविंश खण्ड ॥

तानि अक्षराणि अभ्यतपत्, तेभ्य अभितप्तभ्य ॐकार सप्रास्रवत् । तत् ब्रह्म कीदृशमिति, आह— तद्यथा शङ्कुना पर्णनालेन सर्वाणि पर्णानि पत्रावयवजातानि सतृण्णानि निविद्धानि व्याप्तानीत्यर्थ । एवम् ओंकारेण ब्रह्मणा परमात्मन प्रतीकभूतेन सर्वा वाक् शब्दजात सतृण्णा—'अकारो वै सर्वा वाक्' इत्यादिश्रुते । परमात्मविकारश्च नामधेयमात्रम् इत्यत ओकार एवेदꣳ सर्वमिति । द्विरभ्यास आदरार्थ । लोकादिनिष्पादनकथनम ओकारस्तुत्यर्थमिति ॥

इति त्रयोविंशखण्डभाष्यम् ॥



चतुर्विंश. खण्ड. ॥

—*—

सामोपासनप्रसङ्गेन कर्मगुणभूतत्वान्निवर्त्य ओंकार पर मात्मप्रतीकत्वादमृतत्वहेतुत्वेन महीकृत्य प्रकृतस्यैव यज्ञस्य अङ्गभूतानि सामहोममन्त्रोत्थानान्युपदिदिक्षन्नाह—

ब्रह्मवादिनो वदन्ति यद्वसूना प्रात सवन५ रुद्राणा माध्यदिन५ सवनमादित्याना च विश्वेषा च देवानां तृतीयसवनम् ॥ १ ॥

ब्रह्मवादिनो वदन्ति, यत्प्रात सवन प्रसिद्ध तद्वसूनाम् । तैश्च प्रात सवनसबद्धोऽय लोको वशीकृत प्रात सवनेशानै । तथा रुद्रैर्माध्यदिनसवनेशानै अन्तरिक्षलोक । आदित्यैश्च विश्वैर्देवैश्च तृतीयसवनेशानैस्तृतीयो लोको वशीकृत । इति यजमानस्य लोकोऽन्य परिशिष्टो न विद्यते ॥

क तर्हि यजमानस्य लोक इति स यस्त न विद्यात्कथ कुर्यादथ विद्वान्कुर्यात् ॥

अत क तर्हि यजमानस्य लोक, यदर्थ यजते, न क चिल्लोकोऽस्तीत्यभिप्राय — 'लोकाय वै यजते यो यजते' इति श्रुते । लोकाभावे च स यो यजमान त लोकस्वीकरणोपाय सामहोममन्त्रोत्थानलक्षण न विद्यात् न विजानीयात्, सोऽज्ञ कथ कुर्यात् यज्ञम्, न कथचन तस्य कर्तृत्व मुपपद्यत इत्यर्थ । सामादिविज्ञानस्तुतिपरत्वात् न अविदुष कर्तृत्व कर्ममात्रविद प्रतिषिध्यते— स्तुतये च सामादिविज्ञानस्य, अविद्वत्कर्तृत्वप्रतिषेधाय च इति हि भिद्येत वाक्यम् । आद्ये च औषस्त्ये काण्डे अविदुषोऽपि कर्मास्तीति हेतुमवोचाम । अथ एतद्वक्ष्यमाण सामाद्युपाय विद्वान्कुर्यात् ॥

पुरा प्रातरनुवाकस्योपाकरणाज्जघनेन गार्हपत्यस्योदङ्मुख उपविश्य स वासव५ सामाभिगायति ॥ ३ ॥

किं तद्वेद्यमिति, आह— पुरा पूर्वं प्रातरनुवाकस्य शस्त्रस्य प्रारम्भात् जघनेन गार्हपत्यस्य पश्चात् उदङ्मुख सन् उपविश्य स वासव वसुदैवत्य साम अभिगायति ॥

लो३कद्वारमपावा३र्णू ३३ पश्येम त्वा वय५ रा ३३३३३ हु ३ म् आ ३३ ज्या ३

यो ३ आ ३२१११ इति ॥ ४ ॥

लोकद्वारम् अस्य पृथिवीलोकस्य प्राप्नय द्वारम् अपावृणु हे अग्ने तेन द्वारेण पश्येम त्वा त्वा राज्यायेति ॥

अथ जुहोति नमोऽग्नये पृथिवीक्षिते लोकक्षिते लोक मे यजमानाय विन्दैष वै यजमानस्य लोक एतास्मि ॥ ५ ॥

अथ अनन्तर जुहोति अनेन मन्त्रेण— नमोऽग्नये अग्नी भूता तुभ्य वय पृथिवीक्षिते पृथिवीनिवासाय लोकक्षिते लोकनिवासाय, पृथिवीलोकनिवासायेत्यर्थ , लोक म मह्य यजमानाय विन्द लभस्व, एष वै मम यजमानस्य लोक एता गन्ता अस्मि ॥

अत्र यजमान परस्तादायुष स्वाहा-पजहि परिघमित्युक्त्वोत्तिष्ठति तस्मै वसवः प्रात सवन५ सप्रयच्छन्ति ॥ ६ ॥

अत्र अस्मिँल्लोके यजमान अहम् आयुष परस्तात् ऊर्ध्व मृत सन् इत्यर्थ । स्वाहेति जुहोति । अपजहि अपनय परिघ लोकद्वारार्गलम्— इति एत मन्त्रम् उक्त्वा उत्तिष्ठति। एव-

मेतैर्वसुभ्य प्रात सवनसबद्धो लोको निष्क्रीत स्यात् । ततस्ते प्रात सवन वसवो यजमानाय सप्रयच्छन्ति ॥

पुरा माध्यदिनस्य सवनस्योपाकरणा-ज्जघनेनाग्नीध्रीयस्योदङ्मुख उपविश्य स रौद्र५ सामाभिगायति ॥ ७ ॥

लो३कद्वारमपावा३र्णू३३ पद्येम त्वा वय वैरा३३३३३ ह्रु३म् आ३३ज्या३यो३ आ३२१११इति ॥ ८ ॥

तथा आग्नीध्रीयस्य दक्षिणाग्र जघनेन उदङ्मुख उपविश्य स रौद्र साम अभिगायति यजमान रुद्रदैवत्य वैरा ज्याय ॥

अथ जुहोति नमो वायवेऽन्तरिक्षक्षिते लोकक्षिते लोक मे यजमानाय विन्दैष वै यजमानस्य लोक एतास्मि ॥ ९ ॥

अत्र यजमान. परस्तादायुषः स्वाहा पजहि परिघमित्युक्त्वोत्तिष्ठति तस्मै रुद्रा माध्यदिन५ सवन५ सप्रयच्छन्ति ॥

अन्तरिक्षक्षित इत्यादि समानम् ॥

पुरा तृतीयसवनस्योपाकरणाज्जघनेना-
ह्वनीयस्योदङ्मुख उपविश्य स आदि-
त्य५ स वैश्वदेव५ सामाभिगायति ॥ ११ ॥

लो३कद्वारमपावा३र्णू३३पश्येम त्वा व-
य५ स्वारा ३३३३३ हु३म् आ३३ ज्या३
यो ३ आ ३२१११ इति ॥ १२ ॥

आदित्यमथ वैश्वदेव लो३कद्वारमपा-
वा३र्णू३३ पश्येम त्वा वय५ साम्रा३३३३३
हु३म् आ३३ ज्या३यो३आ ३२१११ इति ॥

तथा आहवनीयस्योदङ्मुख उपविश्य स आदित्यदैव त्यम् आदित्य वैश्वदेव च साम अभिगायति क्रमेण स्वारा ज्याय साम्राज्याय ॥

अथ जुहोति नम आदित्येभ्यश्च विश्वे-
भ्यश्च देवेभ्यो दिविक्षिद्भ्यो लोकक्षिद्भ्यो
लोक मे यजमानाय विन्दत ॥ १४ ॥

एष वै यजमानस्य लोक एतास्मयत्र यजमानः परस्तादायुषः स्वाहापहत परिघमित्युक्त्वोत्तिष्ठति ॥ १५ ॥

दिविक्षिद्भ इत्येवमादि समानमन्यत् । विन्दत अपहत इति बहुवचनमात्र विशेष । याजमान त्वेतत्, एतास्मयत्र यजमान इत्यादिलिङ्गात् ॥

तस्मा आदित्याश्च विश्वे च देवास्तृतीयसवनꣳ सप्रयच्छन्त्येष ह वै यज्ञस्य मात्रा वेद य एव वेद य एव वेद ॥१६॥

इति चतुर्विंश. खण्ड ॥

एष ह वै यजमान एवंवित् यथोक्तस्य सामादेर्विद्वान् यज्ञस्य मात्रा यज्ञयाथात्म्य वेद यथोक्तम् । य एव वेदेति द्विरुक्तिरध्यायपरिसमाप्त्यर्था ॥

इति चतुर्विंशखण्डभाष्यम् ॥

इति श्रीमत्परमहसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवत कृतौ

छान्दोग्योपनिषद्भाष्ये द्वितीयोऽध्याय ॥

समाप्त ॥


छान्दोग्योपनिषद्भाष्यम्
तृतीयोऽध्याय

॥ तृतीयोऽध्यायः ॥



'असौ वा आदित्य' इत्यादि अध्यायारम्भे सबन्ध । अतीतानन्तराध्यायान्ते उक्तम् 'यज्ञस्य मात्रा वेद' इति । यज्ञविषयाणि च सामहोम मन्त्रोत्थानानि विशिष्टफलप्राप्तये यज्ञाङ्गभूता न्युपदिष्टानि । सर्वयज्ञाना च कार्यनिर्वृत्तिरूप सविता महत्या श्रिया दीप्यते । स एष सर्वप्राणिकर्मफल भूत प्रत्यक्ष सर्वैरुपजीव्यते । अतो यज्ञव्यपदेशानन्तर त त्कार्यभूतसवितृविषयमुपासन सर्वपुरुषार्थेभ्य श्रेष्ठतमफल वि धास्यामीत्येवमारभते श्रुति —

असौ वा आदित्यो देवमधु तस्य द्यौ-
रेव तिरश्चीनवꣳशोऽन्तरिक्षमपूपो मरी
चयः पुत्रा. ॥ १ ॥

असौ वा आदित्यो देवमध्वित्यादि । देवाना मोदनात् मध्विव मधु असौ आदित्य । वस्वादीना च मोदनहेतुत्व वक्ष्यति सर्वयज्ञफलरूपत्वादादित्यस्य । कथ मधुत्वमिति, आह—तस्य मधुन द्यौरेव भ्रामरस्येव मधुन तिरश्चीनव

श तिरश्चीनश्चासौ वंशश्चेति तिरश्चीनवंश । तिर्यग्गतेव हि द्यौर्लक्ष्यते । अन्तरिक्ष च मध्वपूप द्युवंश लग्न सन् लम्बत इव, अतो मध्वपूपसामान्यात् अन्तरिक्ष मध्वपूप, मधुन सवितुराश्रयत्वाच्च । मरीचय रश्मय रश्मिस्था आपो भौ मा सवित्राकृष्टा । 'एता वा आप स्वराजो यन्मरीचय' इति हि विज्ञायन्ते । ता अन्तरिक्षमध्वपूपस्थरश्म्यन्तर्गत त्वात् भ्रमरबीजभूता पुत्रा इव हिता लक्ष्यन्त इति पुत्रा इव पुत्रा, मध्वपूपनाड्यन्तगता हि भ्रमरपुत्रा ॥

तस्य ये प्राञ्चो रश्मयस्ता एवास्य प्राञ्चो मधुनाड्य । ऋच एव मधुकृत ऋग्वेद एव पुष्प ता अमृता आपस्ता वा एता ऋच ॥ २ ॥

तस्य सवितु मध्वाश्रयस्य मधुना य प्राञ्च प्राच्या दिशि गता रश्मय, ता एव अस्य प्राच्य प्रागञ्चनात् मधुनो नाड्य मधुनाड्य इव मध्वाधारच्छिद्राणीत्यर्थ । तत्र ऋच एव मधुकृत लोहितरूप सवित्राश्रय मधु कुर्वन्तीति मधुकृत भ्रमरा इव, यतो रसानादाय मधु कुर्वन्ति, तत्पु ष्पमिव पुष्पम् ऋग्वद एव । तत्र ऋग्ब्राह्मणसमुदायस्य

ऋग्वेदाख्यत्वात् शब्दमात्राच्च भोग्यरूपरसनिस्रावासभवात् ऋग्वेदशब्देन अत्र ऋग्वेदविहित कर्म, ततो हि कर्मफलभू तमधुरसनिस्रावसभवात् । मधुकरैरिव पुष्पस्थानीयाद्दग्वेद-विहितात्कर्मण अप आदाय ऋग्भिमधु निर्वर्त्यते । कास्ता आप इति, आह— ता कर्मणि प्रयुक्ता सोमाज्यपयोरूपा अग्नौ प्रक्षिप्ता तत्पाकाभिनिर्वृत्ता अमृता अमृतार्थत्वादत्य न्तरसवत्य आपो भवन्ति । तद्रसानादाय ता वा एता ऋच पुष्पेभ्यो रसमाददाना इव भ्रमरा ऋच ॥

एतमृग्वेदमभ्यतपꣳस्तस्याभितप्तस्य य-
शस्तेज इन्द्रिय वीर्यमन्नाद्यꣳ रसोऽजा
यत ॥ ३ ॥

एतम् ऋग्वेदम् ऋग्वेदविहित कर्म पुष्पस्थानीयम् अभ्य तपन् अभिताप कृतवत्य इव एता ऋच कर्मणि प्रयुक्ता । ऋग्भिर्हि मन्त्रै शस्त्राद्यङ्गभावमुपगतै क्रियमाण कर्म मधु-निर्वर्तक रस मुञ्चतीत्युपपद्यते, पुष्पाणीव भ्रमरैराचूष्यमा णानि । तदेतदाह— तस्य ऋग्वेदस्य अभितप्तस्य । कोऽसौ रस, य ऋङ्मधुकराभितापनि सृत इत्युच्यते? यश वि श्रुतत्व तेज देहगता दीप्ति इन्द्रिय सामर्थ्योपेतैरिन्द्रियैरवै कल्य वीर्य सामर्थ्य बलमित्यर्थ, अन्नाद्यम् अन्न च तदाद्य च

येनोपयुज्यमानेनाहन्यहनि देवाना स्थिति स्यात् तदन्नाद्यम् एष रस अजायत यागादिलक्षणात्कर्मण ॥

तद्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा ए तद्यदेतदादित्यस्य रोहित५ रूपम् ॥ ४ ॥

इति प्रथम खण्ड ॥

यश आद्यन्नाद्यपर्यन्त तत् व्यक्षरत् विशषेणाक्षरत् अगमत्। गत्वा च तदादित्यम् अभित पार्श्वत पूर्वभाग सवितु अश्रयत् आश्रितवदित्यर्थ । अमुष्मिन्नादित्ये सचित कर्मफलारय मधु भोक्ष्यामह इत्येव हि यशआदिलक्षणफलप्राप्तये कर्माणि क्रियन्ते मनुष्यै —केदारनिष्पादनमिव कषकै । तत्प्रत्यक्ष प्रदर्श्यते श्रद्धाहतो । तद्वा एतत्, किं तत्? यदेतत् आदित्यस्य उद्यतो दृश्यते रोहित रूपम ॥

इति प्रथमखण्डभाष्यम् ॥



द्वितीय खण्ड ॥

अथ येऽस्य दक्षिणा रश्मयस्ता एवा
स्य दक्षिणा मधुनाड्यो यजूꣳष्येव मधुकृ-
तो यजुर्वेद एव पुष्प ता अमृता आप ॥

अथ ये अस्य दक्षिणा रश्मय इत्यादि समानम् । यजूष्येव मधुकृत यजुर्वेदविहिते कर्मणि प्रयुक्तानि, पूर्ववन्मधुकृत इव । यजुर्वेदविहित कर्म पुष्पस्थानीय पुष्पमित्युच्यते । ता एव सोमाद्या अमृता आप ॥

तानि वा एतानि यजूꣳष्येत यजुर्वेद-
मभ्यतपꣳस्तस्याभितप्तस्य यशस्तेज इ
न्द्रिय वीर्यमन्नाद्यꣳ रसोऽजायत ॥ २ ॥

तद्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा ए
तद्यदेतदादित्यस्य शुक्लꣳ रूपम् ॥ ३ ॥

इति द्वितीयः खण्ड ॥

तानि वा एतानि यजूष्येत यजुर्वेदमभ्यतपन् इत्येवमादि सर्वं समानम् । मधु एतदादित्यस्य दृश्यते शुक्ल रूपम् ॥

इति द्वितीयखण्डभाष्यम् ॥

तृतीय खण्ड ॥

अथ येऽस्य प्रत्यञ्चो रश्मयस्ता एवास्य प्रतीच्यो मधुनाड्य. सामान्येव मधुकृत सामवेद एव पुष्प ता अमृता आप ॥

तानि वा एतानि सामान्येतꣳसामवेदमभ्यतपꣳस्तस्याभितप्तस्य यशस्तेज इन्द्रिय वीर्यमन्नाद्यꣳ रसोऽजायत ॥ २ ॥

तद्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य कृष्णꣳ रूपम् ॥ ३ ॥

इति तृतीय खण्ड ॥

अथ येऽस्य प्रत्यञ्चो रश्मय इत्यादि समानम् । तथा साम्ना मधु, एतदादित्यस्य कृष्ण रूपम् ॥

इति तृतीयखण्डभाष्यम् ॥

———*———

चतुर्थः खण्डः ॥

अथ येऽस्योदञ्चो रश्मयस्ता एवास्यो
दीच्यो मधुनाड्योऽथर्वाङ्गिरस एव मधुकृ
त इतिहासपुराण पुष्प ता अमृता आपः ॥

ते वा एतेऽथर्वाङ्गिरस एतदितिहास
पुराणमभ्यतपꣳस्तस्याभितप्तस्य यशस्ते
ज इन्द्रिय वीर्यमन्नाद्यꣳ रसोऽजायत ॥

तद्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा ए-
तद्यदेतदादित्यस्य पर कृष्णꣳ रूपम् ॥३॥

इति चतुर्थः खण्डः ॥

अथ येऽस्योदञ्चो रश्मय इत्यादि समानम्। अथर्वाङ्गिरस अथर्वणा अङ्गिरसा च दृष्टा मन्त्रा अथर्वाङ्गिरस, कर्मणि प्रयुक्ता मधुकृत। इतिहासपुराण पुष्पम्। तयोश्चेतिहासपुराणयोरश्वमेधे पारिप्लवासु रात्रिषु कर्माङ्गत्वेन विनियोग सिद्ध। मधु एतदादित्यस्य पर कृष्ण रूपम् अतिशयेन कृष्णमित्यर्थः ॥

इति चतुर्थखण्डभाष्यम् ॥

पञ्चम खण्ड ॥

अथ येऽस्योर्ध्वा रश्मयस्ता एवास्यो-
र्ध्वा मधुनाड्यो गुह्या एवादेशा मधुकृतो
ब्रह्मैव पुष्प ता अमृता आप' ॥ १ ॥

ते वा एते गुह्या आदेशा एतद्ब्रह्माभ्य
तप५स्तस्याभितप्तस्य यशस्तेज इन्द्रिय
वीर्यमन्नाद्य५ रसोऽजायत ॥ २ ॥

तद्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा ए
तद्यदेतदादित्यस्य मध्ये क्षोभत इव ॥ ३ ॥

अथ येऽस्योर्ध्वा रश्मय इत्यादि पूर्ववत् । गुह्या गोप्या रहस्या एव आदेशा लोकद्वारीयादिविधय उपासनानि च कर्माङ्गविषयाणि मधुकृत , ब्रह्मैव शब्दाधिकारात्प्रणवाख्य पुष्पम् । समानमन्यत् । मधु एतत् आदित्यस्य मध्ये क्षोभत इव समाहितदृष्टैर्दृश्यते सचलतीव ॥

ते वा एते रसाना५ रसा वेदा हि

रसास्तेषामेते रसास्तानि वा एतान्यमृतानाममृतानि वेदा ह्यमृतास्तेषामेतान्यमृतानि ॥ ४ ॥

इति पञ्चम खण्ड ॥

ते वा एत यथाक्ता रोहितादिरूपविशेषा रसाना रसा । केषा रसानामिति, आह— वेदा हि यस्माल्लोकनिष्यन्दत्वात्सारा इति रसा , तेषा रसाना कर्मभावमापन्नानामप्येते रोहितादिविशेषा रसा अत्यन्तसारभूता इत्यर्थ । तथा अमृताना ममृतानि वेदा ह्यमृता , नित्यत्वात् , तेषामेतानि रोहितादीनि रूपाण्यमृतानि । रसाना रसा इत्यादि कर्मस्तुतिरेषा—यस्यैवविशिष्टान्यमृतानि फलमिति ॥

इति पञ्चमखण्डभाष्यम् ॥



षष्ठ· खण्ड ॥

तद्यत्प्रथममभृत तद्रसव उपजीवन्त्य ग्निना मुखेन न वै देवा अश्नन्ति न पिब-न्त्येतदेवामृत दृष्ट्वा तृप्यन्ति ॥ १ ॥

तत् तत्र यत्प्रथममभृत रोहितरूपलक्षण तद्रसव प्रात सवनेशाना उपजीवन्ति अग्निना मुखेन अग्निना प्रधानभूतेन, अग्निप्रधाना सन्त उपजीवन्तीत्यर्थ । 'अन्नाद्य रसोऽजायत' इति वचनात् कवलग्राहमश्नन्तीति प्राप्तम्, तत्प्रतिषिध्यते— न वै देवा अश्नन्ति न पिबन्तीति । कथ तर्हि उपजीवन्तीति, उच्यते—एतदेव हि यथोक्तममृत रोहित रूप दृष्ट्वा उप-लभ्य सर्वकरणैरनुभूय तृप्यन्ति, दृश सर्वकरणद्वारोपल ब्ध्यर्थत्वात् । ननु रोहित रूप न दृष्टेत्युक्तम्, कथमन्येन्द्रिय विषयत्व रूपस्येति, न, यशआदीना श्रोत्रादिगम्यत्वात् । श्रोत्रग्राह्य यश । तेजोरूप चाक्षुषम् । इन्द्रिय विषयग्रह णकार्यानुमेय करणसामर्थ्यम् । वीर्य बल देहगत उत्साह प्राणवत्ता । अन्नाद्य प्रत्यहमुपजीव्यमान शरीरस्थितिकर यद्भवति । रसो ह्येवमात्मक सर्व । य दृष्ट्वा तृप्यन्ति सर्वे ।

देवा दृष्ट्वा तृप्यन्तीति एतत्सर्वं स्वकरणैरनुभूय तृप्यन्तीत्यर्थं । आदित्यसश्रया सन्तो वैगन्ध्यादिदेहकरणदोषरहिताश्च ॥

त एतदेव रूपमभिसविशन्त्येतस्माद्रूपादुद्यन्ति ॥ २ ॥

किं ते निरुद्यमा अमृतमुपजीवन्ति ? न, कथं तर्हि, एतदेव रूपम् अभिलक्ष्य अधुना भोगावसरो नास्माकमिति बुद्ध्वा अभिसविशन्ति उदासते । यदा वै तस्यामृतस्य भोगावसरो भवेत्, तदैतस्मादमृतादमृतभोगनिमित्तमित्यर्थः, एतस्माद्रूपात् उद्यन्ति उत्साहवन्तो भवन्तीत्यर्थः । न हि अनुत्साहवतामननुतिष्ठतामलसाना भोगप्राप्तिर्लोके दृष्टा ॥

स य एतदेवममृत वेद वसूनामेवैको भूत्वाग्निनैव मुखेनैतदेवामृत दृष्ट्वा तृप्यति स एतदेव रूपमभिसविशत्येतस्माद्रूपादुदेति ॥ ३ ॥

स य कश्चित् एतदेव यथादितम ऋङ्मधुकरतापरसस क्षरणम् ऋग्वेदविहितकर्मपुष्पात् तस्य च आदित्यसश्रयण रोहितरूपत्व च अमृतस्य प्राचीदिग्गतरश्मिनाडीसस्थता वसुदेवभोग्यता तद्विदश्च वसुभि सहैकता गत्वा अग्निना

मुखेनोपजीवन दर्शनमात्रेण तृप्तिं च स्वभोगावसरे उद्यमन तत्कालापाये च सवेशन वेद, सोऽपि वसुवत् सर्व तथैवानुभवति ॥

स यावदादित्य' पुरस्तादुदेता पश्चाद-स्तमेता वसूनामेव तावदाधिपत्य५ स्वाराज्य पर्येता ॥ ४ ॥

इति षष्ठ खण्ड ॥

कियन्त काल विद्वास्तदमृतमुपजीवतीति, उच्यते— स विद्वान् यावदादित्य पुरस्तात् प्राच्या दिशि उदेता पश्चात् प्रतीच्याम् अस्तमता, तावद्वसूना भोगकाल तावन्तमेव काल वसूनामाधिपत्य स्वाराज्य पर्येता परितो गन्ता भवतीत्यर्थ । न यथा चन्द्रमण्डलस्थ केवलकर्मा परतन्त्रो देवानामन्नभूत , किं तर्हि, अयम आधिपत्य स्वाराज्य स्वराड्भाव च अधि गच्छति ॥

इनि षष्ठखण्डभाष्यम् ॥



सप्तम खण्ड ॥

अथ यद्वितीयममृत तद्रुद्रा उपजीव न्तीन्द्रेण मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृत दृष्ट्वा तृप्यन्ति ॥ १ ॥

त एतदेव रूपमभिसविशन्त्येतस्माद्रू-पादुद्यान्ति ॥ २ ॥

स य एतदेवममृत वेद रुद्राणामेवैको भूत्वेन्द्रेणैव मुखेनैतदेवामृत दृष्ट्वा तृप्यति स एतदेव रूपमभिसविशत्येतस्माद्रूपा दुदेति ॥ ३ ॥

अथ यद्वितीयममृत तद्रुद्रा उपजीवन्तीत्यादि समानम् ॥

स यावदादित्य. पुरस्तादुदेता पश्चाद स्तमेता द्विस्तावदक्षिणत उदेतोत्तरतो ऽस्तमेता रुद्राणामेव तावदाधिपत्य८ स्वा राज्यं पर्येता ॥ ४ ॥

इति सप्तम खण्ड ॥

स यावदादित्य पुरस्तादुदेता पश्चादस्तमेता द्विस्तावत् ततो द्विगुण काल दक्षिणत उदेता उत्तरतोऽस्तमेता रुद्राणा तावद्भोगकाल ॥

इति सप्तमखण्डभाष्यम् ॥

अष्टम खण्ड ॥

अथ यत्तृतीयममृत तदादित्या उपजीवन्ति वरुणेन मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृत दृष्ट्वा तृप्यन्ति ॥ १ ॥

त एतदेव रूपमभिसविशन्त्येतस्माद्रू पादुद्यन्ति ॥ २ ॥

स य एतदेवममृत वेदादित्यानामेवैको भूत्वा वरुणेनैव मुखेनैतदेवामृत दृष्ट्वा तृप्यति स एतदेव रूपमभिसविशत्येतस्माद्रूपादुदेति ॥ ३ ॥

स यावदादित्यो दक्षिणत उदेतोत्तरतोऽस्तमेता द्विस्तावत्पश्चादुदेता पुरस्तादस्तमेतादित्यानामेव तावदाधिपत्य स्वाराज्य पर्येता ॥ ४ ॥

इति अष्टम खण्ड ॥

तथा पश्चात् उत्तरत ऊर्ध्वमुदेता विपययेण अस्तमेता । पूर्वस्मात्पूर्वस्माद्दिगुणोत्तरोत्तरेण कालेनेत्यपौराण दर्शनम् । सवितु चतुर्दिशमिन्द्रयमवरुणसोमपुरीषु उदयास्तमयकालस्य तुल्यत्व हि पौराणिकैरुक्तम्, मानसोत्तरस्य मूर्धनि मेरो

प्रदक्षिणावृत्तेस्तुल्यत्वादिति । अत्रोक्त परिहार आचार्यै । अमरावत्यादीना पुरीणा द्विगुणोत्तरोत्तरेण कालेनोद्भास स्यात् । उदयश्च नाम सवितु तन्निवासिना प्राणिना चक्षुर्गो चरापत्ति , तदत्ययश्च अस्तमनम् , न परमार्थत उदयास्तमने स्त । तन्निवासिना च प्राणिनामभावे तान्प्रति तेनैव मार्गेण गच्छन्नपि नैवोदेता नास्तमेतेति, चक्षुर्गोचरापत्तेस्तदत्ययस्य च अभावात्। तथा अमरावत्या सकाशाद्विगुण काल सयमनी पुरी वसति, अतस्तन्निवासिन प्राणिन प्रति दक्षिणत इव उदति उत्तरतोऽस्तमेति इत्युच्यतेऽस्मद्बुद्धिं च अपेक्ष्य । तथो त्तरास्वपि पुरीषु योजना । सर्वेषा च मेरुरुत्तरतो भवति । यदा अमरावत्या मध्याह्नगत सविता, तदा सयमन्यामुद्य न्दृश्यते, तत्र मध्याह्नगतो वारुण्यामुद्यन्दृश्यते, तथोत्तर स्याम्, प्रदक्षिणावृत्तेस्तुल्यत्वात् । इलावृतवासिना सर्वत पर्वतप्राकारनिवारितादित्यरश्मीना सविता ऊर्ध्व इव उदेता अर्वागस्तमेता दृश्यते, पर्वतोर्ध्वच्छिद्रप्रवेशात्सवितृप्रकाशस्य। तथा ऋगाद्यमृतोपजीविनाममृताना च द्विगुणोत्तरोत्तरवी र्यवत्त्वमनुमीयते भोगकालद्वैगुण्यलिङ्गेन । उद्यमनसवेश नादि देवाना रुद्रादीना विदुषश्च समानम् ॥

इति अष्टमखण्डभाष्यम् ॥

नवम खण्ड ॥

अथ यच्चतुर्थममृत तन्मरुत उपजीवन्ति सोमेन मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृत दृष्ट्वा तृप्यन्ति ॥ १ ॥

त एतदेव रूपमभिसविशन्त्येतस्माद्रूपादुद्यन्ति ॥ २ ॥

स य एतदेवममृत वेद मरुतामेवैको भूत्वा सोमेनैव मुखेनैतदेवामृत दृष्ट्वा तृप्यति स एतदेव रूपमभिसविशत्येतस्माद्रूपादुदेति ॥ ३ ॥

स यावदादित्यः पश्चादुदेता पुरस्तादस्तमेता द्विस्तावदुत्तरत उदेता दक्षिणतोऽस्तमेता मरुतामेव तावदाधिपत्यꣳ स्वाराज्य पर्येता ॥ ४ ॥

इति नवम खण्डः ॥

दशम खण्ड ॥

अथ यत्पञ्चममृत तत्साध्या उपजीवन्ति ब्रह्मणा मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृत दृष्ट्वा तृप्यन्ति ॥ १ ॥

त एतदेव रूपमभिसविशन्त्येतस्माद्रूपादुद्यन्ति ॥ २ ॥

स य एतदेवममृत वेद साध्यानामेवैको भूत्वा ब्रह्मणैव मुखेनैतदेवामृत दृष्ट्वा तृप्यति स एतदेव रूपमभिसविशत्येतस्माद्रूपादुदेति ॥ ३ ॥

स यावदादित्य उत्तरत उदेता दक्षिणतोऽस्तमेता द्विस्तावदूर्ध्व उदेतावागस्तमेता साध्यानामेव तावदाधिपत्यꣳ स्वाराज्य पर्येता ॥ ४ ॥

इति दशमः खण्ड ॥

एकादश खण्ड ॥

अथ तत ऊर्ध्व उदेत्य नैवोदेता नास्त मेतैकल एव मध्ये स्थाता तदेष श्लोक' ॥

कृत्वैवमुदयास्तमनेन प्राणिना स्वकर्मफलभोगनिमित्तमनु ग्रहम्, तत्कर्मफलभोगक्षये तानि प्राणिजातान्यात्मनि सहृत्य, अथ तत तस्मादनन्तर प्राण्यनुग्रहकालादूर्ध्व सन् आत्मन्यु-देत्य उद्गम्य यान्प्रत्युदेति तेषा प्राणनामभावात् स्वात्मस्थ नैवोदेता नास्तमेता एकल अद्वितीय अनवयव मध्ये स्वा त्मन्येव स्थाता। तत्र कश्चिद्विद्वान्वस्वादिसमानचरण रोहि ताद्यमृतभोगभागी यथोक्तक्रमेण स्वात्मान सवितारमात्मत्वे नोपेत्य समाहित सन् एत मन्त्र दृष्ट्वा उत्थित अन्यस्मै पृष्ट वते जगाद—यतस्त्वमागतो ब्रह्मलोकात् किं तत्राप्यहोरात्रा भ्या परिवर्तमान सविता प्राणिनामायु क्षपयति यथेहास्मा-कम्, इत्येव पृष्ट प्रत्याह—तत् तत्र यथा पृष्टे यथोक्ते च अर्थे एष श्लोको भवति तेनोक्तो योगिनेति श्रुतेर्वचनमिदम् ॥

न वै तत्र न निम्लोच नोदियाय कदाचन। देवास्तेनाह॰ सत्येन मा विरा-धिषि ब्रह्मणेति ॥ २ ॥

न वै तत्र यतोऽह ब्रह्मलोकादागत तस्मिन्न वै तत्र एतदस्ति यत्पृच्छासि। न हि तत्र निम्लोच अस्तमगमत्सविता न च

उदियाय उद्गत कुतश्चित् कदाचन कस्मिंश्चिदपि काले इति । उदयास्तमयवर्जित ब्रह्मलोक इत्यनुपपन्नम् इत्युक्त शपथ मिव प्रतिपेदे—हे देवा साक्षिणो यूय शृणुत, यथा मयाक्त सत्य वच तेन सत्येन अह ब्रह्मणा ब्रह्मस्वरूपेण मा विराधिषि मा विरुध्येयम्, अप्राप्तिर्ब्रह्मणो मम मा भूदित्यर्थ ॥

सत्य तेनोक्तमित्याह श्रुति —

न ह वा अस्मा उदेति न निम्लोचति सकृदिवा हैवास्मै भवति य एतामेव ब्रह्मोपनिषद् वेद ॥ ३ ॥

न ह वा अस्मै यथोक्तब्रह्मविदे न उदेति न निम्लोचति नास्तमेति, किं तु ब्रह्मविदेऽस्मै सकृदिवा हैव सदैव अहर्भवति, स्वयज्योतिष्ट्वात्, य एता यथोक्ता ब्रह्मोपनिषद वेद गुह्य वेद, एव तत्त्रेण वशादित्रय प्रत्यमृतसबन्ध च यच्च अन्यदवोचाम एव जानातीत्यथ । विद्वान् उदयास्तमयकालापरिच्छेद्य नित्यमज ब्रह्म भवतीत्यर्थ ॥

तद्धैतद्ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनु प्रजाभ्यस्तद्धैतदुद्दालकायारुणये ज्येष्ठाय पुत्राय पिता ब्रह्म प्रोवाच ॥

तद्धैतत् मधुज्ञान ब्रह्मा हिरण्यगर्भ विराजे प्रजापतये

उवाच, सोऽपि मनवे, मनुरिक्ष्वाकाद्याभ्य प्रजाभ्य प्रोवाचेति विद्या स्तौति—ब्रह्मादिविशिष्टक्रमागतेति। किं च, तद्वैतत् मधुज्ञानम् उद्दालकाय आरुणये पिता ब्रह्मविज्ञान ज्येष्ठाय पुत्राय प्रोवाच ॥

इद वाव तज्ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात्प्रणाय्याय वान्तेवासिने ॥

इद वाव तद्यथोक्तम् अन्योऽपि ज्येष्ठाय पुत्राय सर्वप्रियार्हाय ब्रह्म प्रब्रूयात्। प्रणाय्याय वा योग्याय अन्तेवासिने शिष्याय ॥

नान्यस्मै कस्मैचन यद्यप्यस्मा इमामद्भि. परिगृहीता धनस्य पूर्णा दद्यादेतदेव ततो भूय इत्येतदेव ततो भूय इति ॥६॥

नान्यस्मै कस्मैचन प्रब्रूयात्। तीर्थद्वयमनुज्ञातमनेकेषा प्रापणाना तीर्थानामाचार्यादीनाम्। कस्मात्पुनस्तीर्थसकोचन विद्याया कृतमिति, आह—यद्यपि अस्मै आचार्याय इमा कश्चित्पृथिवीम् अद्भि परिगृहीता समुद्रपरिवेष्टिता समस्तामपि दद्यात्, अस्या विद्याया निष्क्रयार्थम्, आचार्याय धनस्य पूर्णा सपन्ना भोगोपकरणै, नासावस्य निष्क्रय, यस्मात् ततोऽपि दानात् एतदेव यन्मधुविद्यादान भूय बहुतरफलमित्यर्थ। द्विरभ्यास आदरार्थ ॥

इति एकादशखण्डभाष्यम् ॥

द्वादशः खण्डः ॥

यत एवमतिशयफलैषा ब्रह्मविद्या, अतः सा प्रकारान्तरेणापि वक्तव्येति 'गायत्री वा' इत्याद्यारभ्यते । गायत्रीद्वारेण च उच्यते ब्रह्म, सर्वविशेषरहितस्य 'नेति नेति' इत्यादिविशेषप्रतिषेधगम्यस्य दुर्बोधत्वात् । सत्स्वनेकेषु च्छन्दःसु गायत्र्या एव ब्रह्मज्ञानद्वारतयोपादानं प्राधान्यात् । सोमाहरणात् इतरच्छन्दोक्षराहरणेन इतरच्छन्दोव्याप्त्या च सर्वसवनव्यापकत्वाच्च यज्ञे प्राधान्यं गायत्र्याः । गायत्रीसारत्वाच्च ब्राह्मणस्य मातरमिव, हित्वा गुरुतरां गायत्रीं ततोऽन्यद्गुरुतरं न प्रतिपद्यते यथोक्तं ब्रह्मापीति, तस्यामत्यन्तगौरवस्य प्रसिद्धत्वात् । अतो गायत्रीमुखेनैव ब्रह्मोच्यते—

गायत्री वा इदꣳ सर्वं भूतं यदिदं किञ्च वाग्वै गायत्री वाग्वा इदꣳ सर्वं भूतं गायति च त्रायते च ॥ १ ॥

गायत्री वा इत्यवधारणार्थो वै शब्दः । इदं सर्वं भूतं प्राणिजातं यत्किंच स्थावरं जङ्गमं वा तत्सर्वं गायत्र्येव ।

तस्याश्छन्दोमात्राया सर्वभूतत्वमनुपपन्नमिति गायत्रीकारण वाच शब्दरूपामापादयति गायत्री वाग्वै गायत्रीति । वाग्वा इद सर्व भूतम । यस्मात् वाक् शब्दरूपा सती सर्वं भूत गा यति शब्दयति— असौ गौ असावश्व इति च, त्रायते च रक्षति— अमुष्मान्मा भैषी कि ते भयमुत्थितम् इत्यादिना सर्वतो भयान्निवत्यमान वाचा त्रात स्यात् । यत् वाक् भत गायति च त्रायते च, गायन्येव तत् गायति च त्रायते च, वाच अनन्यत्वाद्गायन्या । गानात्राणाच्च गायत्र्या गायत्रीत्वम ॥

या वै सा गायत्रीय वाव सा येय पृथिव्यस्या५ हीद५ सर्व भूत प्रतिष्ठितमेतामेव नातिशीयते ॥ २ ॥

या वै सा एवलक्षणा सर्वभूतरूपा गायत्री, इय वाव सा यय पृथिवी । कथ पुनरिय पृथिवी गायत्रीति, उच्यते— सर्वभूतसबन्धात् । कथ सर्वभूतसबन्ध , अस्या पृथिव्या हि यस्मात् सर्वं स्थावर जङ्गम च भूत प्रतिष्ठितम् , एतामेव पृथिवीं नातिशीयते नातिवर्तत इत्येतत् । यथा गानत्राणाभ्या भूतसबन्धो गायन्या , एव भूतप्रतिष्ठानाद्भूतसबद्धा पृथिवी, अतो गायत्री पृथिवी ॥

या वै सा पृथिवीय वाव सा यदिदमस्मिन्पुरुषे शरीरमस्मिन्ह्रीमे प्राणा प्रतिष्ठिता एतदेव नातिशीयन्ते ॥ ३ ॥

या वै सा पृथिवी गायत्री इय वाव सा इदमेव । तत्किम्? यदिदमस्मिन्पुरुष कार्यकरणसघाते जीवति शरीरम्, पार्थिवत्वाच्छरीरस्य । कथ शरीरस्य गायत्रीत्वमिति, उच्यते—अस्मिन्हि इम प्राणा भूतशब्दवाच्या प्रतिष्ठिता, अत पृथिवीवद्भूतशब्दवाच्यप्राणप्रतिष्ठानात् शरीर गायत्री, एतदेव यस्माच्छरीर नातिशीयन्ते प्राणा ॥

यद्वै तत्पुरुषे शरीरमिद वाव तद्यदिदमस्मिन्नन्त. पुरुषे हृदयमस्मिन्ह्रीमे प्राणा प्रतिष्ठिता एतदेव नातिशीयन्ते ॥४॥

यद्वै तत्पुरुषे शरीर गायत्री इद वाव तत् । यदिदमस्मिन्नन्त मध्ये पुरुषे हृदय पुण्डरीकाख्यम् एतद्गायत्री । कथ मिति, आह—अस्मिन्हि इमे प्राणा प्रतिष्ठिता, अत शरीरवत् गायत्री हृदयम् । एतदेव च नातिशीयन्ते प्राणा । 'प्राणो ह पिता । प्राणो माता' 'अहिंसन्सर्वभूतानि' इति श्रुते भूतशब्दवाच्या प्राणा ॥

सैषा चतुष्पदा षड्विधा गायत्री तदे तदृचाभ्यनूक्तम् ॥ ५ ॥

सैषा चतुष्पदा षडक्षरपदा छन्दोरूपा सती भवति गायत्री षड्विधा—वाग्भूतपृथिवीशरीरहृदयप्राणरूपा सती षड्विधा भवति । वाक्प्राणयोरन्यार्थनिर्दिष्टयोरपि गायत्रीप्रकारत्वम्, अन्यथा षाड्विधसंख्यापूरणानुपपत्ते । तत् एतस्मिन्नर्थे एतत् गायत्र्याख्य ब्रह्म गायत्र्यनुगत गायत्रीमुखेनोक्तम् ऋचा अपि मन्त्रेणाभ्यनूक्त प्रकाशितम् ॥

तावानस्य महिमा ततो ज्यायाꣳश्च पूरुष । पादोऽस्य सर्वा भूतानि त्रिपाद स्यामृत दिवीति ॥ ६ ॥

तावान् अस्य गायत्र्याख्यस्य ब्रह्मण समस्तस्य महिमा विभूतिविस्तार, यावाश्चतुष्पात्षड्विधश्च ब्रह्मणो विकार पादो गायत्रीति व्याख्यात । अत तस्माद्विकारलक्षणाद्गायत्र्याख्याद्व्याचारम्भणमात्रात् ततो ज्यायान् महत्तरश्च परमार्थसत्यरूपोऽविकार पूरुष पुरुष सर्वपूरणात् पुरि शयनाच्च । तस्य अस्य पाद सर्वा सर्वाणि भूतानि तेजोबन्नादीनि सस्थावरजङ्गमानि, त्रिपात् त्रय पादा अस्य सोऽय

त्रिपात्, त्रिपादमृत पुरुषाख्य समस्तस्य गायत्र्यात्मनो दिवि द्योतनवति स्वात्मन्यवस्थितमित्यर्थ इति ॥

यद्वै तद्ब्रह्मेतीद् वाव तद्योय बहिर्धा पुरुषादाकाशो यो वै स बहिर्धा पुरुषादा काशः ॥ ७ ॥

यद्वै तत् त्रिपादमृत गायत्रीमुखेनोक्त ब्रह्मेति, इद वाव तत् इदमेव तत्, योऽय प्रसिद्ध बहिर्धा बहि पुरुषादाकाश भौतिको यो वै, स बहिर्धा पुरुषादाकाश उक्त ॥

अय वाव स योऽयमन्त. पुरुष आका शो यो वै सोऽन्तः पुरुष आकाशः ॥ ८ ॥

अय वाव स, योऽयमन्त पुरुष शरीरे आकाश । यो वै सोऽन्त पुरुष आकाश ॥

अय वाव स योऽयमन्तर्हृदय आका शस्तदेतत्पूर्णमप्रवर्ति पूर्णामप्रवर्तिनी श्रिय लभते य एव वेद ॥ ९ ॥

इति द्वादशः खण्ड. ॥

अय वाव स , योऽयमन्तर्हृदये हृदयपुण्डरीके आकाश । कथमेकस्य सत आकाशस्य त्रिधा भेद इति, उच्यते—बाह्येन्द्रियविषये जागरितस्थाने नभसि दु खबाहुल्य दृश्यते । ततोऽन्त शरीरे स्वप्नस्थानभूते मन्दतर दु ख भवति । स्व प्रान्पश्यतो हृदयस्थे पुनर्नभसि न कचन काम कामयते न कचन स्वप्न पश्यति । अत सर्वदु खनिवृत्तिरूपमाकाश सु षुप्तस्थानम । अतो युक्तमेकस्यापि त्रिधा भेदान्वारयानम् । बहिर्धा पुरुषादारभ्य आकाशस्य हृदये सकोचकरण चत - समाधानस्थानस्तुतये—यथा 'त्रयाणामपि लोकाना कुरुक्षेत्र विशिष्यते । अर्धतस्तु कुरुक्षेत्रमधतस्तु पृथूदकम्' इति, तद्वत् । तदेतद्धार्दाकाशारय ब्रह्म पूर्ण सर्वगतम्, न हृदय मात्रपरिच्छिन्नमिति मन्तव्यम्, यद्यपि हृदयाकाशे चेत समाधीयते । अप्रवर्ति न कुतश्चित्कचित्प्रवर्तितु शीलमस्येत्य- प्रवर्ति, तदनुच्छित्तिधर्मकम् । यथा अन्यानि भूतानि परि- च्छिन्नान्युच्छित्तिधमकाणि, न तथा हार्द नभ । पूर्णामप्रवर्ति नीमनुच्छेदात्मिका श्रिय विभूतिं गुणफल लभते द्रष्टम्। य एव यथोक्त पूर्णाप्रवर्तिगुण ब्रह्म वेद जानाति इहैव जीवन् तद्भाव प्रतिपद्यत इत्यर्थ ॥

इति द्वादशखण्डभाष्यम् ॥

त्रयोदश. खण्ड ॥

तस्य ह वा एतस्य हृदयस्य पञ्च देव-सुषय स योऽस्य प्राङ्सुषि स प्राणस्तच्चक्षु. म आदित्यस्तदेतत्तेजोऽन्नाद्यमित्युपासीत तेजस्व्यन्नादो भवति य एव वेद ॥

तस्य ह वा इत्यादिना गायत्र्याख्यस्य ब्रह्मण उपासनाङ्गत्वेन द्वारपालादिगुणविधानार्थमारभ्यते । यथा लोके द्वारपाला राज्ञ उपासनेन वशीकृता राजप्राप्त्यर्था भवन्ति, तथेहापीति । तस्य इति प्रकृतस्य हृदयस्येत्यर्थ । एतस्य अनन्तरनिर्दिष्टस्य पञ्च पञ्चसख्याका देवाना सुषय देव सुषय स्वर्गलोकप्राप्तिद्वारन्छिद्राणि, देवै प्राणादित्यादिभि रक्ष्यमाणानि इत्यतो देवसुषय , तस्य स्वर्गलोकभवनस्य हृदयस्य अस्य य प्राङ्सुषि पूर्वाभिमुखस्य प्राग्गत यन्छिद्र द्वार स प्राण , तत्स्थ तेन द्वारेण य सचरति वायुविशष स प्रागनितीति प्राण । तेनैव सबद्धमव्यतिरिक्त तच्चक्षु , तथैव स आदित्य 'आदित्यो ह वै बाह्यप्राण ' इति श्रुते चक्षूरूपप्रतिष्ठाक्रमेण हृदि स्थित , 'स आदित्य कस्मि-

न्प्रतिष्ठित इति चक्षुषि' इत्यादि हि वाजसनेयके। प्राण-वायुदेवतैव हि एका चक्षुरादित्यश्च सहाश्रयेण। वक्ष्यति च—प्राणाय स्वाहेति हुत हवि सर्वमेतत्तर्पयतीति। तदेतत् प्राणस्य स्वर्गलोकद्वारपालत्वात् ब्रह्म। स्वर्गलोक प्रतिपित्सु तेजस्वी एतत् चक्षुरादित्यस्वरूपेण अन्नाद्यत्वाच्च सवितु तेज अन्नाद्यम् इत्याभ्या गुणाभ्याम् उपासीत। तत तेजस्व्यन्नादश्च आमयावित्वरहितो भवति, य एव वेद तस्यै तद्गुणफलम्। उपासनेन वशीकृतो द्वारप स्वर्गलोकप्राप्तिहेतु र्भवतीति मुख्य च फलम्॥

अथ योऽस्य दक्षिणः सुषिः स व्यान स्तच्छ्रोत्रꣳस चन्द्रमास्तदेतच्छ्रीश्च यश श्चेत्युपासीत श्रीमान्यशस्वी भवति य एव वेद॥ २॥

अथ योऽस्य दक्षिण सुषि तत्स्थो वायुविशेष स वीर्यवत्कर्म कुर्वन् विगृह्य वा प्राणापानौ नाना वा अनितीति व्यान। तत्सबद्धमेव च तच्छ्रोत्रमिन्द्रियम्। तथा स चन्द्रमा —श्रोत्रेण सृष्टा दिशश्च चन्द्रमाश्च इति श्रुते। सहाश्रयौ पूर्ववत्, तदेतत् श्रीश्च विभूति श्रोत्रचन्द्रमसोर्ज्ञानान्नहे-

तुत्वम्, अतस्ताभ्या श्रीत्वम् । ज्ञानान्नवतश्च यश ख्या तिर्भवतीति यशोहतुत्वात् यशस्त्वम् । अतस्ताभ्या गुणाभ्या-मुपासीतेत्यादि समानम् ॥ २ ॥

अथ योऽस्य प्रत्यङ्सुषि सोऽपान' सा वाक्सोऽग्निस्तदेतद्ब्रह्मवर्चसमन्नाद्य-मित्युपासीत ब्रह्मवर्चस्यन्नादो भवति य एव वेद ॥ ३ ॥

अथ योऽस्य प्रत्यङ्सुषि पाश्चम तत्स्थो वायुविशेष स मूत्रपुरीषाद्यपनयन् अधोऽनितीत्यपान । सा तथा वाक्, तत्सबन्धात्, तथा अग्नि , तदेतद्ब्रह्मवर्चस वृत्तस्वाध्यायनि-मित्त तेज ब्रह्मवर्चसम, अग्निसब-धाद्वृत्तस्वाध्यायस्य । अन्नग्रसनहेतुत्वात् अपानस्य अन्नाद्यत्वम । समानमन्यत् ॥

अथ योऽस्योदङ्सुषि स समानस्त न्मन स पर्जन्यस्तदेतत्कीर्तिश्च व्युष्टि श्चेत्युपासीत कीर्तिमान्व्युष्टिमान्भवति य एव वेद ॥ ४ ॥

अथ योऽस्योदङ् सुषि उदग्गत सुषि तत्स्थो वायु-

विशेष साऽशितपीते सम नयतीति समान । तत्सबद्ध मनोऽन्त करणम्, स पर्जन्या वृष्ट्यात्मको देव पर्जन्यनिमित्ताश्च आप इात, 'मनसा सृष्टा आपश्च वरुणश्च' इति श्रुते । तदेतत्कीर्तिश्च, मनसा ज्ञानस्य कीर्तिहेतुत्वात् । आत्मपरोक्ष विश्रुतत्व कीर्तियश । स्वकरणसवद्य विश्रुतत्व व्युष्टि कान्तिर्देहगत लावण्यम् । ततश्च कीर्तिसभवात्कीर्तिश्चेति । समानमन्यत् ॥

अथ योऽस्योर्ध्व सुषि स उदान' स वायुः स आकाशस्तदेतदोजश्च महश्चेत्युपासीतौजस्वी महस्वान्भवति य एव वेद ॥ ५ ॥

अथ योऽस्योर्ध्व सुषि स उदान आ पादतलादारभ्योर्ध्वमुत्क्रमणात् उत्कर्षार्थ च कम कुवन् अनितीत्युदान । स वायु तदाधारश्च आकाश । तदेतत् वाय्वाकाशयोरोजोहेतुत्वादोज बल महत्वाच्च मह इति । समानमन्यत् ॥

ते वा एते पञ्च ब्रह्मपुरुषा स्वर्गस्य लोकस्य द्वारपाः स य एतानेव पञ्च ब्रह्मपुरुषान्स्वर्गस्य लोकस्य द्वारपान्वेदा

स्य कुले वीरो जायते प्रतिपद्यते स्वर्गं लोकं य एतानेव पञ्च ब्रह्मपुरुषान्स्वर्गस्य लोकस्य द्वारपान्वेद ॥ ६ ॥

ते वा एते यथोक्ता पञ्चसुषिसबन्धात् पञ्च ब्रह्मणो हार्दस्य पुरुषा राजपुरुषा इव द्वारस्था स्वर्गस्य हार्दस्य लोकस्य द्वारपा द्वारपाला । एतैर्हि चक्षु श्रोत्रवाङ्मन-प्राणैर्बहिर्मुखप्रवृत्तैर्ब्रह्मणो हार्दस्य प्राप्तिद्वाराणि निरुद्धानि । प्रत्यक्ष हि एतदजितकरणतया बाह्यविषयासङ्गानृतप्ररूढत्वात् न हार्दे ब्रह्मणि मनस्तिष्ठति । तस्मात्सत्यमुक्तमेते पञ्च ब्रह्मपुरुषा स्वर्गस्य लोकस्य द्वारपा इति । अत स य एतानेव यथोक्तगुणविशिष्टान् स्वर्गस्य लोकस्य द्वारपान् वेद उपास्ते उपासनया वशीकरोति, स राजद्वारपालानिवोपासनेन वशीकृत्य तैरनिवारित प्रतिपद्यते स्वर्ग लोक राजानमिव हार्द ब्रह्म । किं च अस्य विदुष कुले वीर पुत्रो जायते वीरपुरुषसेवनात् । तस्य च ऋणापाकरणेन ब्रह्मोपासनप्रवृत्तिहेतुत्वम् । ततश्च स्वर्गलोकप्रतिपत्तये पारम्पर्येण भवतीति स्वर्गलोकप्रतिपत्तिरेवैक फलम् ॥

अथ यदतः परो दिवो ज्योतिर्दीप्यते

विश्वत॑ पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विद वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योति॑ ॥ ७ ॥

अथ यत् असौ विद्वान् स्वर्ग लोक वीरपुरुषसेवनात्प्रतिपद्यते, यच्चोक्त त्रिपादस्यामृत दिवीति, तदिद लिङ्गेन चक्षुश्रोत्रेन्द्रियगोचरमापादयितव्यम्, यथा अग्न्यादि धूमादि लिङ्गेन। तथा हि एतमेवेदमिति यथोक्ते अर्थे दृढा प्रतीति स्यात्— अनन्यत्वेन च निश्चय इति। अत आह— यदत अमुष्मात् दिव द्युलोकात्, पर परमिति लिङ्गव्यत्ययेन, ज्योतिर्दीप्यते, स्वयप्रभ सदाप्रकाशत्वाद्दीप्यत इव दीप्यत इत्युच्यते, अग्न्यादिवज्ज्वलनलक्षणाया दीप्तेरसभवात्। विश्वत प्रष्ठेष्विव्येतस्य व्याख्यान सर्वत पृष्ठेष्विति, ससारादुपरीत्यर्थ, ससार एव हि सर्व, असंसारिण एकत्वान्निर्भेदत्वाच्च। अनुत्तमेषु, तत्पुरुषसमासाशङ्कानिवृत्तये आह उत्तमेषु लोकेष्विति, सत्यलोकादिषु हिरण्यगर्भादिकार्यरूपस्य परस्येश्वरस्य आसन्नत्वादुच्यते उत्तमेषु लोकेष्विति। इद वाव इदमेव तत् यदिदमस्मिन्पुरुषे अन्त मध्ये ज्योति चक्षुश्रोत्रग्राह्येण लिङ्गेनोष्णिम्ना शब्देन च अवगम्यते। यत् त्वचा

स्पर्शरूपेण गृह्यते तच्चक्षुषैव, दृढप्रतीतिकरत्वात्त्वच, अविनाभूतत्वाच्च रूपस्पर्शयो ॥

तस्यैषा दृष्टिर्यत्रैतदस्मिञ्छरीरे सꣳस्पर्शेनोष्णिमान विजानाति तस्यैषा श्रुतिर्यत्रैतत्कर्णावपिगृह्य निनदमिव नदथुरिवाग्नेरिव ज्वलत उपशृणोति तदेतदृष्ट च श्रुत चेत्युपासीत चक्षुष्य श्रुतो भवति य एव वेद य एवं वेद ॥ ८ ॥

इति त्रयोदशः खण्ड ॥

कथ पुन तस्य ज्योतिष लिङ्ग त्वग्दृष्टिगोचरत्वमापद्यत इति, आह— यत्र यस्मिन्काले, एतदिति क्रियाविशेषणम, अस्मिञ्शरीरे हस्तेन आलभ्य सस्पर्शेन उष्णिमान रूपसहभाविनमुष्णस्पर्शभाव विजानाति, स हि उष्णिमा नामरूपव्याकरणाय देहमनुप्रविष्टस्य चैतन्यात्मज्योतिष लिङ्गम्, अव्यभिचारात् । न हि जीवन्तमात्मानमुष्णिमा व्यभिचरति । उष्ण एव जीविष्यन् शीतो मरिष्यन् इति हि विज्ञायते । मरणकाले च तेज परस्या देवतायामिति परेणाविभाग-

त्वोपगमात् । अत असाधारण लिङ्गमौष्ण्यमग्नेरिव धूम । अ
तस्तस्य परस्यैषा दृष्टि साक्षादिव दर्शन दर्शनोपाय इत्यर्थ ।
तथा तस्य ज्योतिष एषा श्रुति श्रवण श्रवणोपायोऽप्युच्य
मान । यत्र यदा पुरुष ज्यातिषो लिङ्ग शुश्रूषति श्रोतुमि
च्छति, तदा एतत् कर्णावपिगृह्य, एतच्छब्द क्रियाविशेषणम्,
अपिगृह्य अपिधायेत्यर्थ, अङ्गुलिभ्या प्रोर्णुत्य निनदमिव
रथस्येव घोषो निनद तमिव शृणोति, नदथुरिव ऋषभकूजित
मिव शब्द, यथा च अग्नेर्बहिर्ज्वलत एव शब्दमन्त शरीरे
उपशृणोति, तदेतत् ज्योति दृष्टश्रुतलिङ्गत्वात् दृष्ट च श्रुत च
इत्युपासीत । तथोपासनात् चक्षुष्य दर्शनीय श्रुत विश्रु
तश्च । यत स्पर्शगुणोपासननिमित्त फल तत् रूपे सपादयति
चक्षुष्य इति, रूपस्पर्शयो सहभावित्वात्, इष्टत्वाच्च दर्शनी
यताया । एव च विद्याया फलमुपपन्न स्यात्, न तु मृदुत्वा-
दिस्पर्शवत्त्वे । य एव यथोक्तौ गुणौ वेद । स्वर्गलोकप्रतिप-
त्तिस्तु उक्तमदृष्ट फलम । द्विरभ्यास आदरार्थ ॥

इति त्रयोदशखण्डभाष्यम् ॥



चतुर्दश खण्ड. ॥

पुनस्तस्यैव त्रिपादमृतस्य ब्रह्मणोऽनन्तगुणवतोऽनन्तशक्तेरनेकभेदोपास्यस्य विशिष्टगुणशक्तिमत्त्वेनोपासन विधित्सन् आह—

सर्व खल्विद ब्रह्म तज्जलानिति शान्त उपासीत। अथ खलु क्रतुमय पुरुषो यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेत प्रेत्य भवति स क्रतु कुर्वीत ॥ १ ॥

सर्व समस्तम्, खल्विति वाक्यालकारार्थो निपात। इद जगत् नामरूपविकृत प्रत्यक्षादिविषय ब्रह्म कारणम्, वृद्धतमत्वात् ब्रह्म। कथ सर्वस्य ब्रह्मत्वमित्यत आह— तज्जलानिति, तस्माद्ब्रह्मणो जात तजोबन्नादिक्रमण सर्वम्, अत तज्जम्, तथा तेनैव जननक्रमेण प्रतिलोमतया तस्मिन्नव ब्रह्मणि लीयत तदात्मतया श्लिष्यत इति तल्लम्, तथा तस्मिन्नव स्थितिकाल, अनिति प्राणिति चेष्टत इति। एव ब्रह्मात्मतया त्रिषु कालेष्वविशिष्टम्, तव्यतिरेकेणाग्रहणात्। अत तदेवेद जगत्। यथा च इद तदेवैकमद्वितीय तथा षष्ठे विस्तरेण वक्ष्याम। यस्माच्च सर्वमिद ब्रह्म, अत शान्त रागद्वेषादिदोषरहित सयत सन्, यत् तत्सर्व ब्रह्म तत् वक्ष्यमाणैर्गुणैरुपासीत। कथमुपासीत? क्रतु कुर्वीत—क्रतु निश्चयोऽध्यवसाय

एवमव नान्यथेत्यनिचल प्रत्यय , त क्रतु कुर्वीत उपासीत इत्यनेन व्यवहितन सबन्ध । कि पुन क्रतुकरणेन कर्तव्य प्रयाजनम् ? कथ वा क्रतु कतव्य ? क्रतुकरण च अभि प्रेतार्थसिद्धिसाधन कथम् ? इत्यस्यार्थस्य प्रतिपादनार्थम् अथे त्यादिग्रन्थ । अथ शब्दोऽत्र हेत्वर्थ । यस्मात्क्रतुमय क्रतुप्रायोऽध्यवसायात्मक पुरुष जीव , यथाक्रतु यादृश क्रतु अस्य सोऽय यथाक्रतु यथाध्यवसाय यादृङ्निश्च य अस्मिँल्लोके जीवन् इह पुरुषो भवति तथा इत अस्मा देहात् प्रेत्य मृत्वा भवति , क्रत्वनुरूपफलात्मको भवती-त्यर्थ । एव हि एतच्छास्त्रतो दृष्टम्—'य य वापि स्मर न्भाव त्यजत्यन्ते कलेवरम्' इत्यादि । यत एव व्यवस्था शास्त्रदृष्टा, अत स एव जानन क्रतु कुर्वीत , यादृश क्रतु वक्ष्याम तम । यत एव शास्त्रप्रामाण्यादुपपद्यते क्रत्वनुरूप फलम् , अत स एव कर्तव्य क्रतु ॥

मनोमयः प्राणशरीरो भारूप सत्य सकल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवा क्यनादरः ॥ २ ॥

कथम् ? मनोमय मन प्राय , मनुतेऽनेनति मन तत्

स्ववृत्त्या विषयेषु प्रवृत्त भवति, तन मनसा तन्मय , तथा प्रवृत्त इव तत्प्रायो निवृत्त इव च । अत एव प्राणशरीर प्राणो लिङ्गात्मा विज्ञानक्रियाशक्तिद्वयसमूछित , 'यो वै प्राण सा प्रज्ञा या वा प्रज्ञा स प्राण' इति श्रुत । स शरीर यस्य, स प्राणशरीर , 'मनोमय प्राणशरीर-नेता' इति च श्रुत्यन्तरात् । भारूप भा दीप्ति चैतन्य-लक्षण रूप यस्य स भारूप । सत्यसकल्प सत्या अवितथा सकल्पा यस्य, सोऽय सत्यसकल्प , न यथा ससारिण इवानैकान्तिकफल सकल्प ईश्वरस्येत्यर्थ । स सारिण अनृतन मिथ्याफलत्वहतुना प्रत्यूढत्वात् सकल्पस्य मिथ्याफलत्व वक्ष्यति—'अनृतेन हि प्रत्यूढा ' इति । आका शात्मा आकाश इव आत्मा स्वरूप यस्य स आकाशात्मा । सर्वगतत्व सूक्ष्मत्व रूपादिहीनत्व च आकाशतुल्यता इश्व रस्य । सवकमा सर्व विश्व तेनश्वरेण क्रियत इति जगत्सर्व कर्म यस्य स सर्वकर्मा, 'स हि सर्वस्य कर्ता' इति श्रुते । सर्वकाम सर्वे कामा दोषरहिता अस्येति सर्वकाम , 'धमा विरुद्धो भूतेषु कामोऽस्मि' इति स्मृत । ननु कामोऽस्मीति वचनात् इह बहुव्रीहिर्न सभवति सर्वकाम इति । न, काम स्य कर्तव्यत्वात् शब्दादिवत्पारार्थ्यप्रसङ्गाच्च दवस्य । तस्मात्

यथेह सर्वकाम इति बहुव्रीहि , तथा कामोऽस्मीति स्मृत्यर्थो वान्य । सवगन्ध सर्वे गन्धा सुखकरा अस्य सोऽय सवगन्ध , 'पुण्यो गन्ध प्रथिव्याम्' इति स्मृते । तथा रसा अपि विज्ञया , अपुण्यगन्धरसग्रहणस्य पाप्मसबन्धनिमित्त-त्वश्रवणात् , 'तस्मात्तेनोभय जिघ्रति सुरभि च दुगन्धि च। पाप्मना ह्येष विद्ध ' इति श्रुते । न च पाप्मससर्ग इश्व-रस्य, अविद्यादिदोषस्यानुपपत्त । सवमिद जगत् अभ्यात्त अभिव्याप्त । अततव्याप्त्यर्थस्य कर्तरि निष्ठा । तथा अवा-की— उच्यत अनयति वाक् वागेव वाक , यद्वा वचेर्घञन्त-स्य करणे वाक , स यस्य विद्यते स वाकी, न वाकी अ वाकी । वाक्प्रतिषेधश्च अत्र उपलक्षणाथ । गन्धरसादि-श्रवणात् इश्वरस्य प्राप्तानि घ्राणादीनि करणानि गन्धादि ग्रहणाय, अत वाक्प्रतिषेधेन प्रतिषिध्यन्ते तानि, 'अपा-णिपादो जवनो ग्रहीता पश्यत्यचक्षु स शृणोत्यकर्ण' इत्यादिमन्त्रवर्णात् । अनादर असभ्रम , अप्राप्तप्राप्तौ हि सभ्रम स्यादनाप्तकामस्य । न तु आप्तकामत्वात् नित्यतृप्तस्ये-श्वरस्य सभ्रमोऽस्ति कचित् ॥

एष म आत्मान्तर्हृदयेऽणीयान्व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा श्यामाक तण्डुलाद्वैष म आत्मान्तर्हृदये ज्याया-

न्पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान्दि वो ज्यायानेभ्यो लोकेभ्य ॥ ३ ॥

एष यथोक्तगुण मे मम आत्मा अन्तहृदये हृदयपुण्ड-रीकस्यान्त मध्ये अणीयान अणुतर , व्रीहेर्वा यवाद्वा इत्यादि अत्यन्तसूक्ष्मत्वप्रदर्शनार्थम् । श्यामाकाद्वा श्यामाकतण्डुलाद्वा इति परिच्छिन्नपरिमाणात् अणीयानित्युक्तेऽणुपरिमाणत्व प्राप्तमाशङ्क्य, अत तत्प्रतिषेधायारभत—एष म आत्मा न्तहृदय ज्यायान्पृथिव्या इत्यादिना । ज्याय परिमाणाच्च ज्यायस्त्व दर्शयन् अन तपरिमाणत्व दर्शयति—मनोमय इत्यादिना ज्यायानेभ्यो लोकेभ्य इत्यन्तेन ॥

सर्वकर्मा सर्वकाम सर्वगन्ध सर्व रस' सर्वमिदमभ्यात्तोऽवाक्यनादर एष म आत्मान्तर्हृदय एतद्ब्रह्मैतमितः प्रेत्या-भिसभवितास्मीति यस्य स्याद्श्रद्धा न विचिकित्सास्तीति ह स्माह शाण्डिल्य' शाण्डिल्य ॥ ४ ॥

यथोक्तगुणलक्षण ईश्वर ध्येय , न तु तद्गुणविशिष्ट एव—यथा राजपुरुषमानय चित्रगु वा इत्युक्ते न विशष-

णस्याप्यानयने व्याप्रियते तद्वदिहापि प्राप्तम, अतस्तन्नि वृत्त्यर्थ सवकर्मेत्यादि पुनर्वचनम । तस्मात् मनोमयत्वादिगु णविशिष्ट एवेश्वरो ध्यय । अत एव षष्ठसप्तमयोरिव 'त त्त्वमसि' 'आत्मैवेद सर्वम' इति नेह स्वाराज्येऽभिषि च्यति, एष म आत्मा एतद्ब्रह्मैतमित प्रेत्याभिसभवितास्मि इति लिङ्गात, न तु आत्मशब्देन प्रत्यगात्मैव उच्यते, ममेति षष्ठ्या सब धाथप्रत्यायकत्वात, एतमभिसभवितास्मीति च कर्मकतृत्वनिर्देशात् । ननु षष्ठेऽपि 'अथ सपत्स्ये' इति सत्सपत्ते कालान्तारतत्व दर्शयति । न, आरब्धसस्कारशे- षस्थित्यर्थपरत्वात, न कालान्तरितार्थता, अन्यथा तत्त्व मसीत्येतस्याथस्य बाधप्रसङ्गात् । यद्यपि आत्मशब्दस्य प्र त्यगर्थत्व सर्वं खल्विद ब्रह्मेति च प्रकृतम् एष म आत्मा न्तर्हृदय एतद्ब्रह्मेत्युच्यते, तथापि अन्तधानमीषदपरित्यज्यैव एतमात्मान इत अस्माच्छरीरात् प्रेत्य अभिसभवितास्मी त्युक्तम् । यथाक्रतुरूपस्य आत्मन प्रतिपत्तास्मीति यस्यैवविद स्यात् भवेत् अद्धा सत्यम् एव स्यामह प्रेत्य, एव न स्यामिति न च विचिकित्सा अस्ति इत्येतस्मिन्नर्थे क्रतुफलसबन्धे, स तथैवेश्वरभाव प्रतिपद्यते विद्वान्, इत्येतदाह स्म उक्तवान्किल शाण्डिल्या नाम ऋषि । द्विरभ्यास आदरार्थ ॥

इति चतुर्दशखण्डभाष्यम ॥

पञ्चदश खण्ड. ॥

'अस्य कुले वीरो जायते' इत्युक्तम् । न वीरज ममात्र पितुस्त्राणाय, 'तस्मात्पुत्रमनुशिष्ट लोक्यमाहु' इति श्रुत्यन्तरात् । अतस्तद्दीर्घायुष्ट्व कथ स्यादित्येवमर्थ कोशविज्ञानारम्भ । अभ्यर्हितविज्ञानव्यासङ्गादनन्तरमेव नोक्त तदिदानीमेव आरभ्यते—

अन्तरिक्षोदर. कोशो भूमिबुध्नो न जीर्यति दिशो ह्यस्य स्रक्तयो द्यौरस्योत्तर बिलꣳस एष कोशो वसुधानस्तस्मिन्विश्वमिदꣳश्रितम् ॥ १ ॥

अन्तरिक्षम् उदरम् अन्त सुषिर यस्य सोऽयम् अन्तरिक्षोदर, कोश कोश इव अनेकधर्मसादृश्यात्कोश, स च भूमिबुध्न भूमिर्बुध्नो मूल यस्य स भूमिबुध्न, न जीर्यति न विनश्यति, त्रैलोक्यात्मकत्वात् । सहस्रयुगकालावस्थायी हि स । दिशो हि अस्य सर्वा स्रक्तय कोणा । द्यौरस्य कोशस्य उत्तरम् ऊर्ध्व बिलम्, स एष यथोक्तगुण कोश वसुधान वसु धीयतेऽस्मिन्प्राणिना कमफलाख्यम, अतो वसुधान । तस्मिन्नन्त विश्व समस्त प्राणिकर्मफल सह तत्साधनै इद यद्दृश्यते प्रत्यक्षादिप्रमाणै श्रितम् आश्रित स्थितमित्यर्थ ॥

तस्य प्राची दिग्जुहूर्नाम सहमाना ना म दक्षिणा राज्ञी नाम प्रतीची सुभूता नामोदीची तासा वायुर्वत्स स य एत मेव वायु दिशा वत्स वेद न पुत्ररोद ँ रोदिति सोऽहमेतमेव वायु दिशा वत्स वेद मा पुत्ररोद ँ रुदम् ॥ २ ॥

तस्यास्य प्राची दिक् प्राग्गतो भाग जुहूर्नाम जुह्वत्यस्या दिशि कर्मिण प्राङ्मुखा सन्त इति जुहूर्नाम। सहमाना नाम सहन्तेऽस्या पापकर्मफलानि यमपुर्या प्राणिन इति सहमाना नाम दक्षिणा दिक्। तथा राज्ञी नाम प्रतीची पश्चिमा दिक्, राज्ञी राज्ञा वरुणनाधिष्ठिता, सध्यारागयोगाद्वा। सुभूता नाम भूतिमद्भिरीश्वरकुबेरादिभिरधिष्ठितत्वात् सुभूता नाम उदीची। तासा दिशा वायु वत्स, दिग्जत्वाद्वायो, पुरोवात इत्यादिदर्शनात्। स य कश्चित् पुत्रदीघजीवितार्थी एव यथोक्तगुण वायु दिशा वत्सम् अमृत वेद, स न पुत्ररोद पुत्रनिमित्त रोदन न रोदिति, पुत्रो न म्रियत इत्यर्थ। यत एव विशिष्ट कोशदिग्वत्सविषय विज्ञानम्, अत सोऽह पुत्रजीवितार्थी एवमेत वायु दिशा वत्स वेद

जाने । अत पुत्ररोद मा रुद पुत्रमरणनिमित्त पुत्ररोदो मम मा भूदित्यर्थ ॥

अरिष्ट कोश प्रपद्येऽमुनामुनामुना प्राण प्रपद्येऽमुनामुनामुना भू प्रपद्येऽमुनामुनामुना भुव प्रपद्येऽमुनामुनामुना स्व प्रपद्येऽमुनामुनामुना ॥ ३ ॥

अरिष्टम् अविनाशिन कोश यथोक्त प्रपद्ये प्रपन्नोऽस्मि पुत्रायुषे । अमुनामुनामुनेति त्रिर्नाम गृह्णाति पुत्रस्य । तथा प्राण प्रपद्येऽमुनामुनामुना, भू प्रपद्येऽमुनामुनामुना, भुव प्रपद्येऽमुनामुनामुना, स्व प्रपद्येऽमुनामुनामुना, सर्वत्र प्रपद्ये इति त्रिर्नाम गृह्णाति पुन पुन ॥

स यदवोच प्राण प्रपद्य इति प्राणो वा इद᳕ सर्व भूत यदिद किंच तमेव तत्प्रापत्सि ॥ ४ ॥

स यदवोच प्राण प्रपद्य इति व्याख्यानार्थमुपन्यास । प्राणो वा इद᳕ सर्व भूत यदिद जगत्। यथा वारा नाभौ' इति वक्ष्यति । अतस्तमेव सर्व तत् तेन प्राणप्रतिपादनेन प्रापत्सि प्रपन्नोऽभूवम् ॥

अथ यदवोच भूः प्रपद्य इति पृथिवीं प्रपद्येऽन्तरिक्षं प्रपद्ये दिवं प्रपद्य इत्येव तदवोचम् ॥ ५ ॥

तथा भूः प्रपद्ये इति त्रीँल्लोकान्भूरादीन्प्रपद्ये इति तदवोचम् ॥

अथ यदवोच भुवः प्रपद्य इत्यग्निं प्रपद्ये वायुं प्रपद्य आदित्यं प्रपद्य इत्येव तदवोचम् ॥ ६ ॥

अथ यदवोच भुवः प्रपद्ये इति, अग्न्यादीन्प्रपद्ये इति तदवोचम् ॥

अथ यदवोच२ स्वः प्रपद्य इत्यृग्वेदं प्रपद्ये यजुर्वेदं प्रपद्ये सामवेदं प्रपद्य इत्येव तदवोच तदवोचम् ॥ ७ ॥

इति पञ्चदश खण्ड ॥

अथ यदवाच स्वः प्रपद्ये इति, ऋग्वेदादीन्प्रपद्ये इत्येव तदवोचमिति । उपरिष्टान्मन्त्रान् जपेत् तत पूर्वोक्तमजरकोश सदिग्वत्स यथावद्धथात्वा । द्विर्वचनमादरार्थम् ॥

इति पञ्चदशखण्डभाष्यम् ॥

षोडश खण्ड ॥

पुत्रायुष उपासनमुक्त जपश्च । अथेदानीमात्मन दीघ जीवनायेदमुपासन जप च विदधदाह, जीवन्हि स्वय पुत्रादिफलेन युज्यते, नान्यथा । इत्यत आत्मान यज्ञ सपादयति पुरुष —

पुरुषो वाव यज्ञस्तस्य यानि चतुर्विꣳशति वर्षाणि तत्प्रात.सवन चतुर्विꣳशत्यक्षरा गायत्री गायत्र प्रात सवन तदस्य वसवोऽन्वायत्ताः प्राणा वाव वसव एते हीद ꣳ सर्व वासयन्ति ॥ १ ॥

पुरुष जीवनविशिष्ट कार्यकरणसघात यथाप्रसिद्ध एव, वावशब्दोऽवधारणार्थ , पुरुष एव यज्ञ इत्यर्थ । तथा हि सामान्यै सपादयति यजत्वम् । कथम् ? तस्य पुरुषस्य यानि चतुर्विंशतिवषाण्यायुष , तत्प्रात सवन पुरुषाख्यस्य यज्ञस्य । केन सामान्येनेति, आह— चतुर्विंशत्यक्षरा गायत्री छन्द , गायत्र गायत्रीछन्दस्क हि विधियज्ञस्य प्रात -

सवनम्, अत प्रात सवनसपन्नेन चतुर्विंशतिवर्षायुषा युक्त पुरुष अतो विधियज्ञसाहश्यात् यज्ञ । तथोत्तरयोरप्या युषो सवनद्वयसपत्ति त्रिष्टुब्जगत्यक्षरसख्यासामान्यतो वा- च्या । किंच, तदस्य पुरुषयज्ञस्य प्रात सवन विधियज्ञस्येव वसव देवा अन्वायत्ता अनुगता , सवनदेवतात्वेन स्वा मिन इत्यर्थ । पुरुषयज्ञेऽपि विधियज्ञ इव अग्न्यादयो वस व देवा प्राप्ता इत्यतो विशिनष्टि—प्राणा वाव वसव वा- गादयो वायवश्च । एते हि यस्मात् इद पुरुषादिप्राणिजातम एते वासयन्ति । प्राणेषु हि देहे वसत्सु सर्वमिद वसति, ना यथा । इत्यतो वसनाद्वासनाच्च वसव ॥

त चेदेतस्मिन्वयसि किंचिदुपतपेत्म ब्रूयात्प्राणा वसव इद मे प्रात सवन मा- ध्यदिन ँ सवनमनुसतनुतेति माह प्राणा- नां वसूना मध्ये यज्ञो विलोप्सयेत्युद्वैव तन एत्यगदो ह भवति ॥ २ ॥

त चेत् यज्ञसपादिनम एतस्मिन् प्रात सवनसपन्ने वयसि किंचित् व्याध्यादि मरणशङ्काकारणम् उपतपेत् दु खमुत्पा दयेत्, स तदा यज्ञसपादी पुरुष आत्मान यज्ञ मन्यमान

ब्रूयात् जपेदित्यथ इम मन्त्रम्— हे प्राणा वसव इद म प्रात सवन मम यज्ञस्य वर्तत, तत् माध्यदिन सवनम् अनुसत नुतेति माध्यदिनन सवनेन आयुषा सहित एकीभूत सतत कुरुतत्यथ । मा अह यज्ञ युष्माक प्राणाना वसूना प्रात सव नेशाना मध्ये विलोप्सीय विलुप्येय विच्छिद्येयत्यथ । इति शब्दो मन्त्रपरिसमाप्त्यथ । स तेन जपेन ध्यानेन च तत तस्मादुपतापात् उत् एति उद्गच्छति । उद्गम्य विमुक्त सन् अगदो ह अनुपतापो भवत्यव ॥

अथ यानि चतुश्चत्वारि꣡ꣳशद्वर्षाणि तन्माध्यदिन꣡ꣳ सवन चतुश्चत्वारि꣡ꣳशद-क्षरा त्रिष्टुप्त्रैष्टुभ माध्यदिन꣡ꣳ सवन त-दस्य रुद्रा अन्वायत्ता प्राणा वाव रुद्रा एते हीद꣡ꣳ सर्व꣡ꣳ रोदयन्ति ॥ ३ ॥

अथ यानि चतुश्चत्वारिंशद्वर्षाणीत्यादि समानम् । रुदन्ति रोदयन्तीति प्राणा रुद्रा । क्रूरा हि ते मध्यमे वयसि, अतो रुद्रा ॥

त चेदेतस्मिन्वयसि किंचिदुपतपेत्स ब्रूयात्प्राणा रुद्रा इद मे माध्यदिन꣡ꣳ सवन

तृतीयसवनमनुसतनुतेति माह प्राणाना८ रुद्राणा मध्ये यज्ञो विलोप्सीयेत्युद्धैव तत एत्यगदो ह भवति ॥ ४ ॥

अथ यान्यष्टाचत्वारि८शद्वर्षाणि तत्तृतीयसवनमष्टाचत्वारि८शदक्षरा जगती जागत तृतीयसवन तदस्यादित्या अन्वायत्ता प्राणा वावादित्या एते हीद८ सर्वमाददते ॥ ५ ॥

त चेदस्मिन्वयसि किंचिदुपतपेत्स ब्रूयात्प्राणा आदित्या इद मे तृतीयसवन मायुरनुसतनुतेति माह प्राणानामादित्याना मध्ये यज्ञा विलोप्सीयेत्युद्धैव तत एत्यगदो हैव भवति ॥ ६ ॥

तथा आदित्या प्राणा । ते हि इद शब्दादिजातम् आददते, अत आदित्या । तृतीयसवनमायु षोडशोत्तरवर्षशत समापयत अनुसतनुत यज्ञ समापयतेत्यर्थ । समानमन्यत् ॥

निश्चिता हि विद्या फलायेत्येतदशयन् उदाहरति—

एतद्ध स्म वै तद्विद्वानाह महिदास ऐतरेयः स किं म एतदुपतपसि योऽहमनेन न प्रेष्यामीति स ह षोडश वर्षशतमजीवत्प्र ह षोडश वर्षशत जीवति य एव वेद ॥ ७ ॥

इति षोडश खण्ड ॥

एतत् यज्ञदशन ह स्म वै किल तद्विद्वानाह महिदासो नामत , इतराया अपत्यम ऐतरेय । किं कस्मात् म मम एतत् उपतपनम् उपतपसि स त्व ह रोग, याऽह यज्ञ अनेन त्व कृतनोपतापेन न प्रेष्यामि न मरिष्यामि, अतो वृथा तव श्रम इत्यथ । इत्यवमाह स्म—इति पूर्वेण सबन्ध । स एवनिश्चय सन् षोडश वर्षशतमजीवत् । अन्योऽप्येवनिश्चय षोडश वर्षशत प्रजीवति, य एव यथोक्त यज्ञसपादन वेद जानाति, स इत्यर्थ ॥

इति षोडशखण्डभाष्यम् ॥



सप्तदश खण्ड ॥

स यदशिशिषति यत्पिपासति यन्न रमते ता अस्य दीक्षा ॥ १ ॥

स यदशिशिषतीत्यादियज्ञसामान्यनिर्देश पुरुषस्य पूर्वेणैव सबध्यते । यदशिशिषति आशतुमिच्छति, तथा पिपासति पातुमिच्छति, यन्न रमत इष्टाद्यप्राप्तिनिमित्तम्, यदेवजातीयक दु खमनुभवति, ता अस्य दीक्षा , दु ख सामान्याद्विधियज्ञस्येव ॥

अथ यदश्नाति यत्पिबति यद्रमते तदुपसदैरेति ॥ २ ॥

अथ यदश्नात यत्पिबति यद्रमते रतिं च अनुभवति इष्टादिसयोगात्, ता उपसदै समानतामेति । उपसदा च पयोव्रतत्वनिमित्त सुखमस्ति । अल्पभोजनीयानि च अहान्यास ञ्जानि इति प्रश्वास , अतोऽशनादीनामुपसदा च सामान्यम् ॥

अथ यद्धसति यज्जक्षति यन्मैथुन चरति स्तुतशस्त्रैरेव तदेति ॥ ३ ॥

अथ यद्धसति यज्जक्षति भक्षयति यन्मैथुन चरति, स्तुतशस्त्रैरेव तत्समानतामेति , शब्दवत्त्वसामान्यात् ॥

अथ यत्तपो दानमार्जवमहि᳖सा सत्य वचनमिति ता अस्य दक्षिणा ॥ ४ ॥

अथ यत्तपो दानमार्जवमहिंसा सत्यवचनमिति, ता अस्य दक्षिणा, धर्मपुष्टिकरत्वसामान्यात् ॥

तस्मादाहुः सोष्यत्यसोष्टेति पुनरुत्पादनमेवास्य तन्मरणमेवावभृथ ॥ ५ ॥

यस्माच्च यज्ञ पुरुष, तस्मात् त जनयिष्यति माता यदा, तदा आहुरन्ये सोष्यतीति तस्य मातरम्, यदा च प्रसूता भवति, तदा असोष्ट पूर्णिकेति, विधियज्ञ इव सोष्यति सोम देवदत्त, असोष्ट सोम यज्ञदत्त इति, अत शब्दसामान्याद्वा पुरुषो यज्ञ । पुनरुत्पादनमेवास्य तत् पुरुषाख्यस्य यज्ञस्य, यत्सोष्यत्यसोष्टेति शब्दसबन्धित्व विधियज्ञस्येव। किंच तन्मरणमेव अस्य पुरुषयज्ञस्य अवभृथ, समाप्तिसामान्यात् ॥

तद्धैतद्घोर आङ्गिरस कृष्णाय देवकीपुत्रायोक्त्वोवाचापिपास एव स बभूव सोऽन्तवेलायामेतत्त्रय प्रतिपद्येताक्षित मस्यच्युतमसि प्राणसंशितमसीति तत्त्रैते द्वे ऋचौ भवत ॥ ६ ॥

तद्धैतत् यज्ञदर्शन घोर नामत, आङ्गिरस गोत्रत, कृष्णाय देवकीपुत्राय शिष्याय उक्त्वा, उवाच तदेतत्त्रयम् इत्यादिव्यवहितेन सबन्ध । स च एतद्दर्शन श्रुत्वा अपि

पास एवान्याभ्यो विद्याभ्यो बभूव । इत्थ च विशिष्टा इयम, यत्कृष्णस्य देवकीपुत्रस्य अन्या विद्या प्रति तृट्विच्छेदकरी इति पुरुषयज्ञविद्या स्तौति । घोर आङ्गिरस कृष्णायोक्त्वेमा विद्या किमुवाचेति, तदाह—स एव यथोक्तयज्ञवित् अन्तवेलाया मरणकाले एतत् मन्त्रत्रय प्रतिपद्येत जपदित्यर्थ । किं तत्[१] अक्षितम् अक्षीणम् अक्षत वा असि इत्येक यजु । सा मर्त्यादादित्यस्थ प्राण च एकीकृत्य आह । तथा तमेव आह, अच्युत स्वरूपादप्रच्युतमसि इति द्वितीय यजु । प्राणसंशित प्राणश्च स संशित सम्यक्तन्कृत च सूक्ष्म तत् त्वमसि इति तृतीय यजु । तत्र एतस्मिन्नर्थे विद्यास्तुतिपरे द्वे ऋचौ मन्त्रौ भवत , न जपार्थे, त्रय प्रतिपद्येत इति त्रित्वसख्याविधानात्, पञ्चसख्या हि तदा स्यात् ॥

आदित्प्रत्नस्य रेतस । उद्वय तमसस्परि ज्योति पश्यन्त उत्तरꣳ स्व पश्यन्त उत्तर देव देवत्रा सूर्यमगन्म ज्योतिरुत्तममिति ज्योतिरुत्तममिति ॥ ७ ॥

आदित् इत्यत्र आकारस्यानुबन्धस्तकार अनर्थक इच्छब्दश्च । प्रत्नस्य चिरतनस्य पुराणस्येत्यर्थ , रेतस कारणस्य बीजभूतस्य जगत , सदाख्यस्य ज्योति प्रकाश

पश्यन्ति । आशब्द उत्सृष्टानुबन्ध पश्यन्तीत्यनेन सबध्यते, कि तज्ज्योति पश्यन्ति, वासरम् अह अहरिव तत् सर्वतो व्याप्त ब्रह्मणो ज्योति , निवृत्तचक्षुषो ब्रह्मविद ब्रह्मचर्या दिनिवृत्तिसाधनै शुद्धान्त करणा आ समन्तत ज्योति पश्यन्तीत्यथ । पर परमिति लिङ्गव्यत्ययेन, ज्योतिष्पर त्वात्, यत् इध्यते दीप्यते दिवि द्योतनवति परस्मिन्ब्रह्मणि वर्तमानम् येन ज्योतिषेद्ध सविता तपति चन्द्रमा भाति विद्युद्विद्योतते ग्रहतारागणा विभासन्ते। किं च, अन्यो मन्त्र-दृगाह यथोक्त ज्योति पश्यन—उद्वय तमस अज्ञानलक्षणा-त् परि परस्तादिति शेष , तमसो वा अपनेतृ यज्ज्योति उत्तरम्—आदित्यस्थ परिपश्यन्त वयम् उत् अगन्म इति व्यवहितेन सबन्ध , तज्ज्योति स्व स्वम् आत्मीयमस्मद्धृदि स्थितम , आदित्यस्थ च तदेक ज्योति , यत् उत्तरम् उत्कृष्टत रमूर्ध्वतर वा अपर ज्योतिरपेक्ष्य, पश्यन्त उदगन्म वयम् । कमुदगन्मति, आह । देव द्योतनवन्त देवत्रा देवेषु सर्वेषु, सूर्य रसाना रश्मीना प्राणाना च जगत ईरणात्सूर्य तमुदग न्म गतवन्त , ज्योतिरुत्तम सर्वज्योतिर्भ्य उत्कृष्टतमम् अहो प्राप्ता वयमित्यर्थ । इद तज्ज्योति , यत् ऋग्भ्या स्तुत यद्यजु-ष्मयेण प्रकाशितम् । द्विरभ्यासो यज्ञकल्पनापरिसमाप्त्यर्थ ॥

इति सप्तदशखण्डभाष्यम् ॥

अष्टादश खण्ड ॥

**मनो ब्रह्मेत्युपासीतेत्यध्यात्ममथाधि-
दैवतमाकाशो ब्रह्मेत्युभयमादिष्ट भवत्य-
ध्यात्म चाधिदैवत च ॥ १ ॥**

मनोमय ईश्वर उक्त आकाशात्मेति च ब्रह्मणो गुणैक-देशत्वेन। अथेदानीं मनआकाशयो समस्तब्रह्मदृष्टिविधा-नाथ आरम्भ मनो ब्रह्मेत्यादि। मन मनुतेऽनेनेत्यन्त करण तद्ब्रह्म परमित्युपासीतति एतदात्मविषय दर्शनम् अध्यात्मम्। अथ अधिदैवत देवताविषयमिद वक्ष्याम। आकाशो ब्रह्मेत्युपासीत, एवमुभयमध्यात्ममधिदैवत च उभय ब्रह्मदृष्टिविषयम् आदिष्टम उपदिष्ट भवति, आकाशमनसो सूक्ष्मत्वात् मनसोपलभ्यत्वाच्च ब्रह्मण, योग्य मनो ब्रह्म-दृष्टे, आकाशश्च, सर्वगतत्वात्सूक्ष्मत्वादुपाधिहीनत्वाच्च ॥

**तदेतच्चतुष्पाद्ब्रह्म वाक्पादः प्राण पाद
श्चक्षुः पाद श्रोत्र पाद इत्यध्यात्ममथा-
धिदैवतमग्नि पादो वायु. पाद आदित्य.**

पादो दिश पाद इत्युभयमेवादिष्ट भवत्यध्यात्म चैवाधिदैवत च ॥ २ ॥

तदेतत् मनआख्य चतुष्पाद्ब्रह्म, चत्वार पादा अस्येति । कथ चतुष्पात्त्व मनसा ब्रह्मण इति, आह—वाक्प्राणश्चक्षु श्रोत्रमित्येते पादा इत्यध्यात्मम् । अथाधिदैवतम् आकाशस्य ब्रह्मणोऽग्निर्वायुरादित्यो दिश इत्येते । एवमुभयमेव चतुष्पाद्ब्रह्म आदिष्ट भवति अध्यात्म चैवाधिदैवत च । तत्र वागेव मनसो ब्रह्मणश्चतुर्थ पाद इतरपादत्रयापेक्षया— वाचा हि पादेनेव गवादि वक्तव्यविषय प्रति तिष्ठति, अतो मनस पाद इव वाक् । तथा प्राणो घ्राण पाद , तेनापि गन्धविषय प्रति च क्रामति । तथा चक्षु पाद श्रोत्र पाद इत्येवमध्यात्म चतुष्पात्त्व मनसो ब्रह्मण । अथाधिदैवतम अग्निर्वाग्वादित्यदिश आकाशस्य ब्रह्मण उदर इव गो पादा इव लग्ना उपलभ्यन्ते, तेन तस्य आकाशस्य अग्न्यादय पादा उच्यन्ते । एवमुभयमध्यात्म चैवाधिदैवत च चतुष्पादादिष्ट भवति ॥

वागेव ब्रह्मणश्चतुर्थ पादः सोऽग्निना ज्योतिषा भाति च तपति च भाति च

तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एव वेद ॥ ३ ॥

तत्र वागेव मनसो ब्रह्मणश्चतुर्थ पाद । साऽग्निना अधिदैवतेन ज्योतिषा भाति च दीप्यते तपति च सताप च औष्ण्य करोति । अथवा तैलघृताद्याग्नेयाशनेन इद्धा वाग्भाति च तपति च वदनायोत्साहवती स्यादित्यथ । विद्वत्फलम्, भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन, य एव यथोक्त वेद ॥

प्राण एव ब्रह्मणश्चतुर्थ. पाद स वायुना ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एव वेद ॥ ४ ॥

चक्षुरेव ब्रह्मणश्चतुर्थ' पाद स आदित्येन ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एव वेद ॥ ५ ॥


श्रोत्रमेव ब्रह्मणश्चतुर्थ' पादः स दि

ग्भिर्ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एव वेद य एव वेद ॥ ६ ॥

इति अष्टादश खण्ड ॥

तथा प्राण एव ब्रह्मणश्चतुर्थ पाद । स वायुना गन्धाय भाति च तपति च । तथा चक्षु आदित्येन रूपग्रहणाय, श्रोत्र दिग्भि शब्दग्रहणाय । विद्याफल समान सर्वत्र ब्रह्मसपत्तिरदृष्ट फल य एव वेद । द्विरुक्तिर्दर्शनसमाप्त्यर्था ॥

इति अष्टादशखण्डभाष्यम् ॥



एकोनविंश खण्ड ॥

आदित्यो ब्रह्मेण पाद उक्त इति तस्मिन्सकलब्रह्मादृष्ट्यर्थमिदमारभ्यते—

आदित्यो ब्रह्मेत्यादेशस्तस्योपव्याख्यानमसदेवेदमग्र आसीत् । तत्सदासीत्तत्समभवत्तदाण्ड निरवर्तत तत्संवत्सरस्य मात्रामशयत तन्निरभिद्यत ते आण्डकपाले रजत च सुवर्ण चाभवताम् ॥ १ ॥

आदित्यो ब्रह्मेत्यादेश उपदेश , तस्योपव्याख्यान क्रियते स्तुत्यर्थम् । असत अव्याकृतनामरूपम् इद जगत् अशषमग्रे प्रागवस्थायामुत्पत्ते आसीत न त्वसदेव , 'कथमसत सज्जायेत' इति असत्कार्यत्वस्य प्रतिषेधात् । ननु इहासदेवेति विधानाद्विकल्प स्यात् । न, क्रियास्विव वस्तुनि विकल्पानुपपत्ते । कथ तर्हि इदमसदेवेति ? नन्ववोचाम अव्याकृतनाम रूपत्वादसदिवासदिति । नन्वेवशब्दोऽवधारणार्थ , सत्यमेवम् , न तु सत्त्वाभावमवधारयति , कि तर्हि, व्याकृतनाम

रूपाभावमवधारयति, नामरूपव्याकृतविषये सच्छब्दप्रयागा दृष्ट । तच्च नामरूपव्याकरणमादित्यायत्त प्रायशो जगत । तदभावे हि अन्ध तम इव इद न प्रज्ञायेत किंचन इत्यत तत्स्तुतिपरे वाक्ये सदपीद प्रागुत्पत्तेर्जगदसदेवेत्यादित्य स्तौ ति ब्रह्मदृष्टयर्हत्वाय, आदित्यनिमित्तो हि लोके सदिति व्यवहार — यथा असदेवेद राज्ञ कुल सर्वगुणसपन्ने पूर्णवर्मणि राजन्यसतीति तद्वत् । न च सत्त्वमसत्त्व वा इह जगत प्रतिपिपादयिषितम्, आदित्यो ब्रह्मेत्यादेशपरत्वात् । उपसहरिष्यत्यन्ते आदित्य ब्रह्मेत्युपास्त इति । तत्सदासीत् तत् असच्छब्दवाच्य प्रागुत्पत्ते स्तिमितम् अनिस्पन्दमस दिव सत्कार्याभिमुखम् ईषदुपजातप्रवृत्ति सदासीत्, ततो ल ब्धपरिस्पन्द तत्समभवत् अल्पतरनामरूपव्याकरणेन अङ्कुरी भूतमिव बीजम् । ततोऽपि क्रमेण स्थूलीभवत् अण्ड समवर्तत सवृत्तम् । आण्डमिति दैर्घ्य छान्दसम । तदण्ड सवत्सरस्य कालस्य प्रसिद्धस्य मात्रा परिमाणम् अभिन्न स्वरूपमेव अशयत स्थित बभूव । तत् तत सवत्सरपरिमा णात्कालादूर्ध्वं निरभिद्यत निर्भिन्नम्— वयसामिवाण्डम् । तस्य निर्भिन्नस्याण्डस्य कपाले द्वे रजत च सुवर्ण च अभवता सवृत्ते ॥

तद्यद्रजतꣳ सेय पृथिवी यत्सुवर्णꣳ सा द्यौर्यज्जरायु ते पर्वता यदुल्बꣳ समेघो नीहारो या धमनयस्ता नद्यो यद्वास्तेय-मुदकꣳ स समुद्रः ॥ २ ॥

तत् तयो कपालयो यद्रजत कपालमासीत्, सेय पृथिवी पृथिव्युपलक्षितमधोऽण्डकपालमित्यथ । यत्सुवर्ण कपाल सा द्यौ द्युलोकोपलक्षितमूर्ध्वं कपालमित्यथ । यज्जरायु गर्भपरिवेष्टन स्थूलम् अण्डस्य द्विशकलीभावकाले आसीत्, ते पर्वता बभूवु । यदुल्ब सूक्ष्म गर्भपरिवेष्टनम्, तत् सह मेघै समेघ नीहारोऽवश्याय बभूवेत्यर्थ । या गर्भस्य जातस्य देहे धमनय शिरा, तानद्यो बभूवु । यत् तस्य वस्तौ भव वास्तेयमुदकम्, स समुद्र ॥

अथ यत्तदजायत सोऽसावादित्यस्त जायमान घोषा उलूलवोऽनूदतिष्ठन्सर्वा णि च भूतानि सर्वे च कामास्तस्मात्त-स्योदय प्रति प्रत्यायन प्रति घोषा उलूल वोऽनूत्तिष्ठन्ति सर्वाणि च भूतानि सर्वे च कामाः ॥ ३ ॥

अथ यत्तदजायत गर्भरूप तस्मिन्नण्डे, सोऽसावादित्य , तमादित्य जायमान घोषा शब्दा उलूलव उरूरवो विस्तीर्णरवा उदतिष्ठन् उत्थिवन्त इश्वरस्येवेह प्रथमपुत्रजन्मनि सर्वाणि च स्थावरजङ्गमानि भूतानि सर्वे च तेषा भूताना कामा काम्यन्त इति विषया स्त्रीवस्त्रान्नादय । यस्मादादित्यजन्मनिमित्ता भूतकामोत्पत्ति , तस्मादद्यत्वेऽपि तस्यादित्यस्यादय प्रति प्रत्यायन प्रति अस्तगमन च प्रति, अथवा पुन पुन प्रत्यागमन प्रत्यायन तत्प्रति तन्निमित्तीकृत्यत्यर्थ , सर्वाणि च भूतानि सर्वे च कामा घोषा उलूलवश्चानुतिष्ठन्ति । प्रसिद्ध हि एतदुदयादौ सवितु ॥

स य एतमेव विद्वानादित्य ब्रह्मेत्युपास्तेऽभ्याशो ह यदेनꣳ साधवो घोषा आ च गच्छेयुरुप च निम्रेडेरन्निम्रेडेरन् ॥ ४ ॥

इति एकोनविंश खण्ड ॥

स य कश्चित् एतमेव यथोक्तमहिमान विद्वान्सन् आदित्य ब्रह्मेत्युपास्ते, स तद्भाव प्रतिपद्यत इत्यर्थ । किंच दृष्ट फलम् अभ्याश क्षिप्र तद्विद , यदिति क्रियाविशेषणम् , एनमेवविद साधव शोभना घोषा , साधुत्व घोषादीना यदु-

पभोगे पापानुबन्धाभाव , आ च गच्छेयु आगच्छेयुश्च, उप च निम्रेडेरन् उपनिम्रेडेरश्च—न केवलमागमनमात्र घोषाणाम् उपसुखयेयुश्च उपसुख च कुर्युरित्यथ । द्विर भ्यास अध्यायपरिसमाप्त्यर्थ आदरार्थश्च ॥

इति एकोनविंशखण्डभाष्यम् ॥

इति श्रीमत्परमहसपरिव्राजकाचार्यस्य श्रीगोवि दभग
वत्पूज्यपादशिष्यस्य श्रीमच्छकरभगवत कृतौ
छान्दोग्योपनिषद्भाष्ये तृतीयोऽध्याय
समाप्त ॥



परिग्रहण स 10368
ग्रन्थ , इ लि शि सस्थान
सा०नाथ वाराणसी